श्री, भागवत पुराण भावार्थदीपिका
भिन्न पत्रक ॥ ल० अ० १७ पं० अ०पृ०

ह० ले०

द्वितीय
तृतीय स्कन्ध
नहीं है

ॐ स्वस्ति श्रीगणेशाय नमः ॥ ॐ नमो भगवते वासुदेवाय ॥ ॐ वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि
यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे ॥१॥ विश्वसर्गविसर्गादिनवलक्षणलक्षितं ॥ श्रीकृष्णाख्यं
परं धाम जगद्धाम नमामि तत् ॥२॥ माधवोमाधवावीशौ सर्वसिद्धिविधायिनौ ॥ वंदे परस्परात्मानौ परस्परनु
तिप्रियौ ॥३॥ संप्रदायानुरोधेन पौर्वापर्यानुसारतः ॥ श्रीभागवतभावार्थदीपिकेयं प्रतन्यते ॥४॥
काहं मंदमतिः क्वेदं मंथनं क्षीरवारिधेः ॥ किं तत्र परमाणुर्वै यत्र मज्जति मंदरः ॥५॥ मूकं करो
ति वाचालं पंगुं लंघयते गिरिं ॥ यत्कृपा तमहं वंदे परमानंदमाधवं ॥६॥ श्रीमद्भागव
तं नाम सर्गादिदशलक्षणं ॥ महत्पुराणमल्पे च पंचलक्षणमिष्यते ॥७॥ तत्र
क्रे द्वादशस्कंधे ॥ दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ॥ कश्चित्
वद्विधं ब्रह्मन्महदल्पमवस्थयेति ॥ श्रीमद्भागवताभिधः सुरतरुस्तारां
कुरः सज्जनिः ॥ स्कंधैर्द्वादशभिस्ततः प्रविलसद्भक्त्यालवालोदयः ॥
द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखाः सहस्राण्यलं ॥ पर्णान्यष्टदशेष्टदोतिसुल
भो वर्वर्ति सर्वोपरि ॥१०॥ अथ नानापुराणशास्त्रप्रबंधैः ॥ चित्तप्रशांतिमलभ
मानस्तत्र तत्रापरितुष्यन्नारदोपदेशतः ॥ श्रीमद्भगवद्गुणवर्णनप्रधानं श्रीमद्भागवतशास्त्र
प्रारिप्सुः ॥ श्रीवेदव्यासस्तत्प्रतिपाद्यदेवतानुस्मरणलक्षणं मंगलमाचरति ॥ जन्मा
द्यस्येति ॥ परं परमेश्वरं धीमहि इति ॥ ध्यायतेर्लिङि ॥ छांदसं ध्यायेमेत्यर्थः ॥ बहुवचनं च शिष्याभि
प्रायः ॥ तमेव स्वरूपतटस्थलक्षणाभ्यामुपलक्षयति ॥ सत्यत्वे हेतुः ॥ यस्मिन्नयं त्रयाणां मायागुणानां
तमोरजःसत्त्वानां सर्गो भूतेन्द्रियदेवतारूपः ॥ अमृषा सत्यः ॥ यत्सत्यतया मिथ्यासर्गोपि सत्यवत्प्रतीयते ॥ ॥

तेषां सत्यमित्यर्थः ॥ अत्र दृष्टांतः ॥ तेजोवारिमृदां यथा विनिमयो यस्य योन्यस्मिन्नन्यावभासः ॥ स यथा
धिष्ठानसत्तया तद्वत्प्रतीयत इत्यर्थः ॥ तत्र तेजसि वारिबुद्धिः मरीचितोये प्रसिद्धा मृदि काचादौ
वारिबुद्धिः वारिणि च काचादिबुद्धिरित्यादि ॥ यथायथमूह्यं ॥ यद्वा तस्यैव परमार्थसत्यत्वप्रति
पादनाय तदितरस्य मिथ्यात्वमुक्तं ॥ तत्र मृषैवायं त्रिसर्गो न वस्तुतः सन्निति ॥ यत्रेति ॥ अनेन प्रती
तगुणादिसंबंधं वारयति ॥ स्वेनैव धाम्ना महसा निरस्तं कुहकं कपटं ॥ यस्मिंस्तं ॥ तटस्थलक्षणमा
ह ॥ जन्मादीति ॥ अस्य विश्वस्य जन्मस्थितिभंगं यतो भवति ॥ जन्मादीति ॥ तं धीमहीति ॥ तत्र
अन्वयादितरतः ॥ कार्येषु कार्येषु परमेश्वरस्य सद्रूपेणान्वयात् ॥ अकार्येभ्यः खपुष्पादिभ्यश्च व्य
तिरेकात् ॥ यद्वान्वयशब्देनानुवृत्तिरितरशब्देन व्यावृत्तिः अत्र हेतुत्वात् ॥ सद्रूपं ब्रह्म कारणं

॥ जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् ॥ तेने ब्रह्म हृदा य आदिकवये मुह्यंति
यत्सूरयः ॥ तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा धाम्ना स्वेन सदा निर
स्तकुहकं सत्यं परं धीमहि ॥ १

मृत्सुवर्णादिवत् ॥ व्याहृतत्वात् ॥ विश्वं कार्यं घटकुंडलादिवदित्यर्थः ॥ यद्वा सावयवत्वादन्व
यव्यतिरेकाभ्यां यदस्य जन्मादि ॥ तद्यतो भवतीति संबंधः ॥ तथा च श्रुतिः ॥ यतो वा इमानि भू
तानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीत्याद्या ॥ स्मृतिश्च ॥ यतः सर्वाणि भूतानि
भवंत्यादियुगागमे ॥ यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये इत्याद्या ॥ तर्हि किं प्रधानं जगत्
कारणत्वात् ॥ ध्येयमभिप्रेतं नेत्याह ॥ अभिज्ञो यस्तं ॥ स ऐक्षत लोकान्नु सृजा इति ॥ स इमांल्लो
कानसृजतेति श्रुतेः ॥ ईक्षतेर्नाशब्दमिति न्यायाच्च ॥ तर्हि जीवास्यान्नेत्याह ॥ स्वराडिति ॥ स्वेनैव रा

जनेषु: येस्वतः सिद्धज्ञानमित्यर्थः ॥ तर्हि किं ब्रह्मा ॥ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक
आसीत ॥ तेनाह ॥ तेनेइत्यादि कवये ब्रह्मणेपि ब्रह्म वेदः तेन प्रकाशितवान ॥ योब्रह्माणं विद
धाति ॥ पूर्व्वं योवैवेदांश्च प्रहिणोति तस्मै तंहदेवमात्मबुद्धिप्रकाशं मुमुक्षुर्वैशरणमहंप्रपद्ये इति।
श्रुतेः ॥ ननु ब्रह्मणो न्यतो वेदाध्ययनं प्रसिद्धं स्यातन्न हृदा मनसैवतेन प्रवर्त्तनं बुद्धिवृत्तिप्रवर्त्त
कत्वेन गायत्र्यर्थो दर्शितः वक्ष्यति हि ॥ प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि
स्वलक्षणा प्रादुरभूत्किलास्यतः समेऋषीणामृषभः प्रसीदतां ॥ ननु च ब्रह्मा स्वयमेव तत्त्वं प्रति
बुद्ध्वा येन वेदमुपलभतां ॥ तेनाह ॥ यद्यस्मिन्ब्रह्मणि सूरयोपि मुह्यंतीति ॥ तस्माद्ब्रह्मणोपि पर
राधीनज्ञानत्वात्स्वतः ॥ सिद्धज्ञानः परमेश्वर एव जगत्कारणं स एव सत्यः ॥ अस्मतः सत्यपद
नात्तु परमार्थसत्यः ॥ सर्वज्ञत्वेन च निरस्तं कुहकं यः ॥ तंधीमहीति ॥ गायत्र्याः प्रारंभेणगायत्र्या
ख्यब्रह्मविद्यारूपमेतत्पुराणमिति दर्शितं ॥ यथोक्तं मत्स्यपुराणे ॥ पुराणं दानप्रस्तावे ॥ यत्राधि
कृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ॥ वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥ लिखित्वा तच्च यो दद्या
द्धेमसिंहसमन्वितं ॥ प्रौष्ठपद्यां पौर्णमास्यां स याति परमं पदं ॥ अष्टादशसहस्राणि पुराणं
तत्प्रकीर्त्तितं ॥ पुराणांतरेच ॥ ग्रंथोष्टादशसाहस्रो द्वादशस्कंधसंमितः ॥ हयग्रीवब्रह्मविद्या
यत्र वृत्रवधस्तथा ॥ गायत्र्या च समारंभः तद्वै भागवतं विदुः ॥ पद्मपुराणे ॥ अंबरीषं प्रति गौ
तमवचनं ॥ अंबरीषशुकप्रोक्तं नित्यंभागवतंशृणु ॥ पठस्व स्वमुखेनापि यदीच्छसि भवक्षय
मिति ॥ अत एव भागवतं नामान्यदित्यपि न शंकनीयं ॥ १ ॥ इदानीं श्रोतृप्रवर्त्तनाय ॥ श्रीमद्भा
गवतस्य ॥ कांडत्रयविषयेभ्यः ॥ सर्वशास्त्रेभ्यः ॥ श्रैष्ठ्यं दर्शयति ॥ धर्म्मइति ॥ ॥ ।
श्रीगुरवे नमः ॥ परमगुरवे नमः ॥ आदिसिद्धेभ्योनमः ॥ सीतापतये नमोनमः ॥ ॥ ॥

अथ श्रीमति सुंदरे श्रीभागवते परमो धर्मो निरूप्यते परमत्वे हेतुः ॥ प्रकर्षेण उज्झितं कैतवं फलाभिसं-
धिलक्षणं कपटं यस्मिन् सः ॥ प्रशब्देन मोक्षाभिसंधिरपि निरस्तः केवलमीश्वराराधनलक्षणो धर्मो
निरूप्यत इति ॥ अधिकारितोपि धर्मस्य परमत्वमाह निर्मत्सराणां परोत्कर्षासहनं मत्सरः तद्रहिता-
नां सतां भूतानुकंपिनां एवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्तं ॥ ज्ञानकांडविषयेभ्योपि श्रै-
ष्ठ्यमाह ॥ वेद्यमिति ॥ वास्तवं परमार्थभूतं वस्तु वेद्यं न तु वैशेषिकादीनामिव द्रव्यगुणादिरूपं यद्वा
वास्तवशब्देन वस्तुनोंशो जीवः वस्तुनः शक्तिर्माया वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः
पृथगिति ॥ वेद्यमयत्नेनैव ज्ञातुं शक्यं ततः किं फलमाह शिवदं परमसुखदं किंच ॥ आध्यात्मिका-
दितापत्रयोन्मूलनं च ॥ अनेन ज्ञानकांडविषयेभ्यः श्रैष्ठ्यं दर्शितं कर्तृतोपि श्रैष्ठ्यमाह ॥ महामुनिः
श्रीनारायणः तेन प्रथमं संक्षेपतः कृते देवताकांडगतं श्रैष्ठ्यमाह ॥ परैः शास्त्रैस्तदुक्तैः साधनैर्वा ई-

धर्मः प्रोज्झितकैतवोत्र परमो निर्मत्सराणां सतां ॥ वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयो-
न्मूलनं ॥ श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः ॥ सद्यो हृद्यवरुध्यतेत्र कृतिभिः
शुश्रूषुभिस्तत्क्षणात् ॥ २ ॥ निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं ॥
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ३ ॥

श्वरो हृदि किं सद्य एव अवरुध्यते स्थिरीक्रियते वा शब्दः कटाक्षे किं तु विलंबेन कथंचिदेवात्र शुश्रू-
षुभिः श्रोतुमिच्छद्भिरेव तत्क्षणादेवावरुध्यते ॥ इदमपरं किं इति सर्वेभ्यः श्रैष्ठ्यं तत्राह कृतिभिरिति ॥
श्रवणेच्छा तु पुण्यैर्विना नोत्पद्यत इत्यर्थः ॥ तस्मादत्र कांडत्रयार्थस्यापि यथावत्प्रतिपादनादिदमेव स-
र्वशास्त्रेभ्यः श्रेष्ठं अतो नित्यमेतदेव श्रोतव्यमिति भावः ॥ २ ॥ इदानीं तु न केवलं सर्वशास्त्रेभ्यः श्रेष्ठत्वाद-
स्य श्रवणं विधीयते अपि तु सर्वशास्त्रफलरूपमिदमतः परमादरेण सेव्यमित्याह निगमेति निगमो वेदः स
एव कल्पतरुः सर्वपुरुषार्थोपायत्वात् ॥ तस्य फलमिदं भागवतं नाम तत्तु वैकुंठगतं नारदेनानीय मह्यं
दत्तं मया च शुकस्य मुखे निहितं तेन च तन्मुखाद्भुवि गलितं शिष्यप्रशिष्यादिरूपपल्लवपरंपरया शनै-

२ लं ईश्वमेवावतीर्णं ननु अवरिचालात्स्फुटितमित्यर्थः ॥ ३ ॥

रसमित्युक्ते पिगलितस्य रसस्य पातुमशक्यत्वात्
मित्युक्तं अत एव सामानाधिकरण्यं न तु व्यधिकरणं रसमयभागवतयोरभेदः ऐक्यरूपत्वात् तत्र फलमित्युक्ते पानासंभवो हेयांशप्रसक्तिश्च भवेदिति तन्निवृत्त्यर्थं रसमित्युक्तं

श्री० भाग्र० टी० ७

एतच्च भविष्यदपि भगवन्निर्दिष्टमनागताबोधनेनैवास्य शास्त्रस्य प्रवृत्तिः अत एवास्य तत्र वेणु इत्यसं
हितं लोके हि शुकमुखस्पृष्टं फलममृतमिव स्वादु भवतीति प्रसिद्धं अत्र शुको मुनिः अमृतरूपमानन्दः।
स एव द्रवो रसः रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवतीति श्रुतेः। अतः हे रसिकाः रसज्ञाः तत्रापि भावुकाः
हे रसविशेषभावनाचतुराः। अहो भुवि गलितमिति सुलभमलाभोक्तिः ॥ इदं भागवतं नाम फलं मुहुः
पिबत ननु त्वगस्थ्यादिकं विहाय फलरसः पीयते न फलमेव पातव्यं ॥ तत्राह ॥ रसमयं रूपमतः त्व
गस्थ्यादि हेयांशाभावात् फलमेव कृत्स्नं पिबत ॥ अत्र च रसस्य तत्प्रावि बन्धपरत्वं रसस्य विवक्षितत्वा
द्युलोकवचनेनाविरसत्वेऽपि भुवः प्राप्यभावात् न तु विनैव रसं फलमिति सामानाधिकरण्येन रसं फलमित्यु
क्तं इह तु अयं न च भागवतामृतपाने मोक्षोऽपि तिरस्कार्य इत्याह ॥ आलयं लयो मोक्षः ॥ अभिविधावाकारः लय
मभिव्याप्य न हि दैत्यनोदिव स्वर्गादिसुखवत् मुक्तैरपि सेव्यं न च किन्तु सेव्यते ॥ एवं वक्ष्यति आत्मारामाश्च मुनयो नि
र्ग्रन्था अप्युरुक्रमे ॥ कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥ ३ ॥ तदेवमनेन श्लोकत्रयेण विशि
ष्टदेवतानमस्कारपूर्वकं प्रारिप्सितस्य शास्त्रस्य विषयप्रयोजनादि संबन्धादिकारिणो वैशिष्ट्येन स्व
वैलक्षण्येन च श्रोतॄनभिमुखीकृत्य शास्त्रमारभते नैमिष इति ॥ अनिमिषो विष्णुस्तस्य चक्रस्य नेमिः

नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः ॥ सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥ ४ ॥

शीर्यते कुण्ठीभवति यत्र तन्नैमिषं नैमिषमेव नैमिषं तथा च वायवीये ॥ एतन्मनोमयं चक्रं मया सृष्टं विसृ
ज्यते ॥ यत्रास्य शीर्यते नेमिः स देशः तपसः शुभः ॥ इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयं ॥ प्रणिप
त्य महादेवं विससर्ज पितामहः ॥ तेऽपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुं ॥ प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्य
शीर्यत ॥ तद्वनं तेन विख्यातं नैमिषं मुनिपूजितं इति नैमिष इति पाठे ॥ वाराहपुराणोक्तदिशा तथा हि गौर
मुखं प्रति प्रोक्तं श्रीभगवद्वाक्यं एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा ॥ उवाच निमिषेणेदं निहतं दानवं ब
लं ॥ अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितं ॥ भविष्यति यथार्थं वै ब्राह्मणानां विशेषकं इति ॥ अनिमिषः
श्रीविष्णुस्तत्क्षेत्रे हितत्वात् ॥ तस्य हेतुत्वं याचाविर्भावेन शौनकादिवचनेदेतेऽनिमिषक्षेत्रमिति नैमीयत इति स
लोकारतेः स्वर्गलोकः भक्ता नामिवाभरुद्यानेन सतत्त्वामयेऽस्यर्थं ॥ सहस्रसमाः संवत्सरा यत्र नका
लोत्पत्ततस्त्रेयत्रसमस्ति केकर्माहिशयत्रासनतः पाविविशः यस्यासमतस्राज्ञवेति समर्थः आलयं तनिरूपति

३ प्रयं नीत्यादि वक्तव्ये न घोच्चारणमात्रा छलेनाप्यन धात्वर्थस्याविवक्षितत्वात् ॥ ५ ॥

प्रातःकालेऽङ्गनाणवङ्गनाग्रयोषैः ॥ शुद्धेनतिथिनैमित्तिकहोमसाकल्ये दर्शितं दैवद्वमाणंप्रा
दुराम्यप्रत्तुः ॥२॥ द्विविदिर्षितामर्थान्त्रुटुंस्तनमपूर्वशास्त्रत्वात्नातिशयमाहुः त्वयेतित्रिभिः श्लो
कैः ॥३॥ इतिहासमहाभारतादिः तत्संहितानितनुकेवलमधीतानिश्रावितानिश्रोतव्यानितुपिच्छ्रायो
ताश्चैव ॥ उतश्चापियानिधर्मशास्त्राणितानामपि ॥ किंच ॥ यानीत्यादि विदांविदुषां श्रेष्ठः व्यासः ॥

तएकदातुमुनयः शातङ्गतङ्गनाग्रयः ॥ सत्कृतं हन्नमासीनं पप्रच्छुरिदमादरात् ॥४॥
मुनय ऊचुः ॥ त्वया खलुपुराणानि सेतिहासानि चानघ ॥ आख्यातान्यप्यधीतानि
धर्मशास्त्राणि यान्युत ॥६॥ यानि वेदविदां श्रेष्ठो भगवान्बादरायणः ॥ अन्ये च मुन
यः सूत परावरविदो विदुः ॥७॥ वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात् ॥ शुश्रुः
स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥८॥ तत्र तत्रांजसायुष्मन्भवता यद्विनिश्चितं
पुंसामेकांततः श्रेयः तन्नः शंसितुमर्हसि ॥९॥ प्रायेणाल्पायुषः सभ्य कलाव
स्मिन्युगे जनाः ॥ मंदाः सुमंदमतयो मंदभाग्या ह्युपद्रुताः ॥१०॥ भूरीणि भूरिकर्मा
णि श्रोतव्यानि विभागशः ॥ अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया ॥११॥ ब्रूहि नः
श्रद्दधानानां येनात्मा संप्रसीदति ॥ सूत जानासि भद्रं ते भगवान्सात्वतां पतिः ॥१२॥
यानि वेदपरावरेसगुणनिर्गुणे ब्रह्मणी विदंतीतितथा ॥ वेत्थजानासि सौम्य हे साधो तेषामनुग्र
हात् ॥ तत्त्वतोऽज्ञानेहेतुमाह ॥ शुश्रुरिति स्निग्धस्य शिष्यस्य प्रेमवतः ॥ उत एव रहस्यमपि ब्रूयुरेव ॥८॥
अंजसाश्रेयाजि वे तएकांततः श्रेयः ॥ अव्यभिचारिश्रेयः साधनं ॥९॥ प्रयोजनवन्नकालेनवह
शास्त्रश्रवणादिमिर्विनिश्चयंगच्छति ॥ तेन तेन स्याहुः ॥ प्रायेणेति ॥ ११ ॥ १२ ॥

श्री
भाग०
टी०
५

हे सभ्य साधो अस्मिन्युगे कलौ अल्पायुषो जनाः तत्रापि मंदा अलसाः तत्रापि सुमंदमतयः तत्रापि मंदभाग्याः तत्रापि
उपद्रुताः ॥ तत्रापि उपद्रुता रोगादिभिः ननु बहूनि शास्त्राणि श्रवणीयानि तावंत्येव फलानि किं द्विरीयादृशः ॥ भूरीणि कर्मा
णि अनुष्ठेयानि येषु तानि विभागशः यथावच्छ्रुतानि यत एवमतो हे साधो अत्र यत्सारं येनात्मा बुद्धिः संप्रसीदति सम्यक्प
सन्ना भवति तत्समुद्धृत्य मनीषया तज्ज्ञानाधिकारिणां पंचभिः भद्राय कल्याणाय भूतानामाशीर्वादः भगवान्निरतिशयैश्वर्यादिगु
णः सात्वतां यदूनां पतिः भगवान् यस्य विधानार्थं तेन ज्ञानादिना विषयतः क्षेमाय लोकानां स्वार्थे सुताख्य
सर्वा यस्मादिवत ॥ तस्य वसुदेवस्य भार्यायां देवक्यां जातः इति भवति ॥ तेषां पतिः पालकः यस्माद्विशेषस्य
चिकीर्षया हेतुना देवस्य भार्यायां देवक्यां जातः ॥ श्रीगर्हिणा ननु ततो वर्णयितुमर्हसि यस्यावतारो
भूतानां क्षेमाय पालनाय भवाय समृद्धये ॥११॥ तस्य भावमनुवर्णयतः तद्यशः श्रवणोत्सुका
देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया ॥ तन्नः शुश्रूषमाणानामर्हस्यंगानुवर्णितुं ॥१२॥ य
स्यावतारो भूतानां क्षेमाय च भवाय च ॥१३॥ आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ॥ ततः स
द्यो विमुच्येत यद्बिभेति स्वयं भयं ॥१४॥ यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः ॥ सद्यः पुनंत्युप
स्पृष्टाः स्वर्धुन्यापोनुसेवया ॥१५॥ को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः ॥ शुद्धिकामो न शृ
णुयाद्यशः कलिमलापहं ॥१६॥ तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः ॥ ब्रूहि नः श्रद्दधा
नानां लीलया दधतः कलाः ॥१७॥ अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः ॥ लीला विदध
तः स्वैरमीश्वरस्यात्ममायया ॥१८॥
मा विष्णुर्वेत्ति श्रावयन्निति त्रिभिः ॥१२॥ संसृतिमापन्नः प्राप्तः विवशोऽपि यतः संसृतेः मुच्यते ततः य
यतो भयमपि स्वयं बिभेति ॥ किं च यत्पादसंश्रया एव मुनयः प्रशमायनाः ॥ प्रशम एव अयनमाश्रयो येषां
वा येषां ते मुनयः उपस्पृष्टाः सन्निधिमात्रेणाश्रिताः सद्यः पुनंति स्वर्धुनी गंगा तस्या आपः तु सेवया ति
ष्ठंतः न तु सद्य एव तिष्ठति अतस्तत्संबंधतः पुनंत्यापि स्वर्धुन्याप अनुसेवया पुनंति तस्य यशः इति भुवनानां पुण्यकर्म
णः पुण्यश्लोकैः ईड्यानि स्तुत्यानि कर्माणि यस्य तस्य यशः ॥ अवतारान्तरेषु तत्तदुदाराणि महांति विश
दृष्टानि सूरिभिः नारदादिभिः कलावतारान् दधतः ॥ अथेति ॥ अवतारान्तरेष्ववतारकथाः ।
ईश्वरस्य तत्तद्देवतारे ॥ तदा अन्याः कथाः स्वैरं लीलाः कुर्वतः ॥१८॥ ८
५

मत्स्याद्यवताराः १

श्रीकृष्णावतारप्रयोजनं प्रथमे नैव तस्य रितप्रश्नोपि जातरवेति ज्ञातव्यम् १

एवमौत्सुक्येनाप्युक्त्वापि तच्चरितान्येव श्रोतुमिच्छंतः तत्रात्मनः स्वभावमावेदयंति ॥ वयंत्विति ॥१९॥
योगयागादिषु तृप्ताः स्मः उत्तमश्लोकेति तेषां यशसा तमः नश्यति श्लोको यशो यस्य तस्य विक्रमे त
विशेषेण तृप्यामः ॥ अलमिति ॥ न मन्यामहे ॥ तत्र हेतुः ॥ यद्विक्रमं शृण्वतां रसज्ञानां स्वादु एव तत्र यथा पिबंतो न तृप्यंत स्वादु
वेति तथा स्वाद्वपि न ॥ गूढमर्त्यः ॥ दैवात् फलेषु बुद्धिर्भवति ॥ उदकादिभिः इत्युक्तं सामान्येन वा अधुवि
शेषाभावाद्वा ॥ न त्वत्र एवं तामिसानेन श्रोत्रस्यास्वादस्य प्रतिक्षणं भिन्नत्वाद्मान्यमिसानेन वाक्तान
तः सर्वत्र अतिरिक्तं कृत्वा ॥ स्वादु महत्वं वृद्धमात्रस्याभावेन तर्पितं निराकरोतीति ॥ पदे पदे प्रतिक्षणं स्वादु
तो विस्वादु स्त्र्यतः श्रीकृष्णचरितानि कथयेत्याशयेनाहुः ॥ कृतवानिति अतिमर्त्यानि मर्त्यानतिक्रा

वयं तु न वितृप्याम उत्तमश्लोकविक्रमे ॥ यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥१९॥
कृतवान् किल वीर्याणि सह रामेण केशवः ॥ अतिमर्त्यानि भगवान् गूढः कपटमानवः ॥
२०॥ कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयं ॥ आसीना दीर्घसत्रेण कथायां सक्षणा हरेः ॥
२१॥ त्वं नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षतां ॥ कलिं सत्त्वहरं पुंसां कर्णधार इवार्णवं ॥२२॥
ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि ॥ स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः ॥२३॥
इति श्रीभागवते प्रथमस्कंधे नैमिषीयोपाख्याने प्रथमोऽध्यायः ॥१॥
न तु यज्ञानाध्ययनादिव्यग्राणां कृतप
तानिसौ वर्हणोद्भारणादीनि मनुष्येषु संभावितानीत्यर्थः ॥ न तु यज्ञ नाध्ययनादिव्यग्राणां कृतप
वश्रवणे ब्रह्माणः स्यात् सूततश्राहुः कलिमागतं ज्ञात्वा तद्भिया श्रीविष्णुपदेगंतु कामाः दीर्घसत्रे
णानिमिषक्षेत्रे आसीना हरेः कथायां सक्षणाः कृतावसराः ॥२१॥ सूतं स्तुवंति यत्र हृशं न सीयते लोकमपादि
तमिति श्रमि वेदांतं वांछंति ॥२२॥ कलिं निस्तर्तुमिच्छूनां श्रुतौ वाति तीर्षतां कर्णधारो नाविक इव त्वं
नः प्रश्नांतरं ब्रूहीति ॥ धर्मस्य वर्मणि कवचवद्रक्षके स्वां काष्ठां मर्यादां स्वरूपमित्यर्थः ॥ ब्रह्मण्ये हे
तः स्वधामोपगते धर्मज्ञानादिभिः सह कं शरणं गतः ॥२३॥ इति श्रीभावार्थदीपिकायां प्रथमस्कंधे प्रथमोऽध्यायः

श्री
भाग०
टी०
८

तदेवं प्रथमेध्याये वृहत्प्रश्नाः मुनिभिः कृताः ॥ द्वितीये तत्संक्षेपतः वक्तव्याण्याह तेषु च ॥ विप्राणामिति
एवं तैः सम्यक् प्रश्नैः सम्यक् हृष्टः रोमहर्षणस्य पुत्रः उग्रश्रवाः तेषां वचः प्रतिपूज्य सत्कृत्य प्रवक्तुमु
पचक्रान्तवान प्रवक्तव्ये तत्रादौ क्रमेण गुरुदेवतानमस्कारं इति तत्र माह त्रिभिः ॥१॥ तत्र स्वगुरोः श्रीशुकदेवस्य
सर्वतन्मयत्वेनैव ध्यायन्नाह ॥ यं प्रव्रजन्तं संन्यासार्थं गच्छन्तं अनुपेतं उपनयनपर्यन्तेन उपनयनादियार्थं प्रत्युपास
नेयत्वादिकेनाप्यनुपेतेन कृतकर्म कावि नास्तीत्यर्थः ॥ तत्र हेतुः ॥ अपेतकृत्यं लौकिककर्मरहितं अग्र
वर्तमानं नैष्ठिकत्वात् ॥ द्वैपायनः श्रीव्यासदेवः विरहकातरो भीतः पुत्रेति सुतेन कृतेनाह्वाव
आहूतवान ॥ दूराद्दाह्वानेन तु तेषां तन्मयतया सर्वभूतहृदयं तदा तन्मयतया श्रीशुकदेवरूपतया तरवोभिनेदुः

व्यास उवाच ॥ इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः ॥ प्रतिपूज्य वचस्तेषां प्रवक्तुमुप
चक्रमे ॥ १ ॥ सूत उवाच ॥ यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव
पुत्रेति तन्मयतया तरवोभिनेदुः सर्वभूतहृदयं मुनिमानतोस्मि ॥ २ ॥ यः स्वानुभावम
खिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोन्धं ॥ संसारिणां करुणयाह पुराण
गुह्यं तं व्यासमूनुमुपयामि गुरुं मुनीनां ॥ ३ ॥

सर्वभूत

हृदः सर्वतन्मयत्वेन तं तः पितः स्वेच्छानुवृत्तप्रतिध्वनिरूपेण प्रत्युत्तरं दत्तवानित्यर्थः ॥ तं मुनि
मानतोस्मि तन्मयत्वेनापवादत्वादविशेषत्वात्सर्वभूतानां हृदयानि अन्तः प्रविश्य योगबलेन प्रविशतीति सर्व
भूतहृदयः तं ॥ २ ॥ कृपानुतापदर्शयन्नाह ॥ यइति ॥ अंधं गाढं तमः संसारत्तदपि तितीर्षतां प्राणि
नामध्यात्मदीपवत्प्रकाशकं ॥ तत्र तादृशविशेषणानि स्वः निजः ॥ असाधारणः अनुभावः प्रभावो यस्य
तत्स्वानुभावं अखिलश्रुतीनां सारं एकं अद्वितीयं ॥ अनुपममित्यर्थः ॥ अत्मा तु कार्यकारणसंघात
अधिष्ठानवदिमानयात्मनस्तस्याध्यात्मतत्सदृशी पंसात्वात्प्रकाशकं स्वपयामि शरणं व्रजामि ॥ ३ ॥

८

जयत्यनेन संसारमिति जयो ग्रंथः ॥ तमुदीरयेदिति तत्त्वं तद्व्योदीरयन् सुमामौगालिकानुवाशितप
तितेषां वचः प्रतिपूज्य इति पठकं तमस्तु तिपूजनकं करोति ॥४॥ हे मुनयः साधु पृष्टोयाभवतित्तदंदेश
ः यतो लोकानां मंगलमेतत् ॥ यतः श्रीकृष्णविषयः संप्रश्नः कृतः सर्वशास्त्रार्थसारोद्धारप्रश्नः ।
स्यापि कृष्णसंपर्यवसानादेव सुकृत ॥ तत्र यत्प्रथमं पृष्टं सर्वशास्त्रसारमैकांतिकं श्रेयो ब्रूहीति तत्रोत्तरमाह सवै
पुंसामिति ॥ अयमर्थः ॥ धर्मो द्विविधः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च तत्र यः स्वर्गाद्यर्थः स प्रवृत्ति
लक्षणः सोऽपरः यतस्तु धर्मात् अधोक्षजे शादिलक्षणा भक्तिर्भवति स परो धर्मः ॥ स एवैकांतिकश्रेय इ
तिकथंभूतामहैतुकी हेतुः ॥ फलानुसंधानं तद्रहिता अप्रतिहता विघ्नैरनभिभूता ॥६॥ ननु तमे
वात्मानं वेदानुवचनेन ब्राह्मणा विविदिषंति ॥ यज्ञेन दानेन तपसा नाशकेनेत्यादि श्रुतिभ्यो धर्मस्य

ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमं ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ४
मुनयः साधु पृष्टोऽहं भवद्भिर्लोकमंगलं ॥ यत्कृतः कृष्णसंप्रश्नो येनात्मा सुप्रसीदति
५ ॥ स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ॥ अहैतुक्यप्रतिहता ययात्मा संप्रसीदति
६ ॥ वासुदेवे भगवति भक्तियोगः प्रयोजितः ॥ जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकं
७ ॥ धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः ॥ नोत्पादयेद्यदि रतिं श्रम एव हि के
वलं ॥ ८ ॥

ज्ञानं च प्रसिद्धं तत्कुतो भक्तिहेतुकमस्यास्तेनैव भक्तिद्वारेणाह ॥ वासुदेव इति अहैतुकं शु
ष्कतर्काद्यगोचरं औपनिषदं चेत्यर्थः ॥ ७ ॥ अतिरेकमाह धर्म इति यो धर्म इति प्रसिद्धः स यदि विष्वक्से
नकथासु रतिं नोत्पादयेत्तर्हि स्वनुष्ठितोऽपि श्रम एव ॥ ननु मोक्षार्थत्वाभावेऽपि धर्मस्य अपवर्गस्य
वश्यंभावात् ॥ केवलं हि फलशून्य इत्यर्थः नन्वस्ति तत्रापि स्वर्गादिफलं विनाशकारणं केवलं तत्ति लोकिकरोति
तद्धि न युक्तं नश्वरफलमित्यर्थः ॥ साधयति तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लो
कः क्षीयते ॥ क्षीयत इति नश्वरत्वं श्रूयते इति नयप्रतिपादनात् ॥ ८ ॥
ननु तस्यांहैव ज्ञानमोक्षयाजिनः ॥ स्फुरन्नेवमित्यादि श्रुतेः नन्नफलमस्त्वेवेति सर्वमित्याशंक्याह धर्मस्येतेन ॥ २

नदेवेश्रीहरिभक्तिहारातदितः वैराग्यानमत्ज्ञानवर्धनैः परोधर्मइत्युक्तं तस्याभक्तेरितरस्मिन्नर्मास्ति न॥
वस्तुनि इत्याहुः पुरुषफलमेवेवैराग्य पुरुषेनयर्मनेधर्मस्यार्थः फलं तस्य च कामः फलं तस्य चेन्द्रियप्रीतिः त स
प्रीतेश्च पुनरपि धर्मादिपरम्परेत्याशङ्क्याह ॥ धर्मार्थकामसुखं किमर्थं तस्यातइत्यादिना निरा
करोतिधर्मस्येति ॥ द्वाभ्यां ॥ आपवर्ग्यस्यापवर्गपर्यन्तस्य अर्थाय फलत्वायार्थो नोपकल्पते
योग्यो न भवति ॥ तथार्थस्यापवर्ग्यं तथाधर्मो अभिचारिणः कामो लाभाय फलत्वाय नहि स्मृतो मुनिभिः
कामस्य विषयभोगस्य इन्द्रियप्रीतिर्लाभः फलं न भवति किं तु यावता जीवेत ॥ तावानेव कामस्य ला
भः जीवनपर्याप्तकामः सेव्य इत्यर्थः ॥ यदुक्तं ॥ आहारार्थं कर्म कुर्यादनिंद्यं कुर्यादाहारं प्राणसंधारणा
र्थं ॥ प्राणाः संधार्यास्तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन भूयो न दुःखं इति ॥ जीवस्य जीवनस्य च पु
नः कर्मानुष्ठानद्वारा कर्मभिर्य इह स्वर्गादिः सोऽर्थो न भवति ॥ किं तु तत्त्वजिज्ञासैवेति ॥ न केवलं तत्त्वजिज्ञासा

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते ॥ नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः
॥ ९ ॥ कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता ॥ जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह क
र्मभिः ॥ १० ॥ वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं ॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्य
ते ॥ ११ ॥ तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया ॥ पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतगृही
तया ॥ १२ ॥ अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः ॥ स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणं ॥ ए

सा नाम धर्मजिज्ञासैव ॥ धर्म एव हि तत्त्वमिति केचित्तत्राह ॥ तत्त्वविदस्तु तदेव तत्त्वं वदन्ति किं तत् ज्ञान
मद्वयमिति ॥ क्षणिकविज्ञानपक्षं निवर्तयति ॥ ननु तत्त्वविदोऽपि विगीतवचना एव नैवं तस्यैव
तत्त्वस्य नामान्तराण्यभिधानान्तराण्याह ॥ औपनिषदैर्ब्रह्मेति हैरण्यगर्भैः परमात्मेति सात्वतैर्भगवानिति शब्द्यते अभि
धीयते ॥ ४ ॥ ११ ॥ तच्च तत्त्वं स्वपरिकरया भक्त्यैव प्राप्यत इत्याह तच्छ्रद्दधाना इति ॥ ज्ञानवैराग्ययुक्तया भक्त्या ज्ञानानु
परोक्षं तत्त्वं तद्ब्रह्मात्मनि हृदि ते प्रपश्यन्ति किं तत् आत्मानं परमात्मानं श्रुतगृहीतया वेदान्तश्रवणेन गृही
तया प्राप्तया पश्यन्ति ॥ ननु हि हरितोषणं धर्मस्य फलमुक्तिः नार्थकामादि कर्मेतीममर्थमुपपादयन्नुपसंहरति
अत इति ॥ १३ ॥ हे द्विजश्रेष्ठाः हरितोषणं हरेस्तोषणमेव संसिद्धिः फलं ॥ यस्मादेवं भक्तिहीनो धर्मः केवलं
श्रम एव ॥ तस्माद्भक्तिप्रधान एव धर्मोऽनुष्ठेय इत्याह ॥ तस्मादिति ॥ ए ॥

एकेन एकाग्रेण मनसा तस्माद्भक्तिरहितो धर्मः केवलं श्रम इति प्रपंचितं ॥ इदानीं तु भक्तेः मुक्तिफलत्वं प्र-
पंचयति ॥१५॥ यदनुध्या अनुध्यानं सैवासिर्विवेकखड्गः तेन युक्ताः विवेकिनः ग्रंथिमहंकारं निबध्नाति
यत्कर्म तत् छिंदंति तस्य कथायां रतिं प्रीतिं को न कुर्यात् ॥१५॥ ननु सत्यमेवैकमेव निर्मलीनामीदृ-
शी कथारतिस्तु पापिनां स्यात् चित्तेनात्मघाते किं कुर्मः तत्राह ॥ शुश्रूषोरिति ॥ पुण्यतीर्थनिषेवणादि-
भिर्निष्पापस्य महत्सेवाभ्यासात् ॥ तथा च तत्कर्मशुद्धान्तः श्रवणेच्छा ततो रुचिः स्यादित्यर्थः ॥१६॥ त-
तः श्रवणेच्छा तत्त्वमिति ॥ पुण्ये श्रवणकीर्तने यस्य सः स तासां हृत् हितकारी हृदिस्थानि अभद्राणि का-
मादिवासनात्मानि ॥ ध्वंसयति हृदयस्थः छिनत्तीत्यर्थः ॥१७॥ ततश्च नष्टप्रायेष्विति सर्वाभद्रना-

तस्मादेकेन मनसा भगवान्सात्वतांपतिः ॥ श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा
१४ ॥ यदनुध्यासिना युक्ताः कर्मग्रंथिनिबंधनं ॥ छिंदंति कोविदास्तस्य को न कुर्यात्कथा-
रतिं ॥१५॥ शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः ॥ स्यान्महत्सेवया विप्राः पुण्यतीर्थ-
निषेवणात् ॥१६॥ शृण्वतां स्वकथाः कृष्णः पुण्यश्रवणकीर्तनः ॥ हृद्यंतःस्थो ह्यभद्राणि वि-
धुनोति सुहृत्सतां ॥१७॥ नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया ॥ भगवत्युत्तमश्लोके भक्ति-
र्भवति नैष्ठिकी ॥१८॥ तदा रजस्तमोभावाः कामलोभादयश्च ये ॥ चेत एतैरनाविद्धं स्थितं स-
त्त्वे प्रसीदति ॥१९॥ एवं प्रसन्नमनसो भगवद्भक्तियोगतः ॥ भगवत्तत्त्वविज्ञानं मुक्तसंगस्य जा-
यते ॥२०॥ भिद्यते हृदयग्रंथिः छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि दृष्ट एवात्मनी-
श्वरे ॥२१॥

शास्त्रज्ञानोत्तरकालत्वात् प्रायग्रहणं भागवतानां श्रीभागवतस्य वा सेवया नैष्ठिकी निश्चलावि-
हेतुकाभावात् रजस्तमश्च ये च तत्स्वभावाः भावाः कामादयः तैरनाविद्धं सत्त्वे स्थितं प्रसीदतीत्युपशाम्य-
तीति भगवद्भक्तियोगतः प्रसन्नमनसः मुक्तसंगस्य ज्ञानं तत्फलं आह भिद्यत इति ॥२०॥ हृदयमेव ग्रंथिः चि-
ज्जडग्रंथिरहंकारः ॥ अत एव सर्वसंशयाः असंभावनादिरूपाः कर्माणि अनारब्धफलानि निःशेषाणि आत्मनि ईश्वर

च मले ईश्वरे दृष्टे एवकारेण ज्ञानान्तरमेवेति दर्शयति ॥२१

श्री भाग टी ८

अत्र सदाचारं दर्शयन्नुपसंहरति ॥ आत्मनः प्रसादनीं मनःशोधनीं वासुदेवे भक्तिं कुर्वन्तीति मनःशोधनी
यविशेषोपदर्शितः ॥ २२ ॥ ननु देवा बहव सन्ति ब्रह्मादीनां त्रयाणामेव कालेऽपि वासुदेवस्यैव किमाह
सत्त्वमिति ॥ इह एक एव परः पुमान् ॥ अस्य विश्वस्य स्थित्यादये स्थित्याद्यर्थं संज्ञाः धत्ते
हरिविरिञ्चिहरेति विरञ्चिरिति वृक्षस्येव संधिरार्षः ॥ तत्र तेषां मध्ये श्रेयांसि शुभफलानि सत्त्वतनोर्वासुदेवात्स्युः ॥ २३
उपाधिवैशिष्ट्यात् फलवैशिष्ट्यं सदृष्टान्तमाह ॥ पार्थिवात् प्रवृत्तिप्रकाशरहितात् ॥ दारुणः काष्ठा
द्धूमः प्रवृत्तिस्वभावस्त्रयीमयो वेदोक्तकर्मप्रवर्तकः ॥ ईषत्प्रकाशमात्रं ॥ तस्मादप्यग्निस्त्रयीमयः सा
क्षात्साधनत्वात् ॥ एवं तमसः सकाशात् रजो ब्रह्मदर्शनं प्रकाशकत्वात् सत्त्वं तु साक्षात्प्रकाशकत्वात्

अतो वै कवयो नित्यं भक्तिं परमया मुदा ॥ वासुदेवे भगवति कुर्वन्त्यात्मप्रसादनीं ॥ २२ ॥ सत्त्वं
रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ॥ स्थित्यादये हरिविरिञ्चिहरे
ति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥ २३ ॥ पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्र
यीमयः ॥ तमसस्तु रजस्तस्मात्सत्त्वं यद्ब्रह्मदर्शनं ॥ २४ ॥ भेजिरे मुनयोऽथाग्रे भगवन्तमधोक्षजं
सत्त्वं विशुद्धं क्षेमाय कल्पन्ते येऽनु तानिह ॥ २५ ॥ मुमुक्षवो घोररूपान्हित्वा भूतपतीनथ ॥ ना
रायणकलाः शान्ता भजन्ति ह्यनसूयवः ॥ २६ ॥ रजस्तमःप्रकृतयः समशीला भजन्ति वै ॥ पि
तृभूतप्रजेशादीन्श्रियैश्वर्यप्रजेप्सवः ॥ २७ ॥

रजसः सकाशात्तु तमसः सोपाधिकत्वान्न वेदेन तेन किंचित् तु ब्रह्मदर्शनं तु सत्त्वमात्रं त्रिमात्राप्रकाशकं न तु सर्वव्याप्र
काशकत्वं विशेषकत्वात् ॥ यस्य तु न तस्मात्तु ब्रह्मदर्शनं तत्र तमस्तु गुणोपाधीनां ब्रह्मादीनामपि यथा
वैशिष्ट्यमिति भावः ॥ २४ ॥ वासुदेवभक्तौ शिष्टाचारं प्रमाणयति भेजिरे इति ॥ अथ यानि ह तानि
ह विशुद्धं सत्त्वं मूर्तिं भगवन्तमधोक्षजं ॥ अतो ये तानेव अनुवर्तन्ते इह संसारे ते क्षेमाय कल्पन्ते ॥ २५ ॥ न त्वन्यभाव
यके विशुद्धेनोऽप्युपन्ते ॥ तत्र मुमुक्षवस्तमानं भजन्ति किं तर्हि केवलमाव व्यावाह ॥ मुमुक्षव इति हित्वा भू
तपतीनिति ॥ पितृप्रजेशादीनामपत्योपासनं यद्वा देवतान्तराणि दकाः सतः ॥ २६ ॥ रजस्तमसी
प्रकृतिः स्वभावो येषां ते सत्त्वप्रधानवादिभिः समशीला यथा तैः श्रियैश्वर्यप्रजेप्सवः पितॄनिति

॥ १५ ॥ स्कंध ८

मोक्षपरत्वाद्वासुदेवो भजनीय इत्युक्तं सर्वशास्त्रतात्पर्यगोचरत्वादपीत्याह ॥ द्वाभ्यां ॥ वासुदेवः ।
परः तात्पर्यगोचरो येषां ते ननु वेदा मखपरा दृश्यंते इत्याशंक्याह तेऽपि तदाराधनार्थत्वात्तत्परा इत्युक्तं यो
गा योगशास्त्राणि तेषामप्यासनप्राणायामादिक्रियापरत्वमाशंक्याह तासामपि तत्परत्वमुपायत्वात्तत्परत
मुक्तं ॥२८॥ ज्ञानं ज्ञानशास्त्रं तत्र तु वचनं ज्ञानपरमेवेत्याशंक्य ज्ञानस्यापि तत्परत्वमुक्तं तपोऽत्र ज्ञानं धर्मो धर्म
शास्त्रं दानव्रतादिविषयं ननु तत्स्वर्गपरमित्याशंक्याह गम्यत इति गतिः ॥ तत्स्वर्गादिफलं सापि तदानन्दां
शत्वात्तत्परैवेत्युक्तं ॥ यद्वा वेद इत्यनेनैवैतन्महत्वान्न ॥ सर्वार्थेष्वपि वासुदेवपरत्वमित्युक्तं ॥ ननु ते
षां नन्वपूर्वैर्योगक्रियादीनां नानात्वात् पालाकादेकपरत्वमित्याशंक्य मायादीनां वासुदेवपरत्वमित्यु
क्तमिति द्रष्टव्यं ॥२९॥ ननु जगत्सर्गप्रवेशनियमनादिविलासयुक्तं वस्तु निरवलिंपविशिष्टं सम

वासुदेवपरा वेदा वासुदेवपरा मखाः ॥ वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥२८
वासुदेवपरं ज्ञानं वासुदेवपरं तपः ॥ वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥२९॥ स ए
वेदं ससर्जाग्रे भगवानात्ममायया ॥ सदसद्रूपया चासौ गुणमय्यागुणो विभुः ॥ ३०॥ तया
विलसितेष्वेषु गुणेषु गुणवानिव ॥ अन्तःप्रविष्ट आभाति विज्ञानेन विजृम्भितः ॥३१॥
यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु ॥ नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ॥३२

त्वयो दृश्यते ॥ कथं वासुदेवपरत्वं सर्वस्येत्याह स एवेति चतुर्भिः ॥ एतेन ब्रह्मादिकस्य कर्मादि तत्र दृष्टा
त्वा इहेति ॥ अग्रे सृष्टेः सदसद्रूपया कार्यकारणात्मिकया गुणमय्या अगुणः ॥ स्वतो निर्गुणोऽपि सन्नित्य
र्थः ॥ भगवतो जगत्कारणत्वमुक्त्वा नियमनलक्षणां लीलामाह तयेति ॥ ३०॥ विलसितेषु तेषु गु
णेषु कार्येषु अंतः प्रविष्टः सन् गुणवानिव आभाति विज्ञानेन चैतन्येन गुणाभिमानवानिव न तु वस्तुतस्त
था यतो विज्ञानेन विजृम्भितोऽपि जितः ॥ बहुरूपतलीलामाह ॥ यथेति ॥ ३१॥ स्वयोनिषु स्वो
त्पत्तिस्थानेषु भवितः ॥ विश्वात्मा भूतान्यसंख्यानि तेषु प्राणिषु नानेव भाति तथापि वस्तुतो नैव
नानात्वमुच्यते ॥३२॥

ह्येवं हरेरूपेणात्मनो लीलामाह ॥ असौ ह्रीभूतसूक्ष्मात्मभिर्देहेन्द्रियादिभिः यानि गुणमयानि भूतानि तैः स्वनिर्मि
तेषु वस्तुविधेषु इति भोगस्यानात्मीयत्वेन तद्गुणानिति तदनुरूपान् विषयानित्यर्थः ग्रहणं केवलं भजनीयताविति
वतुर्थीवासेयः पालयतीत्याह भावयतीति मायांशेन लोकानिति निष्कारणाल ॥ ३३ ॥ इदानीमस्य जगत्पा
लीलां प्रदर्शयन्नाह ॥ भावयतीति पालयति तत्तत्सत्त्वावतारसाधारणप्रयोजनं विशेषतः कृष्णावता
रस्य के लीलातोऽवतारैर्लोकभावनः लोकक्रीडावित् देवादिषु लीलावतारानुरतः तेष्वनुरक्तः ॥ ३४ ॥ इति श्री
भावार्थदीपिकायां प्रथमे द्वितीयः ॥ अवतारकथायां प्रश्नोत्तरं तृतीयेन तानभिधाय ॥ पुरुषाद्यवतारोऽत्रानन्तरूपाणि
यवर्णनैः । तृतीये ॥ अथाख्यान्ति हरेर्धीमन्नवतारकथाः शुभाः ॥ इति तद्भुतप्रश्नेनावतारानुक्रमि

असौ गुणमयैर्भावैर्भूतसूक्ष्मेन्द्रियादिभिः ॥ स्वनिर्मितेषु निर्विष्टो भुंक्ते भूतेषु तद्गुणान् ॥ ३३
भावयत्येष सत्त्वेन लोकान्वै लोकभावनः ॥ लीलावतारानुरतो देवतिर्यङ्नरादिषु ॥ ३४ ॥ इति
श्रीभागवते महापुराणे प्रथमस्कन्धे द्वितीयोऽध्यायः ॥ सूत उवाच ॥ जगृहे पौरुषं रूपं भगवान्महदादिभिः ॥ सम्भूतं षो
डशकलमादौ लोकसिसृक्षया ॥ १ ॥ यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः ॥ नाभिह्रदा
म्बुजादासीद्ब्रह्मा विश्वसृजां पतिः ॥ २ ॥ यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः ॥ तद्वै भग
वतो रूपं विशुद्धं सत्त्वमूर्जितम् ॥ ३ ॥

ध्यानं ॥ प्रथमं पुरुषावतारमाह जगृहे इति त्रिभिः ॥ महदादिभिर्महदहंकारपंचतन्मात्रैरेकादशेन्द्रि
याणि एवं च महाभूतानीति षोडशकलात्मकं लोकसृष्ट्यर्थमिति ॥ ननु यद्यपि भगवद्विग्रहो नैवंभूतः तथापि वि
राड्जीवान्तर्यामित्वेन भगवतो विराड्रूपेणोपासनार्थमेवमुक्तमिति द्रष्टव्यं कोऽसौ भगवान्निर्विशेषो वा
न विशिष्ट इत्यस्य प्रश्नस्य महाप्रलये शयानस्य विभुत्वेन योगः समाधिः तद्रूपां निद्रां विस्तारयतः
स्वरूपानन्दमनुभवतः ॥ तस्मिन्नन्देवजलेऽस्मात् कारणात् कमलमासीत् ॥ अनन्तरमेकल्पे पौरुषं रूपं जगृहे ॥ २ ॥
कीदृशं रूपं तदाह ॥ यस्येति ॥ न तु कीदृशो विग्रहस्तस्य यो विशिष्टो भेदः ॥ तदाह ॥ तत्तस्य भगव
तो रूपं विशुद्धं ॥ रजस्तमोरहितं सत्त्वं ॥ अतएवोर्जितं निरतिशयेन तत्त्वेन तत्त्वं ॥ योगिनामस्य स्तुतिमाह ॥
३ ॥

शुद्धं शुद्धं नलेस्त्वानाम केचन चक्षुदृष्टेन सहस्रमपरिमितानि यानि पादादीनि तैरद्भुतं सहस्रं मूर्धाद
यो यस्मिंस्तत् ॥ सहस्राणि यानि मौल्यादीनि तैरुल्लसद्भ्राजमानं ॥ एतत्तु रूपस्य नतस्यावतारवदाविर्भा
वतिरोभाववदित्याह ॥ ५ ॥ एतदिति नारायणाख्यं रूपं निधीयतेस्मिन्निति निधानं कार्यावसाने प्रवेश
स्थानमित्यर्थः ॥ बीजमुद्गमस्थानं बीजत्वेपि नान्यबीजवत्तस्य किंत्वव्ययं न केवलमवताराणामेव बी
जं किंतु सर्वेषां प्राणिनामित्याह ॥ यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिः तेन सह नत्कुमाराद्यवतारं चरिते
नाह ॥ स एवेति ॥ २ ॥ कौमारः सर्गः प्राजापत्यो मानवः ॥ इत्यादीनि सर्गविशेषनामानि तेषु यो हंसो हंसपु
जगदे ॥ स एव देवः कौमारं ब्राह्मसर्गमाश्रितः सन् ब्राह्मणो भूत्वा ब्रह्मचर्यं चचार ॥ ६ ॥ प्रथमं द्वितीयं

पश्यंत्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतं ॥ सहस्रमूर्धश्रवणाक्षिनासिकं
सहस्रमौल्यंबरकुंडलोल्लसत् ॥ ४ ॥ एतन्नानावताराणां निधानं बीजमव्ययं ॥ यस्यांशांशे
न सृज्यंते देवतिर्यङ्नरादयः ॥ ५ ॥ स एव प्रथमं देवः कौमारं सर्गमाश्रितः ॥ चचार दुश्च
रं ब्रह्मा ब्रह्मचर्यमखंडितं ॥ ६ ॥ द्वितीयं तु भवायास्य रसातलगतां महीं ॥ उद्धरिष्यन्नुपा
सौकरं दत्त यज्ञेशः सौकरं वपुः ॥ ७ ॥ तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः ॥ तंत्रं सात्वतमाच
ष्ट नैष्कर्म्यं कर्मणां यतः ॥ ८ ॥ तुर्ये धर्मकलासर्गे नरनारायणावृषी ॥ भूत्वात्मोपशमोपे
तमकरोद्दुश्चरं तपः ॥ ९ ॥

यादिशब्दान्निर्दिष्टमात्रापवत्वया ॥ अस्य विश्वस्य भवायोद्भवाय महीमुद्धरिष्यन्निति कर्मोक्तिः ॥ एवं
सर्वत्रावतारेष्वकर्मवाक्रमितव्यमित्युपेयं ॥ नारदावतारमाह तृतीयमिति ॥ ७ ॥ ऋषिसर्गमुपेत्य सदे
देवर्षित्वमुपेत्य स्पष्टः ॥ सात्वतं वैष्णवतंत्रं पांचरात्रागममाचष्ट उक्तवान् ॥ यतस्तंत्रान्निर्गतं कर्मबंध
हेतुकमप्यफलानि कर्माणि नैष्कर्म्याय भवंति कर्मणां मोक्षसाधकत्वं यतो भवति तदाचष्टेत्यर्थः ॥ ८
तुर्येवतारे धर्मस्यांशः ॥ कला भार्या तस्यां सर्गे ॥ अधावाएषमात्मनो यदुपशमोस्ति निश्चलतः ॥ तस्मात्सर्गे अव
बीभत्सादासेकावताराननादर्शयति ॥ कपिलावतारमाह ॥ पंचमइति ॥ ९ ॥

आसुरयेन नाम्ने ब्राह्मणाय तत्वानां ग्रामस्य समूहस्य निर्णयो यस्मिंस्तत्सांख्यं || दत्तात्रेयावतारमाह |
षष्ठ इति ||१०|| अत्रेरपत्यत्वं तेनैव वृतः सन् प्राप्तः अत्रेरपत्यमसि कोऽतस्तमाह || तत्विति || वृत्तस्य मा
तानसूयया प्राप्तोऽनसूयया वा मत्स्वरूपाय स्वामिवेतामात्मेवाप यस्य वृत्वानिति दीर्घदृष्टिमङ्गर्व तिसर्थः ||
आन्वीक्षिकीमात्मविद्यां प्रह्लादादिभ्य ऊचे ||११|| यज्ञावतारमाह || तत इति || स यज्ञो यामाद्यैः स्वसुतैश्च
यामा नाम देवास्तदाद्यैः सह स्वायंभुवेनामन्वन्तरं पालितवान् || ततः स्वयमिंद्रोऽभूदित्यर्थः
१२ || ऋषभावतारमाह || अष्टमे इति || सर्वाश्रमनमस्कृतं मार्गमाश्रमपारमहंस्यं वर्त्म धीराणां दर्शयन् ब्राह्म
णायीप्रवृत्तस्य भोजनातः ||१३|| पार्थिवं वपुः राजदेहं पृथुरूपं प्राकृतानेतरे इत्यादि पार्थिवं यः औषधीरिमा

पंचमः कपिलो नाम सिद्धेशः कालविप्लुतं || प्रोवाचासुरये सांख्यं तत्वग्रामविनिर्ण
यं ||१०|| षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया || आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य
ऊचिवान् ||११|| ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत || स यामाद्यैः सुरगणैरपात्स्वा
यंभुवांतरं ||१२|| अष्टमे मेरुदेव्यां च नाभेर्जात उरुक्रमः || दर्शयन्वर्त्म धीराणां सर्वाश्रम
नमस्कृतं ||१३|| ऋषिभिः प्रार्थितो भेजे नवमं पार्थिवं वपुः || दुग्धेमामोषधीर्विप्रास्तेनाय
स उशत्तमः ||१४|| रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे || नाव्यारोप्य महीमय्यामपाद्वैवस्वतं
मनुं ||१५|| सुरासुराणामुदधिं मथ्नतां मंदराचलं || दध्रे कमठरूपेण पृष्ठ एकादशे विभुः ||१६||

पल्लवलोऽइमां पृथिवी || सर्वाणि वस्तूनि दुग्धवान् ... हे विप्राः तेन हेतुना अयं उशत्तमः |
सर्वतोऽभिकाम्यतमः कमनीयतमः वशकान्ताविति स्मात् ||१४|| मत्स्यावतारमाह || रूपमिति || चाक्षुषमन्व
न्तरे य उदधिसंप्लवः || तस्मिन्मत्स्यरूपं जगृहे महीमय्यां नावि आरोप्य || केन विकोऽनके नमस्कृतं
यथा ... || महीमय्यां नावि नौकारूपायां मह्यामित्यर्थः ||
पालितवान् || वैवस्वतमिति भाविनी संज्ञा ||१५|| कूर्मावतारमाह इति || सुरा इति कमठः कूर्मः
न इह एकादशावतारे विभुर्मंदरं दधे दधार ||१६||

धान्वंतरावतारमाह ॥ धान्वंतरमिति ॥ धान्वंतरं धान्वंतरिरूपं द्वादशमं आदिश्य योगमन्वार्थः ॥ त्रयोदशमेव रूपं मोहिनीरूपं दर्शयति ॥ अपाययदिति सुरानमृतं अपाययत् अन्यान् असुरान् मोहिन्या स्त्रिया रूपेण मोहयन् ॥ धान्वंतरिरूपेणामृतमानीय मोहिन्यापाययदित्यर्थः ॥ १७ ॥ नृसिंहावतारमाह ॥ चतुर्दशमिति ॥ नारसिंहं रूपं बिभ्रत् ॥ एरकां निर्ग्रंथितृणं ॥ १८ ॥ वामनावतारमाह ॥ पंचदशमिति ॥ त्रिविष्टपं देवाय दत्तमिति वामनं रूपं कृत्वा अध्वरमगात् ॥ प्रत्यादित्सुः तस्मादाक्षिप्य ग्रहीतुमिच्छुः ॥ १९ ॥ परशुरामावतारमाह ॥ अवतार इति ॥ त्रिगुणं यथा भवति तथा त्रिःसप्तकृत्वः ॥ सप्तवारानेकविंशतिवारानित्यर्थः ॥ २० ॥

धान्वंतरं द्वादशमं त्रयोदशममेव च ॥ अपाययत्सुरानन्यान्मोहिन्या मोहयन्स्त्रिया ॥ १७
चतुर्दशं नारसिंहं बिभ्रद्दैत्येंद्रमूर्जितं ॥ ददार करजैरूरावेरकां कटकृद्यथा ॥ १८ ॥ पंच
दशं वामनकं कृत्वागादध्वरं बलेः ॥ पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपं ॥ १९ ॥ अ
वतारे षोडशमे पश्यन्ब्रह्मद्रुहो नृपान् ॥ त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं ॥ २०
ततः सप्तदशे जातः सत्यवत्यां पराशरात् ॥ चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥ २१
नरदेवत्वमापन्नः सुरकार्यचिकीर्षया ॥ समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परं
२२ ॥ एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ॥ रामकृष्णाविति भुवो भगवानहरद्भ
रं ॥ २३ ॥ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां ॥ बुद्धो नाम्नाजिनसुतः कीकटेषु भ
विष्यति ॥ २४ ॥ अथासौ युगसंध्यायां दस्युप्रायेषु राजसु ॥ जनिता विष्णुयशसो नाम्ना

व्यासावतारमाह ॥ ततइति ॥ अल्पमेधसोऽल्पप्रज्ञान् पुंसो दृष्ट्वा वेदवृक्षस्य शाखाश्चक्रे ॥ २१ ॥ रामा
वतारमाह ॥ नरदेवत्वमापन्नो रघुरूपेण ग्रामः सन् ॥ २२ ॥ अतः परमष्टादशे रामकृष्णावतारमाह ॥ विंशति
तम इति बलकृष्णौ कालेनाविर्भूतौ बुद्धावतारमाह ततः कलाविति वनजन्मनी प्राप्य ॥ २३ ॥ अजनसुतः जिनसु
त इति पाठे जिनः स एव कीकटे मध्यगयाप्रदेशे गयायां ॥ २४ ॥ कल्क्यवतारमाह ॥ युगसंध्यायां कलेरंते ॥
विष्णुयशसो ब्राह्मणात्कलिः शाश्वत निष्पन्ने ॥ अत एकविंशतिप्रधानानाह अवतारा इति ॥ २५ ॥

श्रीः
भाग॰
टी॰
१०

असंख्येयत्वे दृष्टांतः ॥ यथेति ॥ अविदासिनः उपक्षयशून्यात् ॥ सरसः सकाशात्
कुल्याः क्षुद्रप्रवाहाः विनिर्गताः ॥ सहस्रश इति ॥ २६ ॥ तत्र विशेषमाह ॥ एते चेति ॥ २७ ॥ पुंसः परमेश्व
रस्य केचिदंशाः केचित्कला विभूतयः तत्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वशक्तिमत्वेपि ॥ यथोप
योगमेव ज्ञानक्रियाशक्त्याविष्करणात् कुमारनारदादिष्वाधिकारिकेषु यथायोगमंशकलावेशः ॥ पृ
थ्वादिषु शक्त्यावेशः कृष्णस्तु भगवान् साक्षान्नारायण एवाविष्कृतसर्वशक्तिमत्वात् सर्वेषां प्रयोजन
माह ॥ इंद्रारयो दैत्यास्तैर्व्याकुलं लोकं मृडयंति सुखयंति एतत्कीर्तनफलमाह ॥ जन्मे
ति ॥ २८ ॥ गुह्यं मनोरहस्येन प्रयतः शुचिः सन् दुःखग्रामात् संसारान्मुच्यते इति ॥ तत्कथं देह

अवतारा ह्यसंख्येया हरेः सत्वनिधेर्द्विजाः ॥ यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः
२६ ॥ ऋषयो मनवो देवा मनुपुत्रा महौजसः ॥ कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥ २७
एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयं ॥ इंद्रारिव्याकुलं लोकं मृडयंति युगे युगे ॥ २८ पदे २
जन्म गुह्यं भगवतो य एतत्प्रयतो नरः ॥ सायं प्रातर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यते ॥ २९
एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः ॥ मायागुणैर्विरचितं महदादिभिरात्मनि ॥ ३० ॥ य
थानभसि मेघौघो रेणुर्वा पार्थिवोनिले ॥ तथा द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ॥ ३१ ॥

हयसंबंधे सति ॥ नहि शक्तिविलासांशकादेः संबंधो भगवतो मायायोस्याविद्याविलसितत्वादेतत्कु
वणादि जनितविषया ॥ तन्निइत्थं तित्पदयतेऽस्माशयेनाह ॥ एतदिति द्वाभ्यां ॥ २९ ॥ अरूपस्य चि
दात्मनः परमात्मनो जीवस्येदं स्थूलरूपं स्थूलशरीरं भगवतो मायागुणैर्महदादिभिर्विरचित
मात्मनि आत्मस्थाने शरीरे कल्पितमित्यर्थः ॥ ३० ॥ कथमविद्यापेक्षयात्मनः स्वरूपवशेन तदध्यासमेतदिति
दृष्टांतमाह ॥ यथा वायोर्नभसि मेघौघो नभस्याकाशे बुद्धिभिरारोपितः यथा वा पार्थि
वो रेणुर्मलिनत्वधूसरत्वादि अनिले एवं द्रष्टर्यात्मनि दृश्यत्वं दृश्यधर्मः स्थूलशरीरमबुद्धिभिरारोपितमित्यर्थः ॥

स्कंध ॥ १ ॥
१०

न्य

अतः स्थूलात् सूक्ष्मात्मकमस्माद्विरूपमात्रो विलक्षणमिश्रनुभवः॥ कथंपुनः तं तत् यदव्यक्तं सत्त्वं तत्त्वे तत्॥ अथ
षड्गुणवृद्धिहीनम् अव्यूढः करचरणादिपरिणामः तथा अपरिणामस्य स्थूलषड्गुणस्यैवेदं हि तेरं चित॥ आ
कारविशेषरहितत्वादकर्मत्वमित्यर्थः॥ एतदेव कुत इत्यत आह अदृष्टाश्रुतवस्तुत्वात्॥ आकारविशेषव
त्त्वाभावात्॥ यच्चाकारविशेषवद्वस्तु तदस्मदादि दृष्टं श्रुतं वा यथा घटादि इदं तु न तथा अतो हि न
स एवेति किं प्रमाणं तत्राह॥ जीवो जीवोपाधिः जीवो जीवेन निर्देशः॥ जीवाजीवविवेकयोरादौ।
जीवोपाधौ लिङ्गदेहे॥ जीवशब्दप्रयोगात् जीवोपाधित्वाकल्पत इत्यर्थः॥ ननु स्थूलस्यैव भोगा
यतनत्वात् जीवोपाधित्वमस्ति किं सूक्ष्मकल्पनयेत्यत आह॥ यद्यस्मात् तस्मात् पुनर्भवः उत्क्रान्त्यादि गतीनां
स्यादीनां तेन विनाऽसम्भवादिति भावः॥ तदेवमुपाधिद्वयमुक्त्वा तदपवादेन जीवस्य ब्रह्मत्वमाह॥ यत्र
यत्र यदेमे स्थूलसूक्ष्मे रूपे स्वसंविदा स्वरूपसम्यग्ज्ञानेन प्रतिषिद्धे भवतः ज्ञानेन प्रतिषिद्धे केनेत्यतम

अतः परं यदव्यक्तमव्यूढगुणबृंहितम्॥ अदृष्टाश्रुतवस्तुत्वात्स जीवो यत्पुनर्भवः॥ ३२॥ यत्रे
मे सदसद्रूपे प्रतिषिद्धे स्वसंविदा॥ अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनं॥ ३३॥ यद्येषोपरता
देवी माया वैशारदी मतिः॥ सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते॥ ३४॥

वदेत्याह॥ अविद्ययात्मनि कृते कल्पिते इति हेतोः॥ तद्ब्रह्मदर्शनं तदा जीवो ब्रह्मैव भवतीत्यर्थः॥ कथं
च तद्दर्शनं बहूनेकस्वरूपेण तथा यावदविद्यमानत्वात् प्रकाशे तत्राविद्यमानत्वात्कथं ब्रह्मत्व
तत्राह॥ यदीति॥ ३४॥ अहं देहोऽयं देह इत्यादि विवेकः प्रमाणं तत्त्वविदोपरितिष्ठत्॥ वैशारदी विशारदः सर्व
ज्ञ ईश्वरः तदीया देवी ईश्वरस्य क्रीडन्ती माया उपरता भवति किं तस्मिन्परतामवेत तत्राह॥
मतिर्विद्या॥ अयं भावः॥ यावदविद्यात्मनावरणं विक्षेपं करोति तावन्नोपरमति॥ यदा तु सर्वं विद्या
रूपेण परिणता तदा सदसद्रूपं जीवोपाधिद्वयं निर्दग्ध्य काष्ठमिवानलः स्वयमेवोपरमेदिति॥ तदा सम्पन्नो
ब्रह्मस्वरूपं प्राप्त एवेति विदुस्तत्त्वज्ञाः॥ किमतो यद्येवं स्वमहिम्नि परमानन्दस्वरूपे महीयते पूज्यते विरा
जते इत्यर्थः॥ यद्यपि जीवस्य जन्मादि मायया एवमत्र स्वरूपापि॥ तन्न संगतं मायिकत्वादात्मन इत्याह॥ एवमिति॥ ३५

दि २

श्री भाग° टी° ॥

अकर्तुः कर्माणि अजनस्य जन्मानि हृत्पतेरंतर्यामिणः तर्हि जीवादीश्वरस्य को विशेषः स्यात्तं स मे
व विशेषमाह ॥ स वा इति ॥ ३६ ॥ षाड्वर्गिकं इंद्रियषड्वर्गविषयं जिघ्रति गृह्णाति देवबोधवद्गृह्णाति ॥ न तु
सज्जते इत्यर्थः कुतः षड्गुणेशः षडिंद्रियनियंता ॥ ३६ ॥ ननु किमीश्वरस्य सृष्ट्यादिकर्मभिः विषयभोगै
र्वा तत्राह ॥ न चेति ॥ धातुर्जगद्विधातुरीश्वरस्य ऊतीर्जगल्लीलाः कुमनीषः कुबुद्धिर्निपुणेन तर्कादि
कौशलेन नावैति जानाति ॥ मनसा ख्यापितेन वचसा नामानि विसेतन्वतो विस्तारयतो वचोभिरिति वञ्च
अज्ञः समित्राप्यमाणो नटवचोभिः सहेतिबालकः न किंचिज्ज्ञानातीत्याह ॥ स वेद इति ॥ अमायया याथार्थ्य
लाभावेन संततया निरंतरया अनुवृत्त्या अनुकूलेन भजेत भक्तिमार्गेणाश्रयेत तावद्वेत्ति न वेदेति ॥ अथेति

एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च ॥ वर्णयंति स्म कवयो वेदगुह्यानि हृत्पतेः ॥ ३५ ॥ स
वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेस्मिन् ॥ भूतेषु चांतर्हित आत्मतंत्रः षाड्वर्गिकं
जिघ्रति षड्गुणेशः ॥ ३६ ॥ न चास्य कश्चिन्निपुणेन धातुरवैति जंतुः कुमनीष ऊतीः ॥ नामा
नि रूपाणि मनोवचोभिः संतन्वतो नटचर्यामिवाज्ञः ॥ ३७ ॥ स वेद धातुः पदवीं परस्य दुरंत
वीर्यस्य रथांगपाणेः ॥ योऽमायया संततयानुवृत्त्या भजेत तत्पादसरोजगंधं ॥ ३८ ॥ अथेह धन्या
भगवंत इत्थं यद्वासुदेवेऽखिललोकनाथे ॥ कुर्वंति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त
उग्रः ॥ ३९ ॥ इदं भागवतं नाम पुराणं ब्रह्मसंमितं ॥ उत्तमश्लोकचरितं चकार भगवानृषिः ॥ ४० ॥ निः
श्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् ॥ तदिदं ग्राहयामास सुतमात्मवतां वरं ॥ ४१ ॥ सर्व
वेदेतिहासानां सारं सारं समुद्धृतं ॥ स तु संश्रावयामास महाराजं परीक्षितं ॥ ४२ ॥

३८ ॥ अतो भक्ता एव भगवत्तत्त्वं जानातीति ॥ अथेति ॥ अतो भगवंतः सर्वज्ञाः भवंतो धन्याः कृतार्थाः यतः यद्य
स्मात् ॥ इत्थमप्रवर्तमाना वासुदेवे आत्मभावं मनोवृत्तिं कुर्वंति ॥ सर्वात्मकमेकांतिकं यस्मिन् यत्र भाव
सति भूयः परिवर्तो जन्ममरणप्रवाहो न भवति ॥ स तु किमेतत्कृपया सूतः कथयतीत्याह ॥ इदमिति ॥ ब्र
ह्मसंमितं सर्ववेदतुल्यं उत्तमश्लोकचरितं यस्मिन् तत् ऋषिः व्यासः ॥ तच्च प्रदाय प्रवृत्तिमाह तदिदमिति

स्कं° १ ॥ ३ ॥ २२ ॥

प्रावेशात्तत्पूर्वं तत्रागशुकेनोपविष्टमिति निवेशाग्योक्तिः ॥४३॥ हेविशानविशेषैः सकृष्णागमन ॥४४॥ सुधागतेव्ना
नवानस्मिन्त्रु कीर्तयतस्तत्र निविष्टः वेशमन्त्रपदनन्तत्र्यदास्तुत्तिरदोषः ॥ यथाधीतं यथास्वमति विस्पष्टेन
ग्रंथयथामति ॥ ननु शुकमुखेन संक्षेपतः कथितं विस्तरतः श्रावयिष्यामि ॥४५॥ इति श्रीभावार्थे प्रथमे तृतीयः ३
तुर्ये भागवतारंभकारणं तेन वर्ण्यते ॥ व्यासस्यापरितोषश्च तत्र नारदवचनादिभिः ॥ इत्येवं श्रवणं तथा श्रावयि
ष्यामीति ब्रुवाणं मुनीनां बहूनां मध्ये ॥ एकः नववक्तव्यथाहृदये बहुचः कुलपतिर्वा गुरुत्वेः तेषु
पि वृद्धत्वाद्बह्वृचः ऋग्वादीनत्र वक्तुमेव प्रवृत्तेभ्य ततनाद्धे सूतं कथमब्रवीत् ॥१॥ यथा कथामाह ॥२॥ कस्मिन्
स्थाने केन हेतुना तेन महाभारतादि धर्मशास्त्राणि कृतवतोपि वेदेन संहिता कृता लोकिकारणमित्यर्थः ॥ ऊं

प्रायोपविष्टं गंगायां परीतं परमर्षिभिः ॥ कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ॥४३॥ कलौ न
ष्टदृशामेष पुराणार्कोधुनोदितः ॥ तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः ॥४४॥ अहं चाध्यगमं तत्र
निविष्टस्तदनुग्रहात् ॥ सोहं वः श्रावयिष्यामि यथाधीतं यथामतिः ॥४५॥ इति श्रीभागवते प्रथम
स्कंधे तृतीयोध्यायः ३ व्यास उवाच ॥ इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणां ॥ वृद्धः कुलपतिः सूतं
बह्वृचः शौनकोब्रवीत् ॥१॥ शौनक उवाच ॥ सूत सूत महाभाग वद नो वदतां वर ॥ कथां भागवतीं पुण्यां
यदाह भगवान् शुकः ॥२॥ कस्मिन् युगे प्रवृत्तेयं स्थाने वा केन हेतुना ॥ कुतः संचोदितः कृष्णः कृ
तवान् संहितां मुनिः ॥३॥ तस्य पुत्रो महायोगी समदृङ् निर्विकल्पकः ॥ एकांतमतिरुन्निद्रो गूढो मूढ
इवेयते ॥४॥ दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रं ॥ तद्वीक्ष्य
पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुंभिदा न तु सुतस्य विविक्तदृष्टेः ॥५॥

न हि तस्य विविक्तदृष्टेः कस्तस्मिन् कतमश्चर्यितदृष्टमर्थः ॥ कुतो व्यासः ॥३॥ तत्र संश्रावयामासेति
नन्वकृष्णस्य व्याख्यानादिकं कथं घटते इति मितिप्रवृत्तं तस्माच्छुकमुखाद्भगवान् ततो ग्राहद्वाभ्यां तस्येति ॥३॥ सम
दृक्त्वेन गुणेषु विषयदृष्टि ॥ अस्मान्निर्विकल्पकः स्वार्थकः निरस्तभेदः किंचैकांतमतिरुन्निद्रः सम्यगस्मिपरसः एवंभू
तोपि विस्मयमः यतउन्निद्रः मायाशयनातु इह ॥ यानि श्रावर्षं भगवतः मानतस्यानजमा तिमय मीतिमूढ नेतः ॥ श्रुतवे
वशजोस्य कंदरानकं व्रजतीयते निर्विकल्पत्वमुपेवयति दृष्टीति ॥४॥ आत्मजे पुत्रे प्रव्रजंतं अनुयांतमनुगं
तमृषिमात्मजं अनग्नमपि दृष्ट्वा देव्यो ह्रिया परिदधुः वस्त्रादि परिधानं कृतवत्यः सुतमनग्नमपि
नमनायं न तु तं नग्नमपि दृष्ट्वा परिदधुः नचित्रं वा दृष्टवंतौ शुकं प्रति

॥५॥ [illegible]

श्री॰
भाग॰
टी॰
२

एवं भूतोऽसौ कथं मलिद्वितो जातः क्रतुजंगलाश्रुति ॥ देशविशेषाः नासं प्रश्नः यथयमेतेनोगजसमाकृये
विवरनगजेन संज्ञा श्राद्धयो नामयस्यतस्मिन् हस्तिनाथुरेहस्तीनायमा जानेन निर्मितत्वात् ॥ ६ ॥ एवंभूतेन
पुनिनासह पुत्रस्य वादे वेघासन्ततीभागवती श्रुतिः सविते पुत्रस्यापत्यानेवकु कालावस्थानायेहतनसंवक्र
मानुस्यानडलभमितिनाह ॥ सइति ॥ २ ॥ गोवृदे नमात्र कालप्रतीयते तथिद्धार्थं किंतत्तेषामाश्रम
गृहनीयीजिवत ॥ तस्मादेवंभूतो वृक्षेत्यात्श्चर्यं श्रातलस्त्वरितमती वाश्चर्ययुतो तः कथयेत्याह ॥ अपि
महसूत्ननमितिपृवभिः ॥ ८ ॥ गृणीहिकथय ॥ ९ ॥ ससम्राट् चक्रवर्तीवीति विनर्केकस्य वाहेतोः कस्मा
त्कारणात् ॥ आधिराइश्रियं आधिराज्ञात्रियंसंपदमनाइ्मथसपादनिकेतेवगणपीठदस्कु देधनाम्मा

कथमालक्षितः पौरैः संप्राप्तः क्रतुजंगलान ॥ उन्मत्तस्म कजडवद्विचरतानसमाकृये ॥ ६ ॥
कथयंवाणाङवेयस्मराजर्षेर्ज्ञुतिनाप्रह ॥ संवादः सममजातयश्वेषासायतीश्रुतिः ॥ ७ ॥
सगोस्तोद्दतमात्रेहित्रृहेषुपुहमेधिनो ॥ पुचेदानेमहामतस्त्रीपीत्रऋवेल्लदाश्रमान् ॥ अपि
मकुगतेसस्तन्यागज्ञभगवत्तानमं ॥ नस्यजस्ममहाश्चर्यंकर्मणित्वहृणीहि ते ॥ ९ ॥ सस
श्राद्धस्यवाहेतोः याइनामानवर्धनः ॥ श्रायोपविष्टोगंगायामनाहृत्याधिराट्श्रियं ॥ १० ॥ नम
य निषस्यादनिकेनमानमनः शिवात्रिकालीपधनानिशन्नवः ॥ कघसवीरःश्रियंगडस्यजो
श्रुवैषता ल्वुमहोममहात्मभिः ॥ ११ ॥ शिवाघलोकस्यमवायमनयपउत्तमश्लोकपरायणाज
नाः ॥ जीवितंनात्मार्थमसौपराश्रयं मुमोचनिर्विद्यकृतः कलेवरं ॥ १२ ॥ तस्यैवनःस्यात्वलुहृष्ट
शेषदिकंकिंचन ॥ ममैवाविषयेवाचोज्ञातमस्य ह्यादसात् ॥ १३ ॥

नीयशायुवानमति ॥ श्रूगवेहस तयुवातत्कृतेएवतरोक्रत ॥ श्राषमात्मनेपदं श्रव्हाभिः श्रातोः सहविर
क्रूम किंधनादिमित्येतिवेत्तत्राह ॥ ११ ॥ लोकस्पाशिवायस्त्वोयमवायमनयेयस्य ऊर्ध्व एवगाघ
नतेजीवितेनस्मात्मार्थं ॥ १२ ॥ एवंसति ॥ असोराजानिर्विद्यविरक्तः श्रयपरेषामाश्रयं ॥ कलेवरं क्रतोहेतोः
मुमोचनहिपापजीव नेनयुक्तक्षृचितमित्यर्थः ॥ १२ ॥ यत्किंचनश्रेष्ठसितत्सर्वमस्माकं ॥ सम्पा
वेत्व ॥ यद्यस्माद्धावविषयेयेवाज्ञातेपारगतत्वाममेक्लोदसाद मनवेदिकव्यतिरेकेणज्ञेवलिक
त्वात ॥ कालित्युगेइत्यादि ॥ अश्यानायाम्यमजन्मकथ नश्वैकमुजगमाह ॥ १३ ॥ १२

द्वापरे समनुप्राप्ते एकदेशापेक्षायामाह तृतीये युगमध्यपर्यये पराशराद्वासव्यां उपरिचरस्य वसोः वीर्यजा
तायां सत्यवत्यां योगी ज्ञानी व्यासो जातः ॥ १४ ॥ जलमुपस्पृश्य जलेन स्नानादिकं कृत्वेत्यर्थः ॥ आसीना
वश्येति शेषः ॥ विविक्तदेश इत्यादि चित्तैकाग्र्यार्थमुक्तं ॥ अनेनैव वदरिकाश्रमस्थानमावितं ॥ १५ ॥ तत्र स
इत्येवं युगधर्मादि व्यतिकरं वीक्ष्य एवं वर्णाश्रमाणां यद्धितं तत् ध्यावितिं तृतीये नान्वयः ॥ परावरज्ञ इति
नानागतवित ॥ भगवान्कंसहो वेगो यस्य तेन कालेन युगधर्माणां व्यतिकरं संकरं प्राप्तं वीक्ष्य तथा भुवि युगे युग

सूतः ॥ द्वापरे समनुप्राप्ते तृतीये युगपर्यये ॥ जातः पराशराद्योगी वासव्यां कलया हरेः ॥ १४ ॥ स
कदाचित्सरस्वत्या उपस्पृश्य जलं शुचिः ॥ विविक्त एक आसीन उदिते रविमंडले ॥ १५ ॥ परावरज्ञः स
ऋषिः कालेनाव्यक्तरंहसा ॥ युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे ॥ १६ ॥ भौतिकानां च भावानां
शक्तिह्रासं च तत्कृतं ॥ अश्रद्दधानान्निःसत्त्वान्दुर्मेधान्ह्रसितायुषः ॥ १७ ॥ दुर्भगांश्च जनान्वी
क्ष्य मुनिर्दिव्येन चक्षुषा ॥ सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक् ॥ १८ ॥ चातुर्होत्रं कर्म शु
द्धं प्रजानां वीक्ष्य वैदिकं ॥ व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधं ॥ १९ ॥ ऋग्यजुःसामाथर्वाख्या
वेदाश्चत्वार उद्धृताः ॥ इतिहासः पुराणं च पंचमो वेद उच्यते ॥ २० ॥ तत्रर्ग्वेदधरः पैलः सामगो जै
मिनिः कविः ॥ वैशंपायन एवैको निष्णातो यजुषामुत ॥ २१ ॥ अथर्वांगिरसामासीत्सुमंतुर्दारु
णो मुनिः ॥ इतिहासपुराणानां पिता मे रोमहर्षणः ॥ २२ ॥ त एत ऋषयो वेदं स्वं स्वं व्यस्यन्ननेक
धा ॥ शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन् ॥ २३ ॥ त एव वेदा दुर्मेधैर्धार्यंते पुरुषैर्य
था ॥ एवं चकार भगवान्व्यासः कृपणवत्सलः ॥ २४ ॥

ग ॥ १६ ॥ भौतिकानां शरीरादीनां तत्कृतं कालकृतं शक्तिः सत्त्वान्धैर्यं सत्त्वान् दुर्मेधान् मंदमतीन् ॥ १७
तत्र स्तुत्वा होत्रा पलब्धिताः चत्वार ऋत्विजः यत्र तद्धोत्रादि चातुर्होत्रं कर्म चातुर्होत्रं शुद्धं हितकरं यज्ञसं
तत्यै यज्ञानामविच्छेदाय एवं चतुर्विधं वेदमेवाह ऋगादीनि ॥ १९ ॥ उद्धृताः पृथक्कृताः ॥ २० ॥ दारुणः अथर्व
काभिचारादिप्रवर्तकः ॥ २२ ॥ व्यस्यन् विभक्तवंतः वेदविभागप्रयोजनमाह त एवेति ॥ २४ ॥ यथेति मतिमे

श्री भा॰प्र॰ टी॰ १६

किंच ॥ द्विजबंधवः त्रैवर्णिकेष्वधमाः तेषां कर्मरूपे श्रेयसि श्रेयः साधनेष एवं भवेत ॥२५॥ अत एव तेषां
कृपया मुनिना भारताख्यानं कृतं तेन प्रकारेण भवितिभूतानां श्रेयसि हिते ॥२६॥ सर्वात्मकेनापि
कर्मणा नातिप्रसीदद्धृदयं यस्य सः ॥२७॥ विनाप्रसन्नतां हेतुं वितर्कयन्निदमुवाचेत्याह ॥२८॥ मानिताः
पूजिताः श्रुताश्चानुशासनं प्रोक्ता ॥२९॥ देहाद्देहमध्यात्मा जीवो वा स्वतेनाविभुः परिपूर्णोपि वात्मनात्मेन रूपे
णासंपन्नः तादात्म्यमप्राप्त इवाभाति ॥ ब्रह्मवर्चसेन श्रुतवेदाध्ययनोत्कर्षजेन ॥ तेजः तत्साधकोब्रह्मवर्च

स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरा ॥ कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह ॥२५॥ इति
भारतमाख्यानं कृपया मुनिना कृतं ॥ एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः ॥२६॥ सर्वात्मके
नापि यदा नातुष्यद्धृदयं ततः ॥ नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ ॥२७॥ वितर्कयन्वि
विक्तस्थ इदं प्रोवाच धर्मवित् ॥ धृतव्रतेन हि मया छंदांसि गुरवोग्नयः ॥२८॥ मानिता निर्व्य
लीकेन गृहीतं चानुशासनं ॥ भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः ॥२९॥ दृश्यते यत्र धर्मा
दि स्त्रीशूद्रादिभिरप्युत ॥ तथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः ॥३०॥ असंपन्न इवाभा
ति ब्रह्मवर्चस्य सत्तमः ॥ किंवा भागवता धर्मा न प्रायेण निरूपिताः ॥३१॥ प्रियाः परमहंसाना
त एव ह्यच्युतप्रियाः ॥ तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः ॥३२॥ कृष्णस्य नारदोभ्या
गादाश्रमं प्रागुदाहृतं ॥३३॥ तमभिज्ञाय सहसा प्रत्युत्थायागतं मुनिः ॥ पूजयामास विधि
वन्नारदं सुरपूजितं ॥३४॥ इति श्रीभागवते प्रथमस्कंधे चतुर्थोध्यायः ॥ ४ ॥

स्यात्ते शुभसत्तमो निश्चेष्टो विषयज्ञानकेवलमसंपन्न इवाभाति प्रशस्तब्रह्मवर्चसी ब्रह्मवर्चस्यवान
पि श्रेष्ठसत्तम इवाभाति ॥ पाठांतरे कमनीयतमोपि ॥ अपूर्णत्वे हेतुं स्वयमेवाशंकते किंवेतिद्वाभ्यां
॥ प्रायेण भूयस्त्वेन हि यस्मात्त एव धर्मा अच्युतस्य प्रियाः खिलं न्यूनं खेदं प्राप्नुवतः कृष्णस्य
आश्रमं प्रागुदाहृतं ॥ सरस्वतीतीरस्थे ॥३३॥ तं नारदमागतमभिज्ञाय सहसा प्रत्युत्थाय विधि
वत्पूजयामास ॥३४॥ इति श्रीभावार्थदीपिकायां प्रथमस्कंधे चतुर्थोध्यायः ॥ ४ ॥ १६

पंचमे सर्वधर्मेभ्यो हरिकीर्तनगौरवं ॥ व्यासचित्तप्रसादाय नारदेनोपदिश्यते ॥ उपसमीपे आसीनं वि
प्रर्षिं बृहच्छ्रवा महायशाः स्मयमीषद्धसन्निवेत्यनेन सम्यक्त्वेश्वर्यं निर्धार्यते ॥ यद्वा इवेत्यनधिकार्यर्थमहा
महत्वापि प्रसन्नतीति स्मयमानः ॥ १ ॥ शारीरः शरीराभिमानी आत्मा आत्मना तेन शरीरेण कच्चित्किं परितु
ष्यति मानस आत्मा ना त्मा । भिमानी तेन मनसा परितुष्यति ॥ २ ॥ कृतविन्नो वा इति ते जिज्ञासितं तात्
मिष्टं धर्मादि यत्तत्सर्वं सुसम्पन्नं सम्यक् ॥ ज्ञातमपि विशेषाह दद्भुतमिति वेत्यर्थः ॥ अयि इति पाठे संबोधनं ॥
संपन्नत्वे हेतुः ॥ महदद्भुतं इति यतो यस्त्वं धर्मादिभिः परिबृंहितं परिपूर्णं ॥ ३ ॥ किंच ॥ यत्सनातनं नित्यं प
रं ब्रह्म तच्च त्वया जिज्ञासितं विचारितमधीतं प्राप्तं चेत्यर्थः ॥ तथापि शोचसि तत्किमर्थमिति शेषः ॥ ४ ॥
आत्मा शारीरो मानसश्च तत्र तन्मूलं तस्यापरितोषस्य कारणमव्यक्तमस्फुटं हे नारद ॥ नाहं जानाम लाइ ॥

सूतः ॥ अथ तं सुखमासीनमुपासीनं बृहच्छ्रवाः ॥ देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्नि
व ॥ १ ॥ नारदः ॥ पाराशर्य महाभाग भवतः कच्चिदात्मना ॥ परितुष्यति शारीर आत्मा मानस एव
वा ॥ २ ॥ जिज्ञासितं सुसंपन्नमपि ते महदद्भुतं ॥ कृतवान्भारतं यस्त्वं सर्वार्थपरिबृंहितं ॥ ३ ॥ जि
ज्ञासितमधीतं च ब्रह्म यत्तत्सनातनं ॥ तथापि शोचस्यात्मानमकृतार्थ इव प्रभो ॥ ४ ॥ व्यास उ
वाच ॥ अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे ॥ तन्मूलमव्यक्तमगाधबोधं पृच्छा
महे त्वात्मभवात्मभूतं ॥ ५ ॥ स वै भवान्वेद समस्तगुह्यमुपासितो यत्पुरुषः पुराणः ॥ परावरेशो मन
सैव विश्वं सृजत्यवत्यत्ति गुणैरसंगः ॥ ६ ॥ त्वं पर्यटन्नर्क इव त्रिलोकीमंतश्चरो वायुरिवात्मसाक्षी ॥ व

आत्मभवो ब्रह्मा तस्यात्मनो देहाद्भूतः ॥ न मे न एवागाधो तिगंभीरो बोधो यस्य तं त्वां अगाधबोधतोत्र
वेद यन्नाह ॥ स वै इति द्वाभ्यां ॥ ५ ॥ स वै गुह्यतानेहेन येन यस्मात्पुराणः पुरुष उपासितः तथा कथं
भूतः परावरेशः कार्यकारणनियन्ता मनसैव संकल्पमात्रेण गुणैः सृजतीति विश्वसृजत्यत्ति आदि ॥ ६
किंच त्रिलोकीं पर्यटन्नर्क इव सर्वदर्शी योगबलेन च प्राणवायुरिव सर्वप्राणिनामंतश्चरः सन्नात्म
साक्षी बुद्धिवृत्तिज्ञः ॥ अतः परे ब्रह्मणि अधीतेन योगेन निस्नातस्य यदूनं तत्पश्यन्व्याख्यान ॥ इत्याचार
दमोहिंसादानवृत्तस्वाध्यायकर्मणा ॥ अधीतपरमाधर्मो यथा योगनामदर्शनं ॥ अपरे ब्रह्मणि वेदाख्येवतोः
अध्यायनियमैर्निस्नातस्य मे । तमस्य येच समूनं तद्विचक्षाव न कथय ॥ ७ ॥

श्री
भाग°
टी°
२५

भवतानुदितप्रायमनुक्तप्रायं भगवद्यशो विमलं विना येनैव धर्मादिज्ञानेनासौ भगवान्न तुष्येत तत्स्वानं
दर्शनं खिलं न्यूनं मन्ये न तु भगवद्यशःप्रवर्तनं तत्त्वानुवर्णितं ॥ तदाह ॥ यथेति ॥ ८ ॥ यथा हि धर्मादिज्ञानं
नानिर्वचनं तथा धर्मादिवत्प्राधान्येन वासुदेवस्य महिमा नानुवर्णित इत्यर्थः ॥ वासुदेवकीर्तिविरहितं ज्ञानं विश्वपावनं
न भवति तावत्काव्यं वा कुकाव्यं विलम्बेनाह नेति ॥ १० ॥ चित्रपदमपि यद्वचो हरेर्यशो न प्रगृणीत न तद्वा
यसं तीर्थं काकतुल्यानां कामिनां रतिस्थानं मन्यन्ते कुतः मानसाः सत्त्वप्रधानमनसो वर्तमाना
हंसा यत्र न विरमन्ति कर्हिचिदपि विरतिं न रमन्ते ॥ उशिक्क्षयाः उशिकः कमनीयं ब्रह्म तत्र क्षयो निवासो येषां ते
परमहंसा यत्र न रमन्ते किमपि परमहंसा तत्र सत्सङ्गमनः कमनीयं यावत्प्रयत्नेन निवासाः हंसवि विज्ञाय प्रादि
पुरुषोक्तं किमु तद्वाक्यं वायसं तीर्थमिति ॥ विना विपदचातुर्यं भगवद्यशः प्रधानं वचः पवि
त्रमित्याह ॥ ११ ॥ तद्वागिति जनताया अघं विप्लावयति यो वाग्विसर्गः स जनताघविप्लवः तद्वाग्वि
नारदः ॥ भवतानुदितप्रायं यशो भगवतोऽमलं ॥ येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलं ॥ ८ ॥ य
था धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः ॥ न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ॥ ९ ॥ न यद्व
चश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् ॥ तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा
निरमन्त्युशिक्क्षयाः ॥ १० ॥ तद्वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥ नामा
न्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः ॥ ११ ॥ नैष्कर्म्यमप्यच्युतभाववर्जि
तं न शोभते ज्ञानमलं निरंजनं ॥ कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणं ॥ १२
ज्ञानवैराग्यं नाशयतीति ॥ यथापि सम्यक्त्वाद्विसर्गो बद्धवत्यपि प्रयत्नप्राप्तादिषु ते प्रतिश्लोकं नानन्तस्य यश
सांकितानि नामानि विभवन्ति ॥ तत्र हेतुः ॥ यद्यपि नामानि साधवो महान्तो वक्तरि सति शृण्वन्ति श्रोतरि सति
गृणन्ति ॥ अन्यदा स्वयमेव गायन्ति कीर्तयन्तीति ॥ भक्तिहीनं कर्म वृथा न भवति केवलं किं तु ज्ञानमपि ति
॥ ११ ॥ निःकर्मब्रह्म तदेकाकारत्वान्निः कर्मतारूपं नैष्कर्म्यं प्रशस्तमेव तेन निरुपाधिः ॥ तदपि वर्तते निरंजन
मलं बन्धनमपि ज्ञानमच्युतभाववर्जितं चेत् अलं नहि शोभते ॥ अलमत्यर्थं न शोभते न सम्यगपरोक्षाय कल्पत
इत्यर्थः ॥ तदा शश्वत्साधनकाले फलकाले च यदभद्रं दुःखरूपं यदप्यकारणमकाम्य
कर्म तच्चेत्कारस्मात् ... तदपि कर्म ईश्वरे नार्पितं कुतः पुनः शोभते वैराग्यं न जनयतीति च शोधकं नाभवा
न ॥ तदेवं भक्तिप्रधानमिति ज्ञानवैराग्यादिकर्मकोशलानि सर्वथा न भवन्ति सत्त्वस्य श्रोतव्य वर्णयेत्याह ।

२५
१२

सुतो गुरुः कारणोत्तमः सो ह्याचार्या हर्षेर्नौ धीर्यस्य स्वचित्त हंसवोपशोषस्य समतेरतः ॥ एतानि त्र
नानि येनेस्म भवाने वेन ह्यागुणोत्तमादनन्तरुक्रमस्यात्मविविधं वेष्टितं लीलाय साधिनाचितैकाग्र्य
णो विनाश बुधस्य रूपेणाम नुस्मरस्य नाबरोपेसर्वः ॥ एतत्सर्वं बाल्यात्तदंशत्निमध्यमगृहस्थयोगोनाद्य
वपत्नः विपत्तेद्वोबातारमाह ॥ २ ॥ ततरूरुक्रमस्य विचेष्टितानि श्वणंत्स्पृशाः अनेवबाल्यथाप्यकारणेनेलोय
किंचिदयोनेरविवहतः तयाविवत्तयाकृतैः स्फुरितेवपैर्नोमपमिर्वक्रमव्यतेनोपस्थितेः डःस्थि
तानुवस्थितमासनीमतिः कदाचित्ताविविषयेग्रामदेस्थानेनलभेनवातेनाहनाजुर्लितानोमि
व ॥ नडके गीताहृ ॥ यवस्या यात्मिकावुद्धिरेकेहरुरूनन्दन ॥ वहुशाखोह्यनन्ताश्चबुद्धयोव्यवसायि
नामिति नदेवहरियशाविनाभारतादिकृतेधर्मादिवर्णानेश्राकिंचित्करमितृके ॥ प्रस्तुतविहरुमे
श्रेतामहाभागभवानमोद्यहंकृत्यचित्तश्रवाममानोधृतव्रतः ॥ उरुक्रमस्याखिलबंधमुक्तये
समाधिनानुस्मरतद्विचेष्टितं ॥ ३ ॥ ततोमयाकिंचनयद्विवाहितः श्रुयद्दृश्यतत्कृतरूपना
मभिः ॥ नकुत्रचित्कापिचडः स्थितामतिर्लभेतवाताहतनौरिवास्पदं ॥ ४ ॥ जुगुप्सितंधर्म
कृतेनुशासतः स्वभावरक्तस्यमहान्व्यतिक्रमः ॥ यद्वाक्यतोधर्मइतीतरः स्थितोनमन्यतेतस्य
निवारणंजनः ॥ ५ ॥
वक्ष्यभिस्याह ॥ ५ ॥ जुगुप्सितंनिषिद्धंकाम्यकर्मस्वभावतएवरक्तस्यातन्वराणिणः पुरुषस्यधर्मकृते
धर्मार्थमनुशासतः तवमहानयंव्यतिक्रमः अनुचः कुतइत्यतआह यस्यवाक्यतोयमेवमुख्योध
र्मइतिस्थितःइतरः प्राकृतोजनः तस्यकाम्यकर्मादेः श्रुमेवतनसेनक्रियमाणस्यनिवारणंनोपमेववा
तयाक्रियमाणोपेक्षानकर्मणानप्रजयाधनेनत्यागेनेकेनामृतत्वमानशुरितिश्रुत्याक्रियमाण
निवारणं यथार्थमनदितिनमन्यतेकिंतुप्रवृत्तिमार्गोनाधिकृतविषयतदितिकल्पयतितडके ॥
महाजनोयेनगतः सपंथाः ॥ नत्वेवशक्यतेवक्तुंयंधर्मवादयोगुरुः ॥ गरुस्यतनशक्नोतिकर्तुंतेषामयं
विधिः ॥ नेष्टिकब्रह्मचर्यंवापरिव्राजकतांविना ॥ नेरवषणगृहीतव्यातनाहवेनत्युच्यतेइत्यादि ॥
१ ॥ यद्यपिश्रुधिकारिमेदमनोकनदर्योप्रिवभावरक्तानानयविरुद्धमवतिमावः ॥ ५ ॥ ॥

श्री
भाग
टी०
१५

नन्वेवं प्रवृत्तिमार्गनिरोधेनेदं निवृत्तिमार्गे सर्वक्रियात्यागे नैव परमेश्वरस्वरूपानुभवे तैः किं न घटतेः।
कथं ते नार्हतीत्याह ॥ विचक्षण इति विचक्षणोऽतिनिपुणः कश्चिदेवानन्तनिवृत्तितः सर्वक्रियानिवृत्त्या सुखं वि
भोः स्वरूपं निर्विकल्पकमनुभवात्मकं स्वरूपं वेदितुमर्हतीति न पुनः विचक्षणाः प्रवृत्तिस्वभावाः विमूढचे
तः ॥ अतः कृपालुस्ततः पारे च देशकालपरमस्य विभोः चेष्टितं ततः कारणाद् गुणैः प्रवर्तमानस्यानात्मनो देहाद्युपाधिमतोऽति
ज्ञानरहितस्य गुणैः सत्त्वादिभिः प्रवर्तमानस्य दर्शय भवानिति तत्त्वमित्यर्थः पाठान्तरे स्वभवन्निवृत्तिसमाधाने ॥ एवंभू
तकाम्यधर्मादौ रतस्य हि तत्त्वानां विरक्तस्य रोचीते न च वर्णाश्रमधर्मे मुक्तः ॥ इदानीं नित्यनैमित्तिककर्मनिष्ठस्य
जनस्य केवलभक्तिरेवोपदेष्टव्या न्याय्येनाह त्यक्त्वेति ॥ न तु स्वधर्मत्यागेन भजतां भक्तिपरिपाकेन यदि
कृतार्थो भवेत् तदा न काचिच्चिन्ता यदि पुनरपक्व एव म्रियेत तदा प्रत्यवायः स्वधर्मत्यागनिमित्तानर्थः।

विचक्षणोऽस्यार्हति वेदितुं विभोरनन्तपारस्य निवृत्तितः सुखं ॥ प्रवर्तमानस्य गुणैरनात्म
नस्ततो भवान्दर्शय चेष्टितं विभोः ॥१६॥ त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो
यदि ॥ यत्र क्व वाभद्रमभूदमुष्य किं को वार्थ आप्तोऽभजतां स्वधर्मतः ॥१७॥ तस्यैव हेतोः प्रयते
त कोविदो न लभ्यते यद्भ्रमतामुपर्यधः ॥ तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंह
सा ॥१८॥

साहित्याशंक्याह ॥ यत्र क्व वा नीचयोनावपि अमुष्य भक्तिरसिकस्याभद्रमभूत् ॥
किं नाम दैवेनार्थः ॥ भक्तिवासनासद्भावादित्यर्थः ॥ हरिमभजद्भिः केवलं स्वधर्मतः को वार्थ आ
प्तः अभजतामिति षष्ठी तृतीयार्थे न तु स्वधर्ममात्रादपि कर्मणापि परलोकादि इति अतः
पिरलोकसाधनफलमस्त्येवेत्याह ॥१८॥ तस्यैव हेतोस्तदर्थमेव प्रयतेत कोविदः ॥ उपरि ब्रह्मलोकपर्यन्तमधः स्थावर
पर्यन्तं च भ्रमद्भिर्जीवैर्न यत्कर्मभिर्न लभ्यते बहीतिः सर्वं वद ॥ तत्तु विषयसुखं एवम्भूतमेव ॥ प्राचीनकर्म
वशादेव नरकादिवत् पि   लभ्यते ॥ दुःखं यथा दुःखं प्रयत्नं विनापि लभ्यते तद्वत् ॥ तथा श्रुति
तादिदुःखानि यथैवायान्ति देहिनां ॥ सुखान्यपि तथा मन्ये दैव   मत्यातिरिच्यते ॥ यदुक्तं ॥ यत्र
क्व वाभद्रमभूदिति ॥ तदुपपादयति ॥ न वै इति ॥१८॥

मुकुंदसेवी जनः जातु कदाचित् कथंचन कुयोगितोपि संसृतिं नाव्रजेत् न विशेत् अंगाहो अन्यव
त् केवलकर्मिष्ठवदिति वैधर्म्यदृष्टांतः कुत इत्यत आह ॥ मुकुंदांघ्र्युपगूहनमालिंगनं पुनः स्मर
न्विहातुं नेच्छेत् ॥ यतोयं जनो रसग्रहः रसेन रसनीयेन रूपेण तद्वशीक्रियते ॥ यद्वा रसनीये ग्रहस्याग्रहो यस्य
स ॥ तदुक्तं भगवता ॥ यततेव ततो भूयः संसिद्धौ कुरुनंदन ॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सन् ॥
नदेवं भगवल्लीला श्रवणाधायेनानुवर्णनीयेत्युक्तं ॥ तत्र को भगवान् का चास्य लीला इत्यपेक्षायामाह ॥
इदमिति ॥ इदं विश्वं भगवानेव स तु अस्माद्विश्वस्मादितरः ईश्वरात्प्रपंचो न पृथक् ॥ ईश्वरस्तु प्रपंचात्पृथगित्य
र्थः ॥ तत्र हेतुः ॥ यतो भगवतो हेतोः जगतः स्थितिसर्गलया भवंति ॥ स्वयमेव लीला अपि दर्शिता ॥ य
द्वा इदं विश्वं भगवानिवेतरः इव यः ॥ सन्नीतोपि भगवान् एव तस्माच्चेतनाचेतनप्रपंचलक्षणमिदं केवलं तस्मिन्नेव

न वै जनो जातु कथंचनाव्रजेन्मुकुंदसेव्यन्यवदंग संसृतिं ॥ स्मरन्मुकुंदांघ्र्युपगूहनं पुन
र्विहातुमिच्छेन्न रसग्रहो जनः ॥ १९ ॥ इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोध
संभवाः ॥ तद्धि स्वयं वेद भवांस्तथापि ते प्रादेशमात्रं भवतः प्रदर्शितं ॥ २० ॥ त्वमात्मनात्मा
नमवेह्यमोघदृक् परस्य पुंसः परमात्मनः कलां ॥ अजं प्रजातं जगतः शिवाय तन्महानुभा
वाभ्युदयोधिगण्यतां ॥ २१ ॥ इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः ॥
अविच्युतोर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनं ॥ २२ ॥
वैकल्पत्वाभिप्रायः ॥ किंच हे व्यास त्वं सर्वज्ञ एवेदं जानास्येव त्वया सिद्धं साक्षात्कृतं तथापि स्वयमेव भवानेवेदं
प्रादेशमात्रं एकदेशमात्रं मया दर्शितं भवतो वेदव्यासादिरूपस्य पराशरात् मया प्रदर्शितं ॥ नचैतावा
नपि चेतनत्वात् सुगम इत्याहुर्नाहं न्यायविदिति ॥ २० ॥ हे व्यास त्वमात्मना आत्मानं स्वयमेवात्मानं अवेहि जानीहि
जगतः शिवाय प्रजातं अवतीर्णं अजं परस्य पुंसः कलामंशं अतः त्वं तस्मात् महानुभावस्य हरेरभ्युदयः
पराक्रमो अधिगण्यतां वर्ण्यताम् निरूप्यतां तत्र निवर्तनं यज्ञादिसर्वकर्मफलं नवप्रकारादित्याह ॥ इदं हीति ॥ २१ ॥
श्रुतादयो भावनिष्ठा इदमेव हि नत्वः अविच्युतोर्थः अविकल्पितो निश्चितोर्थः फलं किं तत ॥ उत्तमश्लोकगुणा
नुवर्णनं यत् ॥ सत्संगतोहरिकथाश्रवणादि फलं स्वरूपतोनन्यप्रयोजनत्वमेवापाते ॥ २२ ॥

श्रीः
भाग॰
टी॰
१६

अहंपुरा पूर्वस्मिन्कल्पे अतीतभवे पूर्वजन्मनि वेदवादिनां दास्याः सकाशात् अभवं जातोस्मि निरूपितो नियु-
क्तः कस्यां योगिनां शुश्रूषणे प्रावृषि वर्षोपलक्षिते चातुर्मास्ये निर्विविक्षतां निवेशं एकत्रवासं कर्तु-
मिच्छतां ॥२३॥ अपेतान्यखिलानि चापलानि यस्मात्तस्मिन् दान्ते इंद्रियचपले न क्रीडनके अप्राप्तक्रीडा-
साधने निवर्तिनि अनुकूले ॥२४॥ उच्छिष्टलेपान् पात्रलग्नान्नशेषान् द्विजैरनुज्ञातः सकृद्भुंजे सकृद्भोज-
नेनापास्तकिल्बिषो जातोस्मि तेषां धर्मे भागवते रुचिः प्रजायते ॥ एवात्मनो मनसा रुचिः प्रजायते स्मेत्यनु-
षंगः ॥२५॥ अनु॰ शृणुवैष्णवानां तेषामनुग्रहेणाशृणवं मनोहराः प्रियश्रवसि भगवति ममेव रुचिः प्रियश्रवणस्यैव ॥ अंग
ममेति संबोधनं कृष्णा प्रियश्रवा यशस्तस्मिन् भगवति लब्धरुचेर्ममास्खलिता अप्रतिहता मतिरभवदि-

अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनां ॥ निरूपितो बालक एव योगिनां
शुश्रूषणे प्रावृषि निर्विविक्षतां ॥२३॥ ते मय्यपेताखिलचापलेऽर्भके दान्तेऽधृतक्रीडनकेऽनु-
वर्तिनि ॥ चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि ॥२४॥ उच्छिष्ट-
लेपाननुमोदितो द्विजैः सकृत्स्म भुंजे तदपास्तकिल्बिषः ॥ एवं प्रवृत्तस्य विशुद्धचेतसस्त-
द्धर्म एवात्मरुचिः प्रजायते ॥२५॥ तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाशृणवं मनो-
हराः ॥ ताः श्रद्धया मेऽनुपदं विशृण्वतः प्रियश्रवस्यंग ममाभवद्रुचिः ॥२६॥ तस्मिंस्तदा
लब्धरुचेर्महामुने प्रियश्रवस्यस्खलिता मतिर्मम ॥ ययाहमेतत्सदसत्स्वमायया पश्ये
मयि ब्रह्मणि कल्पितं परे ॥२७॥ इत्थं शरत्प्रावृषिकावृतू हरेर्विशृण्वतो मेऽनुसवं यशोम-
लं ॥ संकीर्त्यमानं मुनिभिर्महात्मभिर्भक्तिः प्रवृत्तात्मरजस्तमोपहा ॥२८॥

स्वनुषंगः ॥२६॥ ययाहमस्मात्प्रपंचं चातीते ब्रह्मणि स्वरूपे मयि परमात्मनि सदसत्स्थूलसूक्ष्मं च एतच्छरीरं स्वमायया आत्मा-
विद्यया कल्पितं अनुपश्यामि इति तत्त्वज्ञानमेव एवमप्रस्तुतस्वपरार्थं ज्ञात्वा देहादिकं न विहा-
पति हृते तल्लक्षणमन्तरजस्तमो निवर्तिका इत्यर्थः भक्तिर्जाता तेनाह ॥ इत्थमिति ॥२७॥ हरेर्यशः
अनुसवं त्रिकाले ॥२८॥ तस्येति ॥ श्रद्दधानस्य दार्थं स्वहृद्भक्तिमतो मे प्रश्रितस्य विनीतस्य ॥ अनतः
संसर्गगणवासेन स्वहृदि हृतैनस इति भावः ॥२९॥

पि

दा

१६

तस्यैवं मेनुरक्तस्य प्रश्रितस्य हतैनसः ॥ श्रद्दधानस्य बालस्य दांतस्यानुचरस्य च ॥२९॥

गुह्यतममिति ॥ साधनभूतं धर्मतत्त्वज्ञानं गुह्यं तत्त्वार्थविवितं आत्मज्ञानं गुह्यतरं तस्मादप्यैश्वरज्ञानं गुह्यतम
मेव भगवतोदितं भगवतैव शास्त्रमेवावतृपदिष्टवंतः तदेवज्ञानं पूर्वोक्तं तत्पदार्थज्ञानं चाहिवेकेन दर्शयति
येनैवेति ॥ ३१ ॥ अविदं ज्ञातवानहं तत्साधनधर्मस्वरूपं विनेदृत्याह ॥ एतदिति ॥ ३२ ॥ तापत्रयस्याध्यात्मि
कादेश्चिकित्सितं भेषजं निवर्तकं मनःशोधकमित्यर्थः किं तद्भगवति ईश्वरे सर्वनियंतरि ब्रह्मणि परम भावितं तत्समर्पितं यत्कर्म
चिद्घनस्वरूपे भावितं समर्पितं ॥ ननु संसारहेतोः कर्मणः कथं तापत्रयनिवर्तकत्वं इति तत्र सामग्रीभेदेन कथंभूते भगवति
घटते इति सदृष्टांतमाह ॥ आमयो ॥ ३३ ॥ यः आमयो रोगो येन घृतादिना जायते तदेव केवलमामयकार

ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितं ॥ अन्ववोचन्गमिष्यंतः कृपया दीनवत्सलाः ॥ ३० ॥
येनैवाहं भगवतो वासुदेवस्य वेधसः ॥ मायानुभावमविदं येन गच्छंति तत्पदं ॥ ३१ ॥ एत
त्संसूचितं ब्रह्मंस्तापत्रयचिकित्सितं ॥ यदीश्वरे भगवति कर्म ब्रह्मणि भावितं ॥ ३२ ॥ आ
मयो यश्च भूतानां जायते येन सुव्रत ॥ तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितं ॥ ३३ ॥ एवं
नृणां क्रियायोगाः सर्वे संसृतिहेतवः ॥ त एवात्मविनाशाय कल्पंते कल्पिताः परे ॥ ३४ ॥ यद
त्र क्रियते कर्म भगवत्परितोषणं ॥ ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितं ॥ ३५ ॥

णंभूतं द्रव्यं तदामयं न पुनाति न निवर्तयतीत्यर्थः ॥ किं तु चिकित्सितं द्रव्यांतरैर्भावितं सत्पुनात्ये
व यथा ॥ ३३ ॥ आत्मविनाशाय कर्मनिर्हरणाय कल्पंते समर्था भवंति परे ईश्वरे कल्पिताः अर्पिताः संतः
अत एव यस्य मम हस्तेनैवाननत ॥ तत्स्वरूपान्न न तु स्वधर्मश्रद्धानतो भगवत्कथाश्रवणात्ततो भगवति रतिः ॥ त
थाच देहद्वयविवेकात्मज्ञानेन ततो दृढा भक्तिः ततो भगवत्तत्त्वविज्ञानेन ततस्तत्कृपया सर्वज्ञत्वादि भ
गवद्गुणाविर्भाव इति क्रमो दर्शितः ॥ ननु ज्ञानेनाज्ञाननाशात्मकर्मनाशः ॥ न च ज्ञानं भगवति भक्तिया
नाद्भवति ॥ कथं कर्मणा कर्मनाशः स्यादत आह ॥ यदत्रेति ॥ ३५ ॥ भगवत्तोषणेन क्रियमाणं कर्म भक्ति
योगं जनयतीति सदाचारेण दर्शयति ॥ ३६ ॥

श्री॰ भाग॰ टी॰ ९

यत्र यदा भगवतः शिक्षया कर्माणि कुर्वाणा भवंति तदा कृष्णस्य गुणनामानि गृणंति अनुस्मरंति
च कृष्णमित्यर्थः ॥ इत्थं भगवच्छिक्षया गीतासु यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् य
त्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमित्यादि कीर्तनप्रकारमाह नमस्ते इति तत्त्वमुक्तेनानेन नमा
दद्वाभ्यां नमइति नमो धीमहि नमस्ते नमनेन धीमहि ३७ मूर्तिकं मंत्रात्मकं व्यतिरिक्त
मूर्तिमूर्तियज्ञं तेन यजति ॥ एवं च कृते सति स सम्यग्दर्शनो भवति ॥ एवं कृतवति मयि दृष्टः
स्वमहं दृष्टवानिति वाच्यमाह ॥ ३८ ॥ इमं स्वनिगमं स्वोपदेशं निगमं वेदं मया नुष्ठितं मत्वेत्सर्वात्माभाव
प्रीतिश्च मयि च कृपां विमाद ॥ नमिति ॥ ३९ ॥ अदभ्रमनल्पं श्रुतं यस्य सर्वात्मत्वं स्वरूपकं तव वि

कुर्वाणा यत्र कर्माणि भगवच्छिक्षयासकृत् ॥ गृणंति गुणनामानि कृष्णस्यानुस्म
रंति च ॥ ३६ ॥ नमो भगवते तुभ्यं वासुदेवाय धीमहि प्रद्युम्नायानिरुद्धाय नमः संक
र्षणाय च ॥ ३७ ॥ इति मूर्त्यभिधानेन मंत्रमूर्तिममूर्तिकं ॥ यजते यज्ञपुरुषं स सम्यग्दर्श
नः पुमान् ॥ ३८ ॥ इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितं ॥ अदान्मे ज्ञानमैश्वर्यं स्वस्मिन्भावं च
केशवः ॥ ३९ ॥ त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितं ॥ प्राख्याहि
दुःखैर्मुहुरर्दितात्मनां संक्लेशनिर्वाणमुशंति नान्यथा ॥ ४० ॥ इति श्री प्रथमे पंचमोऽध्यायः ५
सूतः एवं निशम्य भगवान्देवर्षेर्जन्म कर्म च ॥ भूयः पप्रच्छ तं ब्रह्मन्व्यासः सत्यवतीसुतः ॥
वेदव्यासः ॥ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिस्तव ॥ वर्तमानो वयस्याद्ये ततः किमकरोद्भ
वान् ॥ २ ॥ स्वायंभुव कया वृत्त्या वर्तितं ते परं वयः ॥ कथं चेदमुदस्राक्षीः काले प्राप्ते कलेवरं ॥ ३

श्रुतं विभोर्यशः प्राख्याहि कथय येन विश्रुतेन स्तुतेन विदां विदुषां बुभुत्सितं ज्ञातुमिष्टं समाप्यते
यतो दुःखैः पीडितानां प्राणिनां संक्लेशनिवृत्तिं नान्यथा मन्यते ॥ ४० ॥ इति प्रथमे पंचमः ॥ व्यासस्य प्रश्नस्य यथार्थं वक्तुं दृष्टा
नुस्मरेम ॥ स्वभागवतादर्शं प्राक् कृष्णकथया नाड्व ॥ एवं मयि प्रभिक्षुभिर्विप्रवसिते देशांतरं गते
नेच्छतीत्यच्छेतिभिः इति ॥ १ ॥ विप्रवसिते देशांतरं गते विज्ञानादेष्टृभिः ॥ २ ॥ पर
वयः उत्तरमायुः तत्र कया वृत्त्या वर्तितं ॥ इदमिति दासीपुत्रत्वे कलेवरमुदस्राक्षीः उत्सृष्टवानसि ॥ ३

९

पूर्वकल्पांतलक्षणः कालः तेसमंतिं कथं नरवधात नरवेडितवान् ॥ श्रुत्वागमभावस्तार्थः पुनो हे यथा ।
वेस्याविनाकृतिः ॥ सुपलावोत्रातेयस्मात्ः ॥ ५ ॥ प्रकारिषकृतवानवहेफचककारयोर्विशेषः केदेनुरोधे
न ततः नावक विल्कालेनैवमात्रस्वेद्वयंत्रितानवसमिसाहत्रिभिः ॥ ५ ॥ एकएवात्मजो हे यस्मात् सापायि
मछेतिस्नेहानुबंधहेतः ॥ किंवशीभसार्थं प्रपंचयति ॥ ६ ॥ श्रुत्वा तेजासा श्रुतेनानकल्पामसर्वथा नाशीत ॥
दाहमयीघोषेतिपाश्ववृपहृष्टांतः ॥ ७ ॥ नदेवेसमन्वेहे चक्रे गृहे वदिगादिषु नाम नस्नेवे निवसमिमा
ह ॥ गृहे वत्समिलत्तुमजलेनसमा मातृः स्नेहानुबंधस्यावेदयाकदाविसमदितिप्रतीहयेसमर्थः ॥ उपविभा
न्वासकृतवानपंचस्वपनः पंचवर्षः ॥ ८ ॥ गेहान्निर्गतोगाड्दहेतीहेलाशतप्रमथ(दिग्युविगीतामिसर्थः
महाघदेनास्मक्षंदृबदाक्रांतः गृहदेशसीमानं जनपदादीनतिघातः सन्मबहिर्विपक्षदेशात् मिति चेत
हर्वादत ॥ ९ ॥ तस्मात्नस्पतोषिकल्पातामिळत्तेई शासाद्भुग्रहस्मद्यातः उत्तमादेशजाति पुत्रीश्चेत्यनोसि

प्राक्कल्पविषयामेतां स्मृतिं ते सुरसत्तम ॥ न ह्येष व्यवधात्काल एष सर्वनिराकृतिः ॥ ४ ॥ नारद उवाच
भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम ॥ वर्तमानो वयस्याद्ये तत एतदकारिषं ॥ ५ ॥ एकात्मजा मे
जननी योषिन्मूढा च किंकरी ॥ मय्यात्मजेऽनन्यगतौ चक्रे स्नेहानुबंधनं ॥ ६ ॥ सास्वतंत्रा न कल्पासी
द्योगक्षेमं ममेच्छती ॥ ईशस्य हि वशे लोको योषा दारुमयी यथा ॥ ७ ॥ अहं च तद्ब्रह्मकुले ऊषिवांस्त
दपेक्षया ॥ दिग्देशकालाव्युत्पन्नो बालकः पंचहायनः ॥ ८ ॥ एकदा निर्गतां गेहाद्दुहंतीं निशि गां
पथि ॥ सर्पोऽदशत्पदा स्पृष्टः कृपणां कालचोदितः ॥ ९ ॥ तदा तदहमीशस्य भक्तानां शमभीप्सतः ॥
अनुग्रहं मन्यमानः प्रातिष्ठं दिशमुत्तरां ॥ १० ॥ स्फीताञ्जनपदांस्तत्र पुरग्रामव्रजाकरान् ॥ खेटखर्वटवाटी
११ ॥ स्फीतान् जनपदान् हृष्टानतिघातः सन्महर्षिर्विपिनमप्राप्तमिति चतुर्भिर्नान्वयः ॥ जनपदादिषु नाना
गुणान्दृष्ट्वा कृत्वा न मनसि स्थितः एतानतिक्रम्य इति तात्पर्यं स्फीतान् समृद्धान् जनपदान् देशान् तत्र तत्र पुर
ग्रामव्रजाकरान् तत्र पुराणि नगराणि जनधाम ग्रामाः व्रजाः गोष्ठाः विप्रा सुविप्र नाश्रयंत्र वेदवसंतीति ॥ खेट
ग्रामः इति ख्याताः खर्वटाः वाटी वेचेति ॥ व्रजा गोकुलानि आकराः रत्नाद्युत्पत्तिस्थानानि खेटः कृषिक
ग्रामाः खर्वटा गिरितटग्रामाः ॥ एकतो यत्र ग्रामो नगरं चैकतः स्थिते ॥ मिश्रतः खर्वटं नाम
नदीगिरिसमाश्रयमिति ॥ वाट्यः वाटिकाः वनानि वनानि इति नामार्थः उपवनानि

श्री
भा॰ प्र॰
टी॰
१९

विचित्रैर्धातुभिः स्वर्णरजतादिभिर्विचित्रानद्रीन् इभैर्गजैर्भग्ना भुजाः शाखा येषां ते द्रुमा येषु तान् ॥ शिवा
नि मङ्गलानि जलानि येषां तान् नलिनीः सरसीः ॥१२॥ चित्राः स्वना येषां तैः पक्षिभिः तन्नादसहितैर्नु
त्यर्थः विभ्रमद्भिर्भ्रमरैः श्रीः शोभा यासां ताः नलिनीः ॥१३॥ अतियातोऽतिक्रान्तः सन् महद्विपिन
वनमद्राक्षं कीदृशं नलवेणुशराणां स्तम्बैः कुशैः कीचकैश्च गह्वरं दुर्गमं तत्र वेणवः ज्ञातयः विपुला
नलाः कीचकाः सच्छिद्रवेणवः इति ॥१४॥ घोरं सङ्कटं प्रतिभयाकारं भयावहं व्याला
दीनामजिरं क्रीडास्थानं परिश्रान्तानीन्द्रियाणि आत्मा देहश्च यस्य स तृषा परीतो व्याप्तः ॥१५॥ उप

चित्रधातुविचित्राद्रीनिभभग्नभुजद्रुमान् ॥ जलाशयाञ्छिवजला नलिनीः सुरसेविताः
१२॥ चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः ॥ नलवेणुशरस्तम्बकुशकीचकगह्वरे ॥१३॥ एक
एवातियातोऽहमद्राक्षं विपिनं महत् ॥१४॥ घोरं प्रतिभयाकारं व्यालोलूकशिवाजिरं ॥ परि
श्रान्तेन्द्रियात्माहं तृट्परीतो बुभुक्षितः ॥१५॥ स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः ॥ तस्मि
न्निर्मनुजेऽरण्ये पिप्पलोपस्थ आश्रितः ॥१६॥ आत्मनात्मानमात्मस्थं यथाश्रुतमचिन्तयं ॥१७
ध्यायतश्चरणाम्भोजं भावनिर्जितचेतसा ॥ औत्कण्ठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः ॥१८
प्रेमातिभरनिर्भिन्नपुलकाङ्गोऽतिनिर्वृतः ॥ आनन्दसम्प्लवे लीनो नापश्यमुभयं मुने ॥१९॥ रूपं
भगवतो यत्तन्मनःकान्तं शुचापहं ॥ अपश्यन् सहसोत्तस्थे वैक्लव्याद्दुर्मना इव ॥२०॥ दिदृक्षुस्त
दहं भूयः प्रणिधाय मनो हृदि ॥ वीक्षमाणोऽपि नापश्यमवितृप्त इवातुरः ॥२१॥ एवं यतन्तं
विजने मामाहागोचरो गिरां ॥ गम्भीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव ॥२२॥

स्पृष्ट आचान्तः पिप्पलोपस्थे पिप्पलमूले आश्रितः ॥ आत्मना बुद्ध्या आत्मस्थं हृदिस्थं आत्मानं परमात्मा
नं ॥१७॥ भावेन भक्त्या निर्जितं वशीकृतं यच्चेतस्तेन औत्कण्ठ्येन अश्रुकलाकुले अक्षिणी यस्य
सः ॥ तस्य मे शनैर्हरिः हृदि आविर्भूतः प्रेम्णातिभरेण निर्भिन्नपुलकान्यङ्गानि यस्य आनन्दसम्
प्लवे लीनः उभयं आत्मानं परं च ॥१९॥ मनसः कान्तं प्रियं शुचापहं शोकनाशनं उत्थितः
स्थितवानस्मि ॥२०॥ दिदृक्षुः प्रणिधाय स्थिरीकृत्य अवितृप्तो ऽतिशोकातुरः ॥२१॥ विजने

१९

रिपवशोऽहं तेनैतस्मात् केवलं बोधनेनाऽऽत्मानं प्रपश्यन्नाहमिति ॥ यतो न विपक्वकषाया मलाः कामादयो येषां तेषां कुयोगिनां निष्पन्नयोगानां प्रत्यग्दृशः प्रशान्तः कोऽनन्तरं हि दृष्टो सिन्नाह ॥ २३ ॥ सकृद्दर्शितिनमयेति घत ॥ एतत्कामायमयाथ गुरागाय तत्काममनेकि सिद्धमनुप्राह ॥ सत्कामः पुमान् हस्तेऽप्यकामान् सर्वाघ्नेश्वेति ॥ २२ ॥ सतो सर्वदा दीक्षयाऽपि विप्रवयोनि यलाके देहे कित्वामज्ञनतामः स्वार्थे दागतासि ॥ २४ ॥ प्रजानां सर्गस्थिति निरोधेषु सदापि प्रजानां सर्गस्थिति निरोधे इति वा ॥ २५ ॥ तत्र सिद्ध मवद्भृते प्रसमदतोऽमतस्य निःस्वलिङ्गमेनच्छरणं वदतीति युक्तः ॥ कीदृशमीश्वरं पुनिर्यन्तारं न भोगे लिङ्गमलिङ्गस्य तत्र भोगलिङ्गं सन्निहितमपि लिप्यते नापि तल्लिङ्गं न लिप्यते इत्यलिङ्गमसीश्वरं दृष्टाय ॥ प्र
हेनास्मिन्नजन्मनि भवान्मा इष्टामिकाईति ॥ अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनां
२३ ॥ सकृद्यद्दर्शितं रूपमेतत्कामाय तेऽनघ ॥ मत्कामः शनकैः साधुः सर्वान्मुञ्चति हृच्छ
यान् ॥ २४ ॥ सत्सेवयादीर्घया ते जाता मयि दृढा मतिः ॥ हित्वावद्यमिमं लोकं गन्ता मज्जन
तामसि ॥ २५ ॥ मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित ॥ प्रजासर्गनिरोधेऽपि स्मृतिश्च मद
नुग्रहात ॥ २६ ॥ एतावदुक्त्वोपरराम तन्महद्भूतं नभोलिङ्गमलिङ्गमीश्वरं ॥ अहं च तस्मै मह
तां महीयसे शीर्ष्णावनामं विदधेऽनुकम्पितः ॥ २७ ॥ नामान्यनन्तस्य हतत्रपः पठन्गुह्यानि भ
द्राणि कृतानि च स्मरन् ॥ गां पर्यटंस्तुष्टमना गतस्पृहः कालं प्रतीक्षन्विमदो विमत्सरः ॥ २८ ॥
एवं कृष्णमतेर्ब्रह्मन्नासक्तस्यामलात्मनः ॥ कालः प्रादुरभूत्काले तडित्सौदामिनी यथा ॥ २९ ॥
प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुं ॥ आरब्धकर्मनिर्वाणो न्यपतत्पाञ्चभौतिकः ॥ ३० ॥ कल्पान्त इदमादाय शयानेऽम्भस्युदन्वतः ॥ शिशयिषोरनुप्राणं विविशेऽन्तरहं विभोः ॥ ३१ ॥
नाम्नीति शेषः ॥ २२ ॥ कालेनावसरे कालान्तरे प्रादुरभूत ॥ आविर्बभूव ॥ कस्मादिव सौदामिनी विद्युदिव ॥ ॥ नित्यं देवानिमादामिनीति विद्युद्विशेषः स्फुरदुत्तरशब्दाद्यार्थः दामनीलातिज्ञसमवायोऽस्ति स्मरसिनीमालाका रम्यार्थः ॥ यद्वा सत्यापर्वतः तेनैव द्विगिरिः तिष्ठ वागणाः ॥ स्फटिकाद्रिस्वपर्वततप्रान्ते भवाहि विद्यु त्स्फुरणमवतीनहृदिस्थर्थः ॥ यद्वा तडिदिद्युतिकस्थार्थः ॥ तडिदेतिक वाध्याशिति नेकत्रस्मरणा

श्री॰
भाग॰
टी॰
५९

प्रयुज्यमानेमयितामित्यत्रयमज्ञार्थः द्विवावरमिदं लोकं गंनाम ज्वननामसीति यामागवतीमग
वेतार्थदर्शनाम् हृष्यवमयीतत्रः ॥ प्रतिष्ठानाम प्रतिभागवतामत्रिप्रयुज्यमानेनीयमानेस्वारब्धं
यत्के मेवनावृर्णामयमाप्रेयस्त्रकर्मणः सुनिर्वाणामविद्धिमीत्ययमेतिवाप्तः पंचमनात्मकादे
होमयतन ॥ स्तेनेवपार्श्वदंतवनामकर्माः स्वेनस्व द्वेनित्यवरस्यादिस्मचितामिति ॥ ३५ ॥ इदंत्रैलोक्य
माद्रायावसंह मादत्वत ॥ एकाणांवस्याम स्निशाया नेश्रीनामयतोकिशायिषोः शायनकतामिश्चः
विभोश्रुत्वतोंनवेधामवप्राणांतिः स्वात्मनस्क विविशेप्रविष्टाहेस्वात्मनेपद्दत्यांवः ॥ ततोवनीयवि
शान्मावियत्रविक्रिणः ॥ श्रवापवैस्मदीनिद्रामकीभयायाविष्णुनेति हूर्मोतेः ॥ स्वात्मनेमयिपाठे

प्रयुज्यमानेमयितांस्व द्धांभागवतीतत्रं ॥ स्वात्मकमतिनिर्वाणोमपतत्यांवमौतिकः ॥ ३६
कल्पांतहृदमादायशयानेमस्तुदत्वतः ॥ शिशायिषोरनुप्राणंविविशेतरहप्रभोः ॥ ३७ ॥ स
हस्वपुरुगवर्येतदृश्याये देसिस्वतः ॥ मतिविभिन्नाग्रुनयः प्राणोम्योदेवनतिरे ॥ ३८ ॥ प्रोतवे
द्विस्वलोकाह्वीमर्येपस्कदितवृतः ॥ अनुग्रहाम्महाविष्णोरविद्वानगतिंक्वचित ॥ ३९ ॥ दे
वदत्तामिमांवीणांस्वरब्रह्मविभूषितां ॥ मूर्छयित्वाहरिकथ्यांगायमानश्चराम्यहं ॥ ४० ॥ प्र
गायतःस्ववीर्याणितीर्थपादःप्रियश्रवाः ॥ आहूतइवमेशीघ्रंदर्शनंयातिचेतसि ॥ ४१ ॥ ए
तद्ध्यातुरचित्तानांमात्रास्पर्शेच्छयामुहुः ॥ भवसिंधुप्लवोदृष्टोहरिचर्यानुवर्णनं ॥ ४२ ॥ य
मादिभिर्योगपथैःकामलोभहतोमुहुः ॥ मुकुंदसेवयायद्वत्तथाद्धात्मानशाम्यति ॥ ४३ ॥ इदं
स्वायंभुवस्वात्मनेम् लिखितशायिको वैश्वानर इति ॥ श्रीनारायणोनामदाविब्रह्मणोकामितितामयित
त्वा ॥ ३ ॥ प्राणेभ्यइंद्रियेभ्योहंमरीचिमिश्रास्तनुभ्योऽस्वपन्नुजन्तीरप्तमुमिश्रनोवृत्तणः ॥ ३ ॥ यके
मितत्वदाहयोनितवस्त्रादिमिर्वेत्वलोकगताः स्वतेयातिमहेन्द्रमहाविष्णोरनुग्रहाद्देवर्षिवृत्त
वर्णनः सत्वेनवदि सुपर्वमिपर्वहामिकविदश्चविद्यानामप्रतिहतागतिर्येषाः किमितिपदमोस्वात्मेया
लोकमन्तोयामिमतस्त्राहचलोर्ति ॥ ३२ ॥ देवतेय्युक्तादत्तामताः ॥ निषादरवमूर्णायामप्रत्यादेवत
पंचमञ्चतिमत्वरदत्वस्वाभिध्यजकतातनेनाविभक्तितानवतःमितह समस्वरामित्यर्थः मूर्छयित्वापू

कैन्मासनवीभ्रिक्रिमितनवत्कनिरान्मृ ॥ ॥ अत्रदंम्वनिनितमेट्टात्सः
दिन्ति ॥ ७ ॥

मात्रा विषयास्तेषां स्पर्शा भोगास्तेषामिच्छया आतुराणि चित्तानि येषां तेषां हरिचर्यानुवर्णनं यदेतद्
वभवसिंधोः प्लवः पोतः नैकेवलं श्रुतिशास्त्राभ्यां न ॥ किंत्वन्वयव्यतिरेकाभ्यामाह यथैवेत्यर्थः ॥ एतदेवानु
रूपवधारणतया प्रभवेनेदृढयति ॥ ३५ ॥ यमादिभिः तथा न शाम्यति यथा मुकुन्दसेवया आशु ह्रासा शांता
आत्मा मनः शाम्यतीति कथं विमुकुंदसेवामात्रेण शाम्यतीति किं पुनः न कृष्णवर्णनेनेत्यभिप्रायः ॥ ३६ ॥ इति
सर्वमपटीका । भवतो मनः परितोषकं व्याख्यातं ॥ ३७ ॥ आमंत्र्याज्ञाप्य यादृच्छिकः स्वप्रयोजनं नास्त्यस्य

सर्वं तदिदमाख्यातं यत्पृष्टोहमिहानघ ॥ जन्मकर्मरहस्यं मे भवतश्चात्मतोषणं ॥ ३७ ॥ सू-
तः ॥ एवं संभाष्य भगवान्नारदो वासवीसुतं ॥ आमंत्र्य वीणां रणयन्ययौ यादृच्छिको मुनिः ॥ ३८ ॥
अहो देवर्षिर्धन्योयं यत्कीर्तिं शार्ङ्गधन्वनः ॥ गायन्माद्यन्निदं तंत्र्या रमयत्यातुरं जगत् ॥ ३९ ॥
इति श्रीप्रथमस्कंधे षष्ठोध्यायः ॥ ६ ॥ शौनकः ॥ निर्गते नारदे सूत भगवान्बादरायणः ॥ श्रुतवां-
स्तदभिप्रेतं ततः किमकरोद्विभुः ॥ १ ॥ सूतः ॥ ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे ॥ शम्या-
प्रास इति प्रोक्त ऋषीणां सत्रवर्धनः ॥ २ ॥ तस्मिन्स्व आश्रमे व्यासो बदरीषंडमंडिते ॥ आसी-
नोप उपस्पृश्य प्रणिदध्यौ मनः स्वयं ॥ ३ ॥

पूरकः हरिकथा गायकस्य भाग्यं श्लाघते ॥ अहो इति ॥ ३८ ॥ माद्यन्हृष्यन् तंत्र्या वीणया ॥ ३९ ॥ इति
प्रथमे षष्ठः ॥ अथ भागवतश्रोतुर्जन्मवक्तुः परीक्षितः ॥ स्तम्भवालवधाद्युपोद्घातः सप्तमे उच्यते ॥ तस्य ना-
रदस्याभिप्रायं श्रुतवान् ॥ १ ॥ ब्रह्मनद्यां ब्राह्मणैः शश्विनापां ब्रह्मदेसाधो वा सत्रे कर्म वर्धयतीति तथा
॥ २ ॥ बदरीणां समूहेन खंडेन मंडिते मनः ॥ प्रणिदध्यौ स्थिरीचकार समाधिनानुसस्मरेति ॥ नारदेनोप-
दिष्टध्यानेन हृतवानिमर्थः ॥ ३ ॥

प्रणिहिते निश्चले सम्यगवहिते भक्तियोगेनामले पूर्वं स पुरुषमपश्यदित्यर्थः पूर्णं ईश्वरं इति वा
पाठः॥ तदपाश्रयां ईश्वराश्रयां तदधीनां मायां चापश्यत्॥ ईशमायाकृतानर्थं च जीवानां सोऽपश्यदित्याह॥४॥ यया संमोहितः स्वरूपावरणेन विक्षिप्तः परोऽपि गुणत्रयाद्व्यतिरिक्तोऽपि आत्मानं त्रि
गुणात्माभिमानकृतमनर्थं च कर्तृत्वादिकं प्राप्नोति॥५॥ अनर्थोपशमं पतीति यः साक्षादधोक्षजे भक्ति
योगः तं चापश्यत् एतत्सर्वं स्वयं दृष्ट्वा अजानतो लोकस्यार्थे सात्वतसंहितां श्रीभागवताख्यां च
के तदनेन श्लोकत्रयेण भागवतार्थः संक्षेपतो दर्शितः॥६॥ संहितायाश्चानर्थोपशमकत्वं दर्शयति॥ य

भक्तियोगेन मनसि सम्यक्प्रणिहितेमले॥ अपश्यत्पुरुषं पूर्णं मायां च तदपाश्रयां॥४॥ य
या संमोहितो जीव आत्मानं त्रिगुणात्मकं॥ परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते॥५॥ अन
र्थोपशमं साक्षाद्भक्तियोगमधोक्षजे॥ लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहितां॥६॥
यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे॥ भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा॥७॥ स सं
हितां भागवतीं कृत्वानुक्रम्य चात्मजं॥ शुकमध्यापयामास निवृत्तिनिरतं मुनिः॥८॥
शौनकः॥ स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः॥ कस्य वा महतीमेतामात्मारामः सम
भ्यसेत॥९॥

स्यां श्रूयमाणायामेव किं पुनः॥ कृतायामित्यर्थः॥ सप्तकमस्य शोधयित्वा॥ एतदुक्तं भवति॥ विद्याश
क्त्या मायया नियंता नित्याविर्भूतपरमानंदस्वरूपः सर्वज्ञः सर्वशक्तिरीश्वरः तन्मायया संमोहितः
तिरोभूतस्वरूपः तद्विपरीतधर्मा जीवः॥ तस्य चेश्वरभक्त्या लब्धज्ञानेन मोक्ष इति॥ तदुक्तं स्वामिना
ह्लादिन्या संविदाश्लिष्टः सच्चिदानंद ईश्वरः॥ स्वाविद्यासंवृतो जीवः संक्लेशनिकराकरः॥ तथा॥ स
ईशो यद्वशे माया स जीवो यस्तयार्दितः॥ स्वाविर्भूतपरानंदः स्वाविर्भूतसुदुःखभूः॥ स्वादृगुत्थ
विपर्यासभवभेदजभीशुचः॥ यन्मायया जुषन्नास्ते तमिमं नृहरिं नुमः इत्यादि॥८॥ कस्य वा हेतो

निर्ग्रंथा अपि ये मुनयो निर्गतास्तः॥ तदुक्तं गीतासु॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति॥ तदा गंतासि नि
र्वेदं श्रोतव्यस्य श्रुतस्य चेति॥ यद्वा ग्रंथार्थाववग्रंथः निर्वृत्ता हृदयग्रंथयो येषां ते तथा॥ ननु मुक्तानां किमनया
सादि सर्वा हेय एव सिद्धावर्थमाह॥ इत्थंभूतगुणो हरिरिति॥ ननु भक्तिं कुर्वंतीति नाम एतदुक्तं ज्ञानात्मना भक्तकुक्षिं
कारणमित्याह॥ हरेरिति॥ १०॥ अथ भगवद्धीनवान् विष्णुजनाः प्रियाय यस्येति स्वाख्यानादि प्रसंगेन तस्ये
गुणिकामृतिमावः एतेन तस्य श्रावमहायोगी नादिनामकुक्यास्यान उपरतिः कथमिति पृष्टं तत्रोत्त
रवक्तुं श्रारंभे परस्परसंपरीक्षितः॥ आवेशेन श्रवणं कथामिति॥ तस्य जन्ममहाश्रुर्यमित्यादिना
तस्यो नरवक्तुमाह परीक्षित इति॥ ११॥ विलापनेन तेषु तिवासंस्थामहा अस्या न ग्रीष्मकथा नाथ द

श्रीसूत उवाच॥ आत्मानमात्मना श्रुत्वा यो विग्रंथा अपि पुरुहक्रमे॥ ऊर्ध्वं समर्पितं कीमक्ति मित्थंभूत गुणो ह
रिः॥ १०॥ हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः॥ अध्यगान्महदाख्यानं नित्यं विष्णुज
नप्रियः॥ ११॥ परीक्षितोऽथ राजर्षेर्जन्मकर्मविलापनं॥ संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथो
दयं॥ १२॥ यदा मृधे कौरवसृंजयानां वीरेष्वथो वीरगतिं गतेषु॥ वृकोदराविद्धगदाभिमर्श
भग्नोरुदंडे धृतराष्ट्रपुत्रे॥ १३॥ भर्तुः प्रियं द्रौणिरिति स्म पश्यन्कृष्णासुतानां स्वपतां शिरांसि
उपाहरद्विप्रियमेव तस्य जुगुप्सितं कर्म विगर्हयंति॥ १४॥

योपयामवति तया॥ परीक्षितो जन्मनिरूपयिष्यत्रादौ तावत्तन्मस्थ्यपवास्य त्यासन्नावत्तात्स्माक
स्मात्रहितत्वात्तु कथा प्रस्तौति यदेत्यादि॥ १३॥ यदा द्रौणिराश्वत्थामा दिवा हि पुत्राणां शिरांसि
प्राहरत् तत्कालादारभ्य ता वचनाव यत किरीट माली श्रुत्वा ग्राहयति तदा नायचाव्यपः किमिति वाक्ला
नारिप्रारंभ सिंप्सुरी न बानिमुपेत्य याचाम हम येषु ह्य यदा पपात्वा: कृष्णाय वत यार्विक्षा जय वेशनो दृह
कथ्: पादावा ना स्मिना पतिरि लिहम न पाना मित्रं वीरगति स्वर्गगति प्राप्ताम् तमाह कालदर्शना विह्वाया
न ह्या प्राप्त मर्म दामात्रा ते नमग्ना न हृदय ड ये मनचाम तथ तन्नाह्न ड यीध न साति॥ १४॥ भर्तुर्दुर्योधनस्य प्रिय
मिति तर्कः इति एवं स्वानं इति पश्यन् नस्वत हि प्रियमेव तिवाक्यान्तरोगाविप्रियत हु तः जगुप्सितं प्रति वा

श्री°
माप्र°
टी°
२८

वाग्मस्य कुलानि विदुमिः आजलेसुविलीयस्मा: साकिरीटस्यैक नेपितदशाग्गेन वङ्गवाकिरीट
मालीत्युक्त ॥१४॥ प्रव: शोकासूतिनमभूजानमिपरिमाजियामियघदा बुलबंधोबुललेनधृमस्मात
नाथिनइति ॥ श्रुप्रिहागराद्भैवशासुपालिधनावर: हेत्रदासहरसैवृषडेनप्रानलाथिन: इतिस्मरणा
त ॥ श्रवाननाथीशासुपालितेनवभुवहरुनलस्यतेगोड्डीवाङ्कभुषोमूकैविशिवैवीलोहणाहरनत्समीप
भुपनयामियक्तिरस्माकुमारनेविधाघटायपुत्रासनी ॥१५॥ वल्गुवोरम्याविचित्राजनन्मायावल्गानिते:
समुजेन: स्वकनणवमित्रेरन: वघस्यहेसिनोवद्धकवरगेधनुस्ताघयस्यकपिहर्नेमान्धुजेयस्मत: ॥

मानानृनानांनिधनेशिशूनांनिशम्यघोरंपरितप्यमाना ॥ उपाहरद्दाष्यकलाङ्कला
त्रीनांमालयन्नाहकिरीटमाली ॥१५॥ तदाशुचलेप्रमृजामिभद्रेयद्ब्रह्मबंधो: शिरआ
ततायिन: ॥ गांडीवमुक्तैर्विशिखैरुपाहरेत्वाक्रम्ययत्स्नास्यसिदग्धपुत्रा ॥१६॥ इतिप्रिया
वल्गुविचित्रजल्पै: ससांत्वयित्वाच्युतमित्रसूत: ॥ अन्वाद्रवद्दंसितउग्रधन्वाकपिध्वजोगुरु
पुत्रंरथेन ॥१७॥ तमापतंतंसविलक्ष्यदूरात्कुमारहोद्विग्नमनारथेन ॥ पराद्रवत्प्राणपरीप्सुरु
र्व्यांयावद्गमंरुद्रभयाद्यथार्क: ॥१८॥

गुरो: पुत्रंरथेनानुधावन ॥१७॥ आपतंतंमनुधावंतंसद्रौणि: कुमारहाबालघातीअर्कंपितहृदय: ॥ प्राणा
परीप्सु: प्राणान्रक्षितुमिच्छु: ॥ ननुकीर्तिर्यावद्गमंनेशकंतावदुर्व्यांपराद्रवत्पलायतकेवलाहरोगोप्यना
स्तेतोपबुगुप्यत: सवक: रुद्रस्मभयाद्यथापलायतेस्म ॥ पलायताकंइतिवापाठ ॥ वामनपुराणेकथा
सचिता ॥ तथाहि विद्युन्माली नामराक्षसोमाहेश्वर: कश्चित्तस्मैरुद्रेणसौवर्णविमानंदत्तंतेनतासार्कं
स्पर्धयहुत्तोधास्यल्लिमानदीप्यासरात्रिंविलापितवान् ॥ ततोर्केणनिजतेजोभिद्रावयित्वातद्विमानंपा
तितंतत्कुनाद्रुपितेरुद्रे ॥ भयाद्दर्क: पराद्रवत् ॥ ततोरुद्रमरुद्दृष्ट्वादहेयमान: पतत ॥ वाराणस्यां
पतित: लोलार्कनाम्नाविख्यातोजात: ॥१८॥

अश्वश्यांगनरहितं नत्रु पलायनमेवाद्व कमलिननस्यापि कैश्चित्तनानाइत्याह ॥ श्रीनार्वाजिनोयु २२
क्तेत्युक्तलिग्निरोम्नुपुत्रात्मुद्विजात्मजःस्मदीयेदर्शितमाह ॥१९॥ तदुक्ताल्लोत्सुमनाहितः कृतध्यानडपस
स्पृश्यजलं ततोऽपिमेधानदेहतःप्राणकृष्णइति ॥२०॥ ततोऽस्त्राण्कर्वितोदिशांप्रकर्षमेवेत्तेजोमिषिबद्धनं
तःप्राणापदममिप्रेस्वप्रच्यतेविनापिमेशश्वमत्यानि ॥२१॥ सत्तेहितोदिह्यमानानानासम्प्रव
र्गःअपवर्जवितानाशकरस्यर्थः ॥२२॥ यतःतमीश्वरःसाक्षात्कृतोयतःप्रकृतेःपरःपुरुषःतत्कृतो
यत्तस्त्रायःकारणंकारणत्वेपविकारिणमाह ॥ मायांयमेदस्मायिमूयकैवल्यरूपेआत्मनिमवस्थित

यदाशरणमस्मानमैत्रतश्यानवाजिने ॥ अस्त्रंब्रह्मशिरोमत्वेप्राणत्राणेद्विजात्मजः ।
१९॥ अथोपस्पृश्यसलिलंसंदधेतत्समाहितः ॥ अजानन्नपिसंहारंप्राणकृच्छ्रउपस्थिते ॥
२०॥ ततःप्रादुरभूत्तेजःप्रचंडंसर्वतोदिशं ॥ प्राणापदममिप्रेक्ष्यविष्णुंजिष्णुरुवाचह ॥२१॥
अर्जुनउवाच ॥ कृष्णकृष्णमहाबाहो भक्तानामभयंकर ॥ त्वमेकोदह्यमानानामपवर्गोसि
संसृते ॥२२॥ त्वमाद्यःपुरुषःसाक्षादीश्वरःप्रकृतेःपरः ॥ मायांव्युदस्यचिच्छक्त्याकैवल्येस्थि
तआत्मनि ॥२३॥ सएवजीवलोकस्यमायामोहितचेतसः ॥ विधत्सेस्वेनवीर्येणश्रेयोधर्मा
दिलक्षणं ॥२४॥ तथायंचावतारस्तेभुवोभारजिहीर्षया ॥ स्वानांचानन्यभावाना
मनुध्यानायचासकृत् ॥२५॥ किमिदंस्वित्कुतोवेतिदेवदेवनवेद्म्यहं ॥ सर्वतोमुखमा
याति तेजःपरमदारुणं ॥२६॥ श्रीभगवानुवाच ॥ वेत्थेदंद्रोणपुत्रस्यब्राह्ममस्त्रंप्रदर्शितं ॥ नैवासौ
इति ॥ त्रिवर्णहानापितममेवेत्याहस्यइति ॥२३॥ यत्त्वमायामभिभूयस्थितः सएवमायाभिभूतस्य जन
स्यधर्मादिफलंपुषासितःसतविधत्सेवीर्येणप्रभावेनतथावतारेणावतारेणतवसाधपक्षपातेल
स्यतेइत्याहतथेति ॥२४॥ किमुभारहरणमहितक्रमोचरणमभक्तितत्राह ॥ स्वानांत्वानीनोभक्तानाम
नुध्यानायतथानन्यभावानामपिकामनाक्तानांचैवत्वत्तत्वातेहितायचेति ॥२५॥ किमाश्वदहंकतो
वायातीति ॥ विहितकं ॥२६॥ २६ द्रोणपुत्रस्यब्रह्मास्त्रमितिनवप्राणबाधप्राप्तेस्मदर्शितकेवलतत्तस्यया

श्री
मा°
दे°
२२

प्रसन्नवक्त्रं पूर्णेन्दुबिम्बानुकारि कान्तिमत् ॥ अत्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण ।
प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥ २८ ॥ दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ।
प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥ २९ ॥ देवि प्रसीद परमा भवती भवाय सद्यो विनाशयसि कोपवती कुलानि ।
विज्ञातमेतदधुनैव यदस्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य ॥ ३० ॥ ते सम्मता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति धर्मवर्गः ।
धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवती प्रसन्ना ॥ ३१ ॥ धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति ।
स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥ ३२ ॥ दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॥ ३३ ॥ एभिर्हतैर्जगदुपैति सुखं तथैते कुर्वन्तु नाम नरकाय चिराय पापम् ।
संग्राममृत्युमधिगम्य दिवं प्रयान्तु मत्वेति नूनमहितान्विनिहंसि देवि ॥ ३४ ॥ दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ।
लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ॥ ३५ ॥ खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ।
यन्नागता विलयमंशुमदिन्दुखण्डयोग्याननं तव विलोकयतां तदेतत् ॥ ३६ ॥ दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ।
वीर्यं च हन्तृ हृतदेवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥ ३७ ॥ केनोपमा भवतु तेऽस्य पराक्रमस्य रूपं च शत्रुभयकार्यतिहारि कुत्र ।
चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥ ३८ ॥ त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मदसुरारिभवं नमस्ते ॥ ३९ ॥ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ ४० ॥ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ ४१ ॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते । यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् ॥ ४२ ॥ खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान्रक्ष सर्वतः ॥ ४३ ॥ ऋषिरुवाच ॥ एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ॥ अर्चिता जगतां धात्री तथा गन्धानुलेपनैः ॥ ४४ ॥ भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता ।
प्राह प्रसादसुमुखी समस्तान्प्रणतान्सुरान् ॥ ४५ ॥ देव्युवाच ॥ व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम् ॥ ४६ ॥ देवा ऊचुः ॥ भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते ।

२२

न हृष्यो द्वेष्टि नमस्यः नमोऽस्त्वि प्रियः पुरुषार्थः यथा नो देवः प्रायशः स्थितस्तस्य हिताहितो विपाकः सत्स्वभावेन धर्मार्थास्तिनस्तदारे
स्मरति ॥ राजर्षिर्धर्मनेदं दुष्कृतं नापापानि समानत्वात् ॥ विधृतेऽकल्मषाणि योगिनि स्वर्गोऽस्ति कृतिनां यद्यपि तु ॥
न दर्शो वध्यतां पापं मानवः ॥ ३४ ॥ यद्यपि विवादितः नयाऽविकल्पेन बुद्धेः प्रसन्नस्य तु देवमपि
यत्नो महान् ॥ ३५ ॥ गोविन्दप्रियः सारथिर्यस्य प्राज्ञो जानश्शोचेयः ॥ ३६ ॥ नयापि समाधेर्नाहं नमस्यीते
कर्माणि तु पुरुषस्य नेदं च न तस्य पुत्रमपत्यं न मम पत्यं प्रागिति कृपया लिपिद्ध्यानेन शीघ्रं नः स्वयं वापि
स्तः स मनामर्दं वा च वेत्ति ॥ चक्रायुधे नमः स्मरः सविता वेदने मानवयमहे तीर्थमसंस्मानां ॥ ३७ ॥
स्वप्राप्यं नः परमात्मा पुरुषान्निग्रहं बलः ॥ न हृष्यानन्दं मोहं त्रिपयो परिहाय यामाप्तवः
पुमान् ॥ ३८ ॥ प्रतिश्रुतेनमवतां पांचाली स्मृत्वा तेनामम ॥ प्राप्नोति योगिनां यथा स्वयमात्मनि
विशुद्धः ॥ ३९ ॥ न दर्शो वध्यतां पापं प्राज्ञः न तत्परं बन्धकः ॥ मन्ये स्वर्गं विप्रियं वीरकुले बान्धुः
लप्तः स्वः ॥ ४० ॥ पुण्यं पवित्रं तत्र धर्मं पार्थः कृष्णे न वादितः ॥ वेदाध्ययनेन तु तत्तथा यथा त्याज्य
स्वयं महान् ॥ ४१ ॥ सर्वपापेभ्यस्तु विशिरो गोविन्दप्रियसारथिः ॥ सावधानं प्रियं यज्ञं वक्ष्या
यामस्तु ज्ञात्वा ॥ ४२ ॥ नयाहं नेयं पश्यतां पापं वक्ष्यामि स्वयं विकर्मजं पापं नेन ॥ निःशेषं
कृतार्थं नेत्रेऽस्मिन् वासनाशमवाप्य कृत्स्नं ज्ञातमनामय ॥ ४३ ॥ उवाच नाम हतं पापं बन्धनाद्यनेन
ते ॥ पुण्यं तं पुण्यमनामयं प्राणे लोकोत्तमं गुरुः ॥ ४४ ॥ सत्यं स्वधर्मं वेदः सर्वविसर्गान्विमुच्यते
प्रत्यगात्मस्थं महान्तं वि तत्पदं गुरवः ॥ ४५ ॥ सर्वसुखमनवाप्तं प्राणः पुण्यात्मा च तेन
ततः सर्वं धर्मं सत्यं नाम्नि हरिः कृपाः ॥ ४६ ॥ न दर्शनं महाभागवतं विष्णुगोविन्दमेव ॥ बुद्धि
ज्ञाने मोक्षे तु परमं नाम स्वर्गं मम ॥ ४७ ॥ मातापितृभ्यां सह न तीर्णं नामापि तु देवता ॥ यथा
जितेन्द्रियः प्राप्तं स्वर्गं मृत्युं सर्वं न सांख्यः ॥ ४८ ॥ सान्त्वे संहितायां सर्वं तस्य हृदः ॥ ४९
सा दृष्ट्वा सोऽगमत्स्वर्गं हि तद्विमर्शः स्वप्रयोगः उवाच परमं पदं प्रह्लादः सायुज्यं ततो यमः
किं वक्ष्यामि तत्समाना देवता कथं कृष्णं प्राप्तव्यं ततः पतिः प्राप्य बान्धवः सुखं नापि पतिं तत्र
तः नायापत्नी प्रविश्य दृष्टा सा चित्तं तु वसुधा पार्थिवानां तस्मात् रक्षमाणा ततो नक्षत्रे
सा जीवन्तीव नाम नारदं ततो न स्वर्गं वीरः पुण्यवती ॥ ५० ॥ नमस्कृत्य ततः सर्वं विद्धि सर्वगं ॥ ५१

दे॰ स्नत्नवत्साति हेदिप्यक्रमवर्षो मृदुः ॥ ४० ॥

नृनाईतिपनोवेघोपृजेच ॥ ४६ ॥ मत्नवत्साष्टतनघ्नाविवदे
दोबमाकर्ष्येरिति ॥ ४७ ॥

श्री
भा॰प्र॰
टी॰
२३

नेवांग न स्मानोऽकुलेक सकृत्थं भनेस्मान्नवंधं सपरिवारं स्वाशोकेनार्दितं आमं ब्रह्मकुलेकस्य
इहति ॥ ८८ धर्मविमाद यो व न सः खड्गपाणिः पूर्वश्लोकमाह इष्वाः तं च धर्मं धर्मिदं न वेनस्य
यानेऽपुच्यनामिति न्याय्येनायास्य दत्त्वेनेन सह स्मामिमादि ॥ ४ ॥ मक रुणेन स्मान्मनोऽर्थयितिति ॥ इ
निर्व्यलीकं तं धर्मं नेति ॥ ५ ॥ सप्रमाणेदीदिति द्विजः स्वमाप्नोतेः ॥ ६ ॥ मह न येः कोपितमितिति
हुतोत्मादिति नोपदेशात ॥ ६ ॥ एवं सर्वे नगानेव वा हहिजाः प्रमवेदनेस्व उमोदितवान् ॥ ७८ ॥ नकु
लादयश्च प्रमनेदनपुत्र यानः मामकिः ॥ ७० ॥ नमनेया विधमा हेलोर्वंधोपवश्रेष्ठः प्रमयास्य
नरकपातप्रसंगात ॥ तदाह ॥ नमनिरितित्रहदजघान ॥ ७९ ॥ वनस्थे जाके रंघमावः ॥ भीमव नहंतु
ये: कोपितं ब्रह्मकुलं राजन्मैरज्जि मानमिः ॥ नकुलेपदह्त्याप्रमानुवंधं स्ववादितं ॥ ७८
सूतः ॥ धर्मस्याध्यमकं रूणां निर्व्यलीकं समसमदनं ॥ रम्नाधर्मविनेनाप्यात्याः प्रमनेदह वाहि
जः ॥ ८८ ॥ नकुलः सहदेवश्च युयुधानो धनंजयः ॥ भगवान्देवकीपुत्रो ये चान्ये याश्च योषि
तः ॥ ५० ॥ तत्राहामर्षितो भीमः तस्य श्रेयान्वधः स्मृतः ॥ नमनेगासन श्वार्थं पोहकमान
शिरश्छिन्नस्या ॥ ५१ ॥ निशम्य भीमगदितं द्रौपद्याश्च चतुर्भुजः ॥ आलोक्य वदनं सख्युरिदमा
ह हसन्निव ॥ ५२ ॥ श्रीभगवानुवाच ॥ ब्रह्मबंधुर्न हंतव्य आततायी वधार्हणः ॥ मयैवोभय
माम्नातं परिपाह्यनुशासनं ॥ ५३ ॥ कुरु प्रतिश्रुतं सत्यं यत्तत्सांत्वयता प्रियां ॥ प्रियं पांचाल्यास
नमर्षणाद्यस्य मसवचः ॥ ५४ ॥ सूतः ॥ अर्जुनः सहसाज्ञाय हरेर्हार्दमथासिना ॥ मणिं जहार
मूर्धन्यं द्विजस्य सहमूर्धजं ॥ ५५ ॥ विमुच्य रशनाबद्धं बालहत्याहतप्रभं ॥ तेजसा मणिना हीनं
शिबिरान्निरयापयत् ॥ वपनं द्रविणादानं स्थानान्निर्यापणं तथा ॥ एष हि ब्रह्मबंधूनां वधो नान्योऽस्ति दैहिकः ॥ ५६ ॥ पुत्रशोकातुराः सर्वे पांडवाः सह कृष्णया ॥ स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं ॥ ५७ ॥

प्रश्नतेदोपयाचसहसमानविवारणोपश्चनायाश्चमघोः सवारणोपाविष्कृतः चतुर्भुजः सोदिहान
सासमुः अर्जुनस्य ॥ ५२ ॥ बधार्हणाः बधार्हो मयाप एवशान्तु कृष्णालोनहमव्यः मया ॥ आत
तायिनमायान्तमपि वेदान्तपारगं ॥ जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत् ॥ इति वदनात् उभयम
नुपालय ॥ ५३ ॥ उवाच प्रतिज्ञां परयेति प्रियां सांत्वयिता नया यापत्यतिज्ञा तेन तेन वत तद्वयमक
रुमयमनते वधमीमसप्रियपवनिप्रवधं द्रौपद्याः हृदयं कुरुष्व ॥ ५४ ॥ हार्दं मनमप्रायं मसाहृदयंता
नायाराकवश्मपंविदध्यानं प्रतेतयमसिमध्यदरिता तस्यार्थः अमितावद्दनमधिजातसकेशं ॥ ५५
तेजसा मणिना हीनं निरयापयत् शिविरान्निर्वान ॥ अन्वन्हकेशा कृमवस्थादितंह स्यात् ॥ ५६ ॥ २३

निर्हरणं दाहार्थं नयनं ॥५८॥ इति श्री प्रथमे सप्तमः ॥७॥ अथ मे कुपिता द्रौणिरस्त्राद्दग्धापि धीहितः ॥ श्रीकृ
ष्णस्तुतिं कृत्वा पार्थः शोकस्य कीर्तने ॥ ते पांडवाः संपरेतानां मृतानां गंगायां उदके दाने सकृष्णाः कृष्णेन
सहिताः स्त्रियः अस्वकृत्य पुरतः कृत्वा तस्मिन् कार्ये स्त्रीपुरःसरत्वं विधानात् ॥१॥ निनीय दत्त्वा सरित्
दत्त्वा जलोर्मिः पूतां यासां विनगंगा तस्यां जलेषु नरं गुरुं दत्तो दाबविस्तारा गंगा माते ॥२॥ कुरुपतिं युधिष्ठिरं स
तं जम्भीनाहितिः सहितं ॥३॥ मुनिभिः सहितः ॥४॥ कितवैर्धूर्तैर्दुर्योधनादिभिर्द्रौपद्याः कचग्रहण
रूपेन दुर्विनीता दातस्य नाशं प्रापयन्नत्र यत् ॥ एवं हिंसा स्त्रवैर्धर्मो बुद्धोत्पन्नः स्थित दे हिकः ॥९॥
पुत्रशोकार्ता राः सर्वपांडवाः सकृष्णसखा ॥ स्वानां मृतानां पर्यन्तं सर्वत्र निर्हरणं दिक ॥५८॥
इति श्री भागवते प्रथमे सप्तमः ॥७॥ अथ ते संपरेतानां स्वानामुदकमिच्छतां दातुं सकृष्णा गंगायां
पुरस्कृत्य ययुः स्त्रियः ॥१॥ ते निनीयोदकं सर्वे विलप्य च भृशं पुनः ॥ आप्लुता हरिपादाब्ज
रजःपूतसरिज्जले ॥२॥ तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजं ॥ गांधारीं पुत्रशोकार्तां पृथां
कृष्णां च माधवः ॥३॥ सांत्वयामास मुनिभिर्हतबंधून् शुचार्पितान् ॥ भूतेषु कालस्य गतिं दर्श
यन्नप्रतिक्रियां ॥४॥ साधयित्वाजातशत्रोः स्वराज्यं कितवैर्हृतं ॥ घातयित्वासतो राज्ञः कच
स्पर्शहतायुषः ॥५॥ याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः ॥ तद्यशः पावनं दिक्षु शत
मन्योरिवातनोत् ॥६॥ आमंत्र्य पांडुपुत्रांश्च शैनेयोद्धवसंयुतः ॥ द्वैपायनादिभिर्विप्रैः पूजितैः
प्रतिपूजितः ॥७॥ गंतुं कृतमतिर्ब्रह्मन् द्वारकां रथमास्थितः ॥ उपलेभेभिधावंतीमुत्तरां भयवि
ह्वलां ॥८॥ पाहि पाहि महायोगिन् देवदेव जगत्पते ॥ नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परं ॥९॥
दिभिः सत्तमगुर्वर्धा नानाव ॥५॥ याजयित्वेत्यादि भाविकथासंक्षेपः शतमन्योः शतक्रतोरिव
॥६॥ शैनेयः सात्यकिर्नेनमित्यात्मजः किं तेन ... रथमास्थितः सन् ॥७॥ उत्तरां ... भयवि
भिद्रवेत्याधावंती उपलेभे ददर्श ॥८॥ उत्तरा श्रीकृष्णं प्रार्थयति पाहि पाहीति द्वाभ्यां ॥ अन्यत्र प्रार्थना
याभावात् ॥ यत्र लोके मृत्युभयं परस्परं हिंसनं ... परस्परं मृत्युर्भवति ॥ न त्वत्तः अन्यमभय

श्रीं भा० टी० ४९

भ्रमि इव तिष्ठ मिमु वेमा यातितन मा यत्नं लोकस्मर्य शल्यं यस्मः ॥ प्रतिकार्यमेवमाह ॥ कामयिति ॥
कामयत्येकमाह इत्यागमोमातिषात्मतो ॥ २ ॥ संयोगो यो वेवक तेषः परमवे नातिक्रापि तन्म
ह्यतोः पाइव भ्रमामि इ विश्वकर्ते प्रह तेजला स्तुमबुधानत ॥ ४ ॥ अतएवव द्रुत्र वेनदाग तेमि तुके न
ह्येव ब्रह्मा स्तुस्ता स्त्रातोरेशनिवसेवान ॥ तद्गुः पार्थेदं व्यसनेवी हृष्टप्रवन्मा विद्य यस्त्रात्मा यथा सृकलि
ष्टानामि मल्यर्थः ॥ ६ ॥ वैराग्य उत्तरायाः श्रुतेः स्थः सन गर्भमाहु नवान् ॥ नवदेतर्य तसास्तात्मा आत्मनया
भ्रमि इव तिष्ठामेवशरत्नमा यथा विभो ॥ कामं इह तमेना यस्य सा मे नगमो नियात्मतो ॥ २ ॥ सं
तउवाच ॥ उवधार्य वद्रुतस्या गवा मा मक्र वसलः ॥ प्रणोइव मिदे कतैओ लोके इमबुधानत ॥ ५
न ह्येव वद्रुमुलितिश्रुत्य मनुवाः पंचमाय काव ॥ श्रामं नामिप्रुवोन्दी मानालइस्वास्वालिप्रपाद्युः
२ ॥ व्यसनेवी ह्यततेषाम नम विषयात्मनो ॥ स्वद शीनेनवात्मस्वात्मनो रहाम्यधाह्रियुः ॥
श्रात्मस्थः सर्वमतानामात्मयोगोस्थगोह रिः ॥ स्वमा यथा शृणु धर्म वैराग्यः क्रुत तव ॥
७ ॥ यद्यपास्त्व वलशिरः नमो येवाप्रुलि कियं ॥ वेसवं तेज श्रामाय समशाम्प्रदुर ह्रुद
८ ॥ मामस्या यतेदा श्रुयं सर्वोत्रु यमयवुम्मते ॥ यइन्माय या देवास्मजमवतिदमजः ॥ ९
ब्रह्मतेजो विनिमुतेमात्मजेः सहह सया ॥ प्रवात्मनोमिप्रुवेक्ष समिदमा दृश्यात्मनो ॥ १०
ऋतुवाच ॥ नमस्ते प्रकृ वेतायुमीश्वरं प्रकृतेः परं ॥ अलक्ष्य सर्वभूतानामन्तर्बहिरवस्थितं
११ ॥ मायाजवनिकाच्छन्नमज्ञाधोक्षजमव्ययं ॥ नलक्ष्यसे मूढदृशा नटो नाट्यधरो यथा
मीयोगे स्वरइतिवहिः स्यात्मा पित्र्वेशोहद नार्थप्रके ॥ क्रइतन तवेमतानाय वाइवानामपि
क्रुह वेशाजनताइव प्रके ॥ ७ ॥ श्रमोयमपतिक्रियचमपशाम्प्र तमपात तमासीत ॥ ८ ॥ एतद्रुलास्व
शामनेश्चात्मर्यमात्मख्याः मामन्मव ॥ ९ ॥ कृष्णाय वासुदेव ॥ १० ॥ नालीनमस्ते नमस्कृ गोविन्द कनिह
मोनमस्क राबीत्माह ॥ श्रायश्रु रुवेक्र तेः प्रकृतेः परं तत्त्वतः ईश्वर प्रकृतेत्याविनियतात्मतपवस
वेमतानामनवेह्रि स्व परतो नमावस्थितेतद्याप्यलक्ष्याणे तेदेतेत्मो इमायति ॥ ११ ॥ मायेवजवनिका
निसक्रतिलीनया क्रवनात्मइतस्तमायक्रियोगानामसतात्मवलेनमास्याति प्रतज्ञस्तानयस्मात्तेम
धोक्षज ॥ अत्र यथा यथा इति किं वनमव्ययं ॥ मूढदृशे केदेहाभिमानिताय्रुमालक्ष्यसे ॥ १२ ॥ ४९

देशं

किंच परमहंसानामात्मानात्मविवेकिनां तत्रापि मुनीनां मननशीलानाममलात्मनां निरस्त
रागादीनामपि तथा तेन निजमहिम्नानलक्ष्यसे ॥ अतो भक्तियोगं विधातुं त्वां वयं कथं पश्येम यद्
वा परमहंसानामपि भक्तियोगविधानार्थं त्वामात्मारामाणामप्यचिंत्यलिंजगुणैराकृष्य भक्तियोग
कारयितुमवतीर्णमित्यर्थः ॥ २० ॥ तावत्तत्त्वं रूपतःशक्त्या नमस्कारोमि केवलं नमस्करोति ॥ श्रीकृष्णाये
ति द्वाभ्यां ॥ २१ ॥ पंकजं नाभौ यस्य पंकजानां माला यस्य पंकजवत् सुप्रसन्ने नेत्रे यस्य पंकजांकितौ
अंघ्री यस्य तस्मै नमः केवलं नमस्करोति पंकजनाभायेति द्वाभ्यां ॥ २२ ॥ स्वप्रयोजनं प्रार्थयते ॥ मातुर्मत्तोप्यधिकानुग्रह उक्त
इति ॥ यथा हृषीकेश देवकी यथा देवकी कंसेन रुद्धापि विमोचिता अहमपि तद्वत्त्वयैव विमोचितेति का

यथा परमहंसानां मुनीनाममलात्मनां ॥ भक्तियोगविधानार्थं कथं पश्येम हि स्त्रि
यः ॥ २० ॥ कृष्णाय वासुदेवाय देवकीनंदनाय च ॥ नंदगोपकुमाराय गोविंदाय
नमो नमः ॥ २१ ॥ नमः पंकजनाभाय नमः पंकजमालिने ॥ नमः पंकजनेत्राय नमस्ते
पंकजांघ्रये ॥ २२ ॥ यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता
विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात् ॥ २३ ॥ विषान्महाग्नेः
पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः ॥ मृधे मृधेनेकमहारथास्त्रतो द्रौण्यस्त्र
तश्चास्म हरेभिरक्षिताः ॥ २४ ॥ विपदः संतु ताः शश्वत्तत्र तत्र जगद्गुरो ॥ भवतो दर्शनं यत्स्याद् [illegible]

कामहानिः विशेषः तेन विशेषेण दर्शयति तामितिचिरं रुद्धा सती तस्माद्देवस शुचा हि मोचिता ॥ तथा
शुचार्पिता सती न वृतस्याः पुत्राः हिंसिताः मुक्तिवांस्तानाय त्वमिति नाहं तथा तत्संबंधेन तनया अह
सुतानां विपद्गणान्नत्रापि पुरुः श्री कृष्णोचमात्मजा तत्र त्वयैव नाथेन तेन विपद्गणात् दर्शयति ॥ २३ ॥ विषा
न्भीमसेनविषभक्षणान्महाग्नेर्लाक्षागृहदाहात् पुरुषादो हिडिंबादयो हिंसाः तेषां दर्श
नात् असत्सभाया द्यूतसभायां वनवासकृच्छ्रतश्च द्वैतवने दुर्वाससः आपत्तेः ॥ २४ ॥ यत्र यत्र विपत् तत्र तत्र हि दर्श
ने नासिंह तदृशि भवदर्शनं येन स्यात् तद्भवतो दर्शनं भवदर्शनं पुनर्जन्म येन तदपुनर्भवदर्शनं ॥ न तु सम्पत्त्वेन
सदा दर्शनं मम अनेन विपद्गणान्तर्गता ॥ न किं विपदः प्रार्थ्यन्ते संपदस्तु भवदर्शनविरोधिन्य इत्याह ॥ जन्मैश्वर्य

[illegible] १८

श्री
भाग्र.
टी०
५१

जन्म सत्कुले जन्म आदिभिरेधमानो मदो यस्य सः ॥ अभिधातुं श्रीकृष्ण गोविंदेति वक्तुमपि नार्हति किं
च ना नाम कारणं विषयम् तस्मात् त्वम् अकिंचनगोचर इति ॥२६॥ अकिंचना भक्ता
एव वित्तं यस्य तस्मै नमः किं निवृत्ता गुणवृत्तयो धर्मार्थकामविषया यस्मात् ॥ तस्मै त
त एवात्मारामाय अत एव शांताय रागादिरहिताय किं च कैवल्यपतये कैवल्यदानसमर्थाय
२७॥ ननु देवकीपुत्रं मां कथमेवं स्तौषि तत्राह मन्ये त्वामिति ॥ मन्ये त्वां कालं नियंतारं देवकीपुत्रत्व
देन ईशानं नियंतारं स्वतंत्रं अनादिनिधनं अत एव विभुं समं यथा भवति तथा सर्वत्र चरंतं ॥
ननु पार्थसारथेः कथं समः स्यां तत्राह यद्यतः त्वत्तो निमित्तभूतात् भूतानां मिथः कलि
कलहो भवति न तु स्वतः तथापि वैषम्यं न तु निग्रहानुग्रहरूपत्वेपि वैषम्यं प्रसिद्धमत्राह

जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान् ॥ नैवार्हत्यभिधातुं वै त्वामकिंचनगोच
रं ॥२६॥ नमोकिंचनवित्ताय निवृत्तगुणवृत्तये ॥ आत्मारामाय शांताय कैवल्यपतये
नमः ॥२७॥ मन्ये त्वां कालमीशानमनादिनिधनं विभुं ॥ समं चरंतं सर्वत्र भूतानां यन्मि
थः कलिः ॥२८॥ न वेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडंबनं ॥ न यस्य क
श्चिद्दयितोस्ति कर्हिचिद्द्वेष्यश्च यस्मिन्विषमा मतिर्नृणां ॥२९॥ जन्म कर्म च विश्वात्म
न्नजस्याकर्तुरात्मनः ॥ तिर्यङ्नृषिषु यादःसु तदत्यंतविडंबनं ॥३०॥ गोप्याददे त्वयि कृता
गसि दाम तावद्या ते दशाश्रुकलिलांजनसंभ्रमाक्षं ॥ वक्त्रं निनीय भयभावनया स्थित
स्य सा मां विमोहयति भीरपि यद्बिभेति ॥३१॥

हनवृदति ॥२९॥ नृणां विडंबनं मनुष्यकरणेन ईहमानस्य कुर्वतः यस्मिंस्त्वयि विषमा मतिः ॥
ग्रह निग्रह रूपा भवति ॥३०॥ अजस्याजन्मनोऽकर्तुः कर्माणि तिर्यक्षु वराहादि रूपेण नृषु रामादि
रूपेण ऋषिषु वामनादि रूपेण यादःसु मत्स्यादि रूपेण तद्विडंबनमनुकरणमेव ॥ तदत्यंतविडंबनमिति ॥
गोप्येति ॥३१॥ गोपी यशोदा त्वयि कृतागसि दधिभांडस्फोटनं कृतवति या वद्दाम रज्जुमादद
ते गृहीतवती तावत् त्वल्लक्षणं दशा अवस्था सा मां विमोहयति किंभूतं तत्साक्षात्कलिलं व्याप्तं अश्रु
जनयेन अंजनेन च तत्र संभ्रमाकुले अक्षिणी यस्मिन् तत् वक्त्रं निनीय अधः कृत्वा ताडयि
ष्यतीति ॥ भयभावनया स्थितस्य यद्यस्माद्भीरपि त्वत्तो बिभेति भीतापि भवति तस्या यत्र त्वं दृष्टा ॥ से

५१

अनपवजगनोद्दनतया क्रूरैर्घनान्तवजनमादिवकृधावर्णयंती साहकेचिद्विनिवृत्तिभिः ॥ पुण्यश्लोक
स्य युधिष्ठिरस्य कीर्तयेयदोरेवकीर्तयध्वनिवामलायसेवकीर्तियेययावेदनमितिद्विवेदनेतया
२४ ॥ वसुदेवस्य भार्यायां देवक्यामजपवनसंभगात ॥ पुत्रत्वमितिशेषः प्रद्युम्नपुरुषः स्वार्थः ॥ अर्थविमिति
वापाठः स्वगमः ॥ नामामेवपूर्वेहत्वनवः प्रविष्टिस्त्वामायाचितः मन ॥ २६ ॥ जनस्य जगतः हेमायानाम्
वेनित्यलज्यार्यमस्याधामविवृद्वयामलांतां ॥ २७ ॥ परमात्वेदस्वरूपानुज्ञानमविघातनोदेहाध्यमिमाना
त्मानः ततः कर्माणितैः विघ्नतांत्रिशयमानानानातत्विहृतयेअवलागर्हालिकर्माणिकरिष्यत् ॥ अस्य
पत्तस्यसिद्धानतामसिद्धमत्रवलोदिफलमाह श्रृण्वंतीति ॥ २८ ॥ नंदंतिसुमेधः कीर्त्यमानमस्मिनंदंति
केचिदजरजंजान्तं पुण्यश्लोकस्य कीर्तये ॥ वदेः श्रियमाल्ववायेमलयसेवचंदने ॥ २४ ॥ अ
परेवसुदेवस्य देवक्यां याचितोऽभ्यगात ॥ अर्थवमस्य क्षेमाय वधाय च सुरद्विषां ॥ २६ ॥ भारावतार
णायान्ये भुवोनावइवोदधौ ॥ सीदंत्या भूरिभारेण जातो ह्यात्मभुवार्थितः ॥ २७ ॥ भवेस्मिन्क्लिश्य
मानानामविद्याकामकर्मभिः ॥ श्रवणस्मरणार्हाणि करिष्यन्निति केचन ॥ २८ ॥ शृण्वंति गायं
ति गृणंत्यभीक्ष्णशः स्मरंति नंदंति तवेहितं जनाः ॥ त एव पश्यंत्यचिरेण तावकं भवप्रवा
होपरमं पदांबुजं ॥ २९ ॥ अप्यद्य नस्त्वं स्वकृतेहित प्रभो जिहाससि स्वित्सुहृदोनुजीविनः
येषां न चान्यद्भवतः पदांबुजात्परायणं राजसु योजितांहसां ॥ ३० ॥
येजनाईहितंचरितंचरितंतावकंत्वदीयपदांबुजेनपव पश्यंत्येवाचिरेणवेत्तित्वमर्थवाचधारणां
कीहृशंभवप्रवाहस्य जन्मपरंपराया उपरमोयस्मिन्स्तत ॥ इदानीं तत्त्वम्मरणेनापरित्यागो वुचितइत्याशये
नाह अप्यद्येति चतुर्भिः ॥ २९ ॥ हे स्वकृतेहित हे प्रभो अनुजीविनस्त्वान्नोऽस्मान्त्वं जिहाससि किं येषामस्माकम
नन्यगतत्वं बोल्लिकृतेराजसुयोजितमंहोदुःखंयैस्तेषांत्वानां कृतमीकितमपीदितंयेनेतिसं
बोधनेविसर्गोनपाठे तेपदविशेषणंनन्वनवेधयायादवाः ॥ पुत्राश्च पाण्डवाः स्युरतः समर्थाः स्युरिति

श्री
भाग०
टी०
२६

यदि भवतः प्रदर्शनं यदा वयस्मान्न पश्यसि तदा नाम्नां दिव्यो नाम स्वेतसम्‌ ध्यावयद्‌भिः सहिताः पां
डवाः नाम केवलं न केवलं विक्षुनिस्तुत्याः इत्यर्थः ॥ नाममात्रे देव हृषीकानामीशितृ जीव स्वरूप दृशी न यथा
न किं विद्रुषं च नष्टुत ॥ ४० ॥ किंच ॥ यथेदानीं इयम समस्त्या ल्पाभिः सौरसाधारणो वज्रांकुशध्वजादिभिर्लक्ष
णैर्विलक्षितैः विक्रियतैः नवदेशं किलातीव भाति तथा न दानावधि निर्गते सति न शोभिष्यते ॥ ४२ ॥ अपि
च इमे जनपदा देशाः स्वृद्धाः सम्यक्‌ ऋद्धाः सन्तः गृह नेपोद्द्‌वा नाम अंकुशलयस सनेया द्वा नाम स्वय
तो व्याकुला चिनाः सती न बुद्धि तिष्ठति प्रार्थ्यते यैन्याह प्रशयत्ति ॥ ४४ ॥ विधि शेषादि सर्वा धवानि ।
सेवकेदृंसामर्थ्य व्योमवमाघ इ नेमसतंनतः किमत्र आह ॥ नद्यीति ॥ ४४ ॥ स्वनस्पविषयापतीभमाति
केव यु नाम रूपाभ्यां यदुभिः सह पाडवाः ॥ भवतो दर्शनं यर्हि हृषीकाणामिवेशितुः ॥ ३९
ने यं शोभिष्यते भूमिरधुना गदाधर ॥ त्वत्पदैरंकिता भाति स्वलक्षणविलक्षितैः ॥ ३२ ॥ इमे
जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः ॥ वनाद्रिनद्युदन्वंतो ह्येधंते तव वीक्षितैः ॥ ३३ ॥
अथ विश्वेश विश्वात्मन्‌ विश्वमूर्ते स्वकेषु मे ॥ स्नेहपाशमिमं छिंधि दृढं पांडुषु वृष्णिषु ॥ ३४ ॥
त्वयि मेनन्यविषया मतिर्मधुपतेसकृत ॥ रतिमुद्वहतादद्धा गंगेवौघमुदन्वति ॥ ३५ ॥ श्री
कृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य ॥ गोविंद गोद्विजसुर
ार्तिहरावतार योगेश्वराखिलगुरो भगवन्नमस्ते ॥ ३६ ॥ सूतः ॥ पृथयेत्थं कलपदैः परिणू
ताखिलोदयः ॥ मंदं जहास वैकुंठो मोहयन्निव मायया ॥ ३७ ॥
स्वविषयरतिमुद्वहतादविच्छिन्नां प्रीतिं करोति त्वर्थः ॥ ओघः प्रवाहं यथा गंगा प्रतिबंधं नगणयति ॥ ए
वं ममविषयांतरैर्विघ्नान्‌ गणयतीति भावः ॥ एवं मय्यर्थितः प्रणमति ॥ ३५ ॥ हे कृष्ण नमः इ एका
ान कृष्णसखेति वत्कृष्णार्जुनबोधयति कृष्णसखो अर्जुनः वृष्णीनामृषभश्रेष्ठ स्वमेव धर्मैरति
ान्माराजलपावे शुभ्र दहनानपवर्गवीर्या लीला प्रभाव गोविंदा मकामध वृद्धि जस्तुरार्ति
हरावतारा यस्यति ॥ ३६ ॥ कलानिमधुरा णि पदानि यस्तुतैर्वाक्यैः परिणूता खिला महिमा उद
यः यस्य सः ऊन्नताखिलसमाल सिराजते तिवक्तव्येदीर्घ छंदोवोधेन मरदमीनन नमाब्राहणवमा

२
नृ२
मा
२६

त्वपि मेन न्यविषयाम्मतिरिति पन्यार्थितेन तनवाट मिनंगीकृत्य राघस्यानात गजाकृयमागनप स्यात तो चन्द्रन्यास
कृमशामसखोः श्चियः पामेत्र नेत्रा पुरुषरे यासन राज्ञायुधि ष्ठिरेणा प्रेमणा अत्रैव वंक्रचित्काले निवसेति संप्रार्थ्य
निवारितः ४४ अथ भीष्मनिर्याणोत्सवे वर्ण उपोद्घातकथा प्रस्तौति ब्यासाद्यैः प्रबोधितोऽपि अथवा ब्यासः सत्राद्
ध्यातविवेक नमायकृतः ईश्वरोद्या श्रुतेः स्वभक्त भीष्मनिर्याणमहोत्सवापनात्रासहकृतः तेन गतवांन तन्म एवैनेवाप
प्रबोधनीयइति ईश्वराभिप्रायः कार्य इयविधायकता मजानद्भिरित्यर्थः श्रीकृष्णेनापि प्रबोधितो नानाउख्यानतन्त्र
देवानुमत कर्म्मणा यथा अनुरूपा उवाचो संधानार्थे गतोऽपि यथा चित मेव वदन्न पि विग्रह मेहरीकृतवान एवमत्रा
पि प्रबोध्य न्यूनबोधमेव हरी चकारेत्यर्थः ४८ अबोधमेव प्रपंचयति आहेति षड्भिः प्राकृतेन व्यविवेक प्राप्तेन व्या
त्मना चिते न हृदि विप्राः ४० पारक्यस्य स्वस्य गालायाहारस्य देहस्यार्थे मम यात्र सौहिणः अक्षौहिणी प्रमाणा व्यास
नहाटमित्रुपामेत्र प्रविश्यगजसाह्वयं स्थियस्वपुरेयासन प्रेमणा राज्ञा निवारितः ४५ ब्यासाद्यैरीश्वरे
हातेः कृष्णेनाद्भुतकर्म्मणा प्रबोधितोपीतिहासैर्नोबुध्यत शुचार्पितः ४८ आहराजाधर्म्मसुतश्चिंतयन
सुहृदांवधं प्राकृतेनात्मना विप्राः स्नेहमोहवशंगतः ४७ अहोमे पश्यताज्ञानं हृदि रूढं दुरात्मनः पार
क्यस्यैव देहस्य बह्व्यो मेऽक्षौहिणीर्हताः ४८ बालद्विज सुहृन्मित्रपितृभ्रातृगुरुद्रुहः नमेस्यान्निरयान्मोक्षो
ह्यपिवर्ष शतायुतैः ४९ नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्विषां इतिमेन तु बोधाय कल्पते शासनं वचः ५०
स्त्रीणां मद्धतबंधूनां द्रोहो योसा विहोत्थितः कर्म्मभिर्गृहमेधीयैर्नाहं कल्पोव्यपोहितुं ५१
नोक्तं अक्षौहिणीप्रसंख्याता रथानां द्विजसत्तमाः संख्यागणिततत्त्वज्ञैः सहस्राण्येकविंशति शतमत्युपरि चैवाष्टौ
तथाभूयश्च सप्ततिः गजानां च प्रसंख्यानमेतदेव प्रकीर्तितं ज्ञेयं शतसहस्राणि तथान्यानि शतानि च हृत्वा
नराणामत विरोजनः पंचाशत्तिहिणी प्राहृ यथावदिद संवक्ष्यति ४८ सुहृदः संबंधिनः मित्राणि सखायः पितरः
पितृव्या ४९ स्वस्थ न शासनाय हेतु न दोषइति चेत्तत्राह नैनो इति द्विषां वधः पुनः पापं न भवतीति यत् शासनं शि
ष्टारूपं वचः तत् न कल्पते यतस्त्वहवेः प्रजाभर्तृत्वभावः स्वप्रजानां मन्यताविधप्रसक्तेन द्वयोर्नृत्ता तः द्वयो
यतेन नतप्रात्ना याणा लक्ष्मनायाम पाकेवलराज्यलोभेन हत वापाप सेवे मम जातमिति ५० किंचयुद्धेष्वाव
धीभवतना मधर्मः स्त्रीणां न मयाहतनांवध वाया साना सायी सा द्रोहो न हि छा ऽपुस्थितः तेन्यया हि तमया

कृतेशनवर्षैरप्यकल्मः समर्थो नाहं गृहमेधीयैर्ग्रहाश्रमविहितैः तत्र च सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन
यजते य उ चैनमेवं वेदेति श्रुतेः पापमश्वमेधेन शेषदेवत्याशाक्या विविकिकर्त्तुमिति देवनाद्दम्भाभ्रिम निराकरोतिय
श्वेति यथा पृश्नेर्पकेन पंकाम्भो न स्नायते यथा वाम्ह रागले शाल्मतमपाविष्ट्वद्याम्ह पान स्नज्यते तथैवम्भतद्हत्यामेका
प्रमादकृतो पापान्तो बुद्धिपूर्वकद्दिंसा प्रायैर्यज्ञैर्मार्ष्टुं शोधयितुं नार्हतीति ५१ इतिप्रथ॰ऽष्टमः युधिष्ठिरायभीष्मणा

यथा पंकेन पंकाम्भः सुरया वा सुराकृतं भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ५२ इति प्रथमेऽष्टमः सूतः
इति भीतः प्रजानाशोद्भवात्सर्वधर्मविविदिषया ततो विनशनं प्रागाद्यत्र देवव्रतोपतत् १ तदा तेभ्यस्ततः सर्वे
सहायैः स्वर्णभूषितैः श्वेतनागन्तुरथैर्विशाल्यासधौम्यादयस्तथा २ भगवानपि विप्रर्षिरथेन सह तेज
यः सतैर्वाशेच ततः परं कृत्वेरऽक्ववराद्यकैः ३ दृष्ट्वानि पतितं भस्मो दिवसस्थितमिवामरं प्रणेमुः पाण्डवा भी
ष्मं सानुगाः सह चक्रिणा ४ तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम राजर्षयश्च तत्रासन्नुपास्य भरतर्षभं ५
पर्वतो नारदो धौम्यो भगवान्बादरायणः बृहदश्वो भरद्वाजः सशिष्यो रैभ्यकास्तथा ६ वसिष्ठः ऋषभो मद
ग्निर्वातोत्थान्नमहोसितः कक्षीवान्गौतमो विश्वकौशिकोऽथ सुदर्शनः ७ अन्ये च मुनयो ब्रह्मन्ब्रह्मणा
नादयो मलैः शिष्यैरुपेतान्याजगमुः कश्यपांगिरसादयः ८ तान्समेतान्महाभागा
नुपलभ्य वसूत्तमः पूजयामास धर्मात्मा देशकालविभागवित् ९

सर्वधर्मनिरूपणे इच्छाजातिश्चसत्पिश्च नवमेतस्य वर्ण्यते यदर्थं तस्या विवेकः श्रीकृष्णेन संवर्द्धितस्तदर्शय
तीति इतिसर्वेषां धर्माणां विविदिषया वेदितमिच्छया विनशनं कुरुक्षेत्रं देवव्रतो भीष्मः सतः श्रेष्ठश्चाथैषु
नैरथैः तत्र तत्र तत्रासन् तस्याग्मेवागताश्चरथैः भरतर्षभं भीष्मं रैभ्यकास्ततः परशुरामः ६ कौशि
को विश्वामित्रः ७ ब्रह्मणा त्रिः शुकः अंगिरसो बृहस्पतिः ८ वसूत्तमो भीष्मः ९

हृदिस्थे संते ग्रस्तः आसीनं ध्यानमास ॥९॥ उपासीनात्समीपोपविष्टा सुश्रुषो विनयः प्रेमस्नेह
स्नाभ्यां उपसन्ना तं गगनात वाक् अश्रैषीत् अन्तर्गतं भाव दृष्ट्वा प्रभाषत ॥ सुकुमारस्य वैः स्नेहस्य कथिरैश्च
भूतेन वक्तुं चापलंहित्वा दर्शीतिनाप्रसिभाषणमाह अस्त्रे स्त्रैकादशाभिः ॥११॥ हे धर्मनंदनाः किं
दृष्ट्या मा भवति ॥ एवं जीवितं नाहं यमष्टुमिति ॥ यदेन देहान्तकष्टं गृह्णाति तेष्वाहो मायैवैतत् यथा
पूर्वविरुद्धधर्मिः न योग्योपयोगेते ॥१२॥ किंच ॥ संस्थितेष्वतेबालाः प्रजापद्मः सावधुत्तिदेस
दर्शितलोकानपत्यानि हतीय पर्से सब्ब्लेशास्त्राम्स्यः ॥ कालकृतमेव नशोकवार्यति ॥ सर्वं
कृत्स्नं च तत्स्वभावं स्वास्थीनं जगदीश्वरं ॥ हृदिस्थं ध्यानमास माधयोपात्तविग्रहे ॥९॥
पोडुपुत्रा उपासीनाः प्रश्रयप्रेमगद्गदाः ॥ सुप्रभाव वृत्तान्तनाहैरधीमते न वदत्यपा
॥११॥ अहो कष्टमहो मायाख्यं यद्यूयं धर्मनंदनाः ॥ जीवितं नार्हथा क्लिष्टं विप्रधर्माच्युता
श्रयाः ॥१२॥ संस्थिते तिरथे पांडौ पृथा बालप्रजा वधूः ॥ युष्मत्कृते बहून्क्लेशान्प्रा
प्ता तोकवती मुहुः ॥१३॥ सर्वं कालकृतं मन्ये भवतां च यदप्रियं ॥ सपालो यद्वशे लो
को वायोरिव घनावलिः ॥१४॥ यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः ॥ कृष्णोस्त्री
गांडिवं चापं सुहृत्कृष्णस्ततो विपत् ॥१५॥ न ह्यस्य कर्हिचिद्राजन् पुमान्वेद विधित्सि
तं ॥ यद्विजिज्ञासया युक्ता मुह्यन्ति कवयोपि हि ॥१६॥
सितिदाभ्यां ॥१२॥ भवतामपि यद्दृश्यो यस्य कालस्य वशवर्ती लोकः स कालस्त्वदाउर्द्धं एवं
नावहः कालइत्याह ॥ यत्रेति ॥१४॥ श्रीकृष्णः अर्जुनो स्त्री धन्वी तत्रापि विपत् एतच्छरीरे
बलप्रमत्तेनपुण्येशात्मवेदस्य नावधीत्यर्थः ॥ न तु कस्मैकस्य कालो तिक्रमेत इत्यवेत्याह ॥१५॥
न ह्यस्य श्रीकृष्णस्येति ॥ अंगुल्या निर्दिशति विधित्सितं विधातुमिष्टं यस्य विधित्सितं जिज्ञास
या कवयो मुह्यन्ति ॥१६॥

श्री॰
भाग॰
टी॰
२८

दैवतंत्रमीश्वराधीनं व्यवस्य निश्चित्य तस्यैवानुविहितोनुवर्ती सन् कर्तेति नः हे नाथ कलयं
परागतस्त्वामिन प्रभो प्रसमर्थ अनाथाः प्रजाः पाहि प्रवर्तनीय इत्यर्थः ॥ परमेश्वरस्य श्रीकृष्णएव त्वेत्या
ह ॥१७॥ एष एव भगवान् सर्वेश्वरः कालएव यत आद्यः पुमान् ॥ ननश्चयेतो नारायणः साक्षान्न तद्
पणाद्यपतिस्पृशेति ॥१८॥ अनुभावं ॥१९॥ नमस्तानाथ मेवममनुसमातुलेयं देवकीसुतं प्रियं प्रीति
विषयं मित्रं प्रीतिकर्तारं सुहृत्तमम् उपकारानपेक्षोपकारकं च सौहृदाद्धि हेत्वभावात् ॥ सारथ्यमक
रोः कृतवानसि मम चित्ते वैषम्यं च त्रितो च सर्वात्मनः चेल्कथं नीचं सारथ्यादौ प्रवृत्तः तत्राह ॥ सर्वेति ॥२०॥ त
त्कृतं नीचत्व कर्म कृतं मम ममयोग्यमिति मतेवैषम्यं न कश्चिदपि नास्ति कृतो निरवद्यस्य रागादि दोषर

तस्मादिदं दैवतंत्रं व्यवस्य भरतर्षभ ॥ तस्यानुविहितोनाथ नाथ पाहि प्रजाः प्रभो ॥१७॥ ए
ष वै भगवान्साक्षादाद्यो नारायणः पुमान् ॥ मोहयन्मायया लोकं गूढश्चरति वृष्णिषु ॥१८
अस्यानुभावं भगवान्वेद गुह्यतमं शिवः ॥ देवर्षिर्नारदः साक्षाद्भगवान्कपिलो नृप ॥१९॥
यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमं ॥ अकरोः सचिवं दूतं सौहृदादथ सारथिं ॥२०॥ सर्वा
त्मनः समदृशो ह्यद्वयस्यानहंकृतेः ॥ तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् ॥२१ ॥ तथा
प्येकांतभक्तेषु पश्य भूपानुकंपितं ॥ यन्मेसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः ॥२२॥ भ
क्त्यावेश्य मनो यस्मिन्वाचा यन्नाम कीर्तयन् ॥ त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः ॥२३
स देवदेवो भगवान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहं ॥ प्रसन्नहासारुणलोचनोल्लस
न्मुखांबुजो ध्यानपथश्चतुर्भुजः ॥ २४ ॥

हितस्य तत्कृतमनहंकृतेः तत्कृतं ग्रहणस्य तदपि कृतः समदृशः तत्रापि हेतुः सर्वात्मनः यथेष्ट
वादेतदेहतेमद्भावः ॥२१॥ तथापि समतेविशेषं पश्य भक्तेषु कीर्तनाय तेनामे प्राणांस्त्यजतः साक्षात्स्वय
मेव तत्विदं इह दर्शनं ॥ इदानीं देहत्यागपर्यंतं श्रीकृष्णस्वरूपानुसंधानं प्रार्थयते भक्त्येति द्वाभ्यां ॥२२॥ या
वदिदं कलेवरं हिनोमि त्यजामि तावत्प्रतीक्षतां इति स्वानंदस्य नास्ति तत्र नान्यस्मरणं ह्यस्य नाह
एतावतैव नाम्ना वा लक्ष्य कुर्विष्णुवो भुजः यस्य ध्यानस्य पथा विषयः। यामः किमतेकेवलस्य तत्संस्थि
तः सन्नाप्रतीक्षतामित्यर्थः ॥ तत्राथि वचनं भुजत्वं वै कंठे निवासमेव कृष्ण नाथकारी हरिरेव गृहि
णा वाममवतन्यत्वमिमपिवतुलेतन्नी रपतनडहूमस्तकानां नतम कानां सेवामवकमावानितिकेन

२९

ततस्मा वृकं ये वाक्यमाकर्ण्य ॥ २४ ॥ पुरुषस्वभावेन विहिता च्चरजातिसाधारणान्धर्मान्वर्णाश्रमासेवि
तु तीये नान्वयः ॥ यथावर्णं वर्णधर्मान् यथाश्रममाश्रमधर्मान् वैराग्यरागाभ्यामुपाधिभ्यां क्रमेण ।
म्नातं ३ भयं निवृत्तिप्रवृत्तिलक्षणं येषां तान् पुनस्तेष्वेव विशेषमाह दानेति ॥ २२ ॥ मोक्षधर्मान् शमदमादीन् ।
भगवद्धर्मान् दर्शितान् वक्ष्यमाणान् ॥ द्वादशादिनियमरूपान् ॥ समासव्यासयोगेन सविस्तरं तान्येव येनावृपा
यान्तत्त्वतो मो ॥ २२ ॥ धर्मादीनुपायाधिकारभेदेन नियतोपायसहितान् ॥ यथायथावत् ॥ नानाख्यो
नेषु ये इतिहासाः तेषु यथा संति ॥ तथा वर्णयामास ॥ २८ ॥ छन्देन स्वेच्छया मृत्युर्यस्य ॥ २४ ॥ सहस्र

सूतः ॥ युधिष्ठिरस्तदाकर्ण्य शयानं शरपञ्जरे ॥ अपृच्छद्विविधान्धर्मानृषीणां चानुशृण्वताम् ॥ २५
पुरुषस्वभावविहितान्यथावर्णं यथाश्रमम् ॥ वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् ॥ २६
दानधर्मान्राजधर्मान्मोक्षधर्मान्विभागशः ॥ स्त्रीधर्मान्भगवद्धर्मान्समासव्यासयोगतः
२७ ॥ धर्मार्थकाममोक्षांश्च सहोपायान्यथा मुने ॥ नानाख्यानेतिहासेषु वर्णयामास तत्त्व
वित् ॥ २८ ॥ धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः यो योगिनः छन्दमृत्योर्वाञ्छितस्तूत्त
रायणः ॥ २९ ॥ तदोपसंहृत्य गिरः सहस्रणीर्विमुक्तसङ्गं मन आदिपूरुषे ॥ कृष्णे लसत्पीतपटे
चतुर्भुजे पुरः स्थितेऽमीलितदृग्व्यधारयत् ॥ ३० ॥ विशुद्धया धारणया हताशुभस्तदीक्षयैवा
शु गतायुधश्रमः ॥ निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजञ्जनार्दनम् ॥ ३१ ॥ ॥

तीः ॥ पुत्रे समीपे स्थिते सहस्रं रथिनो नयति पालयतीति सहस्रणीर्भीष्मः सहस्रणीरिति पाठे
सहस्रार्थवतीर्गिरः लसंतं तेजो यस्य तस्मिन्नेव यो ध्येयः तस्मिन्नमीलितदृग्भूत्वा मनो व्यधारयत्
३० ॥ अनयैव भक्त्या धारणया हतमशुभं यस्य सः ॥ तस्य श्रीकृष्णस्य ईक्षया कृपादृष्ट्या गत आयुधश्र
मो यस्य सः ॥ अतएव निवृत्तः सर्वेन्द्रियवृत्तीनां विभ्रमो विविधो भ्रमो यस्य सः ॥ जन्यं देहं परमकलेव
रं श्रीकृष्णे निरुपाधिं चिंतयन्पञ्चत्वमापद्यते इति ॥ ३१ ॥

श्री
भाग्र
टी
५५

इति नाना धर्मा कृपया यैर्मर्तिर्मतो धमत्तो उपकल्पितान समर्पितान् कुसा नवनीतं गवे श्रेष्ठे भगवति विहस्ता
निः कामा प्रविश स्मातिके हृः विगतो न्गया यस्मान्नासिन्॥ यमन पद्म सुन्दरम हते नाम्नीन र्थः॥ त
देव परमेश्वर्य माह स्वमुखे स्वरूपम तेषामा नेदमुपगते ग्राम वमे वन्न विलक्ष दा विद्धि हन्ते विक्रीडि
तं प्रकृति मुपपुष्पितं विक कृतवति॥ नतुम्ह रूपति राधानेन जीव वस्मा तेऽन्ये इत्यर्थः॥ विहस्ति मिस्तुति
प्रपंच यति यतः प्रकृतेः मनु प्रवाहः॥ स्पष्टि परंपराम वति॥ २२॥ इदानीं श्रीकृष्ण सम्मतिं वर्णयन्नर
तिं प्रार्थयते त्रिभुवन कमने त्रिलाका मक मेव यत्क मनीयं नद्व पुर्दधानेति मस्त तमालव न्नील
वर्णो वसनन॥ प्रातः कालीनारवेः करा इव नवए वर्गो स्वीनेमु मले निर्मले मेव रोय स्मिलत॥ अल
क कुलैरुपरिस्मा हते प्रानना व्रू यस्मिन्नन विजय सखे पार्थ सारथी पुन वघाद्वे त कीफलामिसे।
श्री कृष्ण उवाच॥ इति मति रुपकल्पिता वितस्ता भगवति सात्वत पुंगवे विभूम्नि॥ स्वसुखमुपगते
क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यत्प्रवप्रवाहः॥ २२॥ त्रिभुवनकमनं तमाल वर्णं रविकर गौर
वराम्बरं दधाने॥ वपुरलककुलावृताननाब्जं विजय सखे रतिरस्तु मेऽनवद्या॥ २३॥ युधि तुर
गरजो विधूम्र विष्वक् चलुलित श्रमवार्य लंकृतास्ये॥ मम निशित शरैर्विभिद्यमानत्वचि
विलसत्कवचेऽस्तु कृष्ण आत्मा॥ २४॥ सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं
निवेश्य॥ स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थ सखे रतिर्ममास्तु॥ २५॥
पिरहितात्मनिस्त विजय सखे नाम पुवर्णायन् रतिं प्रार्थयते॥ २२॥ युधि तुरङ्गाणां खुरे रजः तस्य
रजसि नविधूम्रा धूसरा लेच नविष्वक समन्तत चलता कच कुन्तलाः॥ ते लुलितविकीर्णा श्रमवारिस्वेद
बिन्दुरूपं तेन अलंकृतं बाल लघाताके नाल कृतमास्यं यस्मात् स्मिन् श्रीकृष्ण सममा स्मा म नोस्तु मनाविता
र्थः पुनः किम्भूतस्य शरीरे॥ नीक्ष्णाः शरैर्विभिद्यमाना त्वग्यस्य शरीरे व विलसत्कवचे यस्मात् स्मिन्॥ २४॥
मनयोः कुरु मध्ये रथं स्थापय मेऽच्युत॥ यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् इति सखिवचनं
स्मव वानिशम्य सपदि तत्क्षणमेव स्वपर वलयोः सेनयो र्मध्ये स्थितेन पार्थ सखे रतिरस्तु तत्र स्थित्वा कृत
मवेक्षणं तस्य परसैनिकानामायुरक्ष्णा कालदृष्ट्या हृतवति अक्ष्णा कृपा कुरु गाधाय
सो कर्तुं इति॥ तत्र तद्दर्शनव्याजेन दृष्ट्वा वसर्वबान्धवान् कृपया जनयित्वा तानेके व लम्स जनस्य
शस्त्रग्रहणं त्याजयमास ह॥ किं तत्तदवियाहरतो नापीत्याह॥ २६॥ २५

यव हि नाहं द्वेष्यितायाः इति नान्तःसौपुरवेमि व पुरवेग्रेष्यितानीक्षादीन्निरिदेष्यितः ॥ स्वजनवधा ।
द्धिपुरवेसाविशुन्नस्य ॥ नद्धकेशीनाह ॥ एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत ॥ विसृज्य सशरं चा
पं शोकसंविग्नमानस इति ॥ ऊमतिमद्दंहे तस्मादिकृवुद्धिं न केवलं रणे नैव जयमावहन् ॥ किं तु विद्या
द्वशेणनापि ॥ ममतममहेतन मनुग्रहं कृतवानित्याह ॥ हृष्यांगा ॥ ३६ ॥ स विनिगमयशा स्वपवादे साह्यमाहं
करिष्यामीत्येवं मन्तोस्वपुनिर्जनाद्धि नाश्रीकृष्णे शास्त्रप्राह विषा मीत्येवं रूपामत्यनिर्जनाङ्कर ते मन्येयथा
मवनितयमद्दि ॥ श्रधिकृत्य कर्तेयो पेयया स्यः स न स्वबन्धुतः सदेवे वा वतीणिः स्वबन्धुतः सम्प्रेसियात ॥ स्व
मिपुरवमधात ॥ इमद्दन्तहरिः सिद्दस्वकथ्यंमनाप्नुतं यवाणं चक्रे येन मः ॥ नद्दाव संमोणमावुध्य

व्यवाद्दिनशून्तनापुरवेनिरीत्वस्वजनवधाद्धिपुरवेसदोषवुद्ध्या ॥ ऊमतिमद्दहदात्मविष
याघस्वरणाशक्तिः परमस्यतस्याप्त ॥ ३६ ॥ स विनिगमसमपकायमन्तिर्जामनमधिकर्तेमव
न्धुतोरथायः ॥ हृतं नाच वाणोम्पयावलम्बुर्द्दशिरिवद्दुं न मिमिंगतोतनीयः ॥ ३७ ॥ शित
विशिरवेद्दतोविषीली देसः ॥ ततजवरिष्ठुतश्रातनायितोमे ॥ श्रममसिसमारयदधा
शेसमवतमेमगावागातिर्जुदः ॥ ३८ ॥

नाद्यविसर्ग तेरुदस्य सर्वमनमवनभारेणप्रतिपदंवलद्धुः चलंतीणः हृष्यीयस्मान्ने नैव संरंभेन
यथ्रिगनेपतिनमुत्तीयं वस्वं पसमपुरुदासगतिर्मवविमुनेरेणाव्ययः ॥ ३९ ॥ एवं यदाप्याप्तदा
स्मयमानस्मा ननापिनोधनि नामे पि तैस्तीत्वाविशिवेः हृनत्वाडितोतोविशीर्णदेसःविधुत
कवचः ततजनरुधिरेणपरिप्लुतः श्रामः ॥ श्रममवलाहाराय तमर्जुनमपतिक्रम्य मद्धर्मयेम
निसमायामिजनमम ॥ एवं यालोकप्रतीत्यार्जुनपक्षपातीवलद्धितः वन्धुतस्तु समेवागृहं केकु
नवान ॥ यन्ममयमके नार्त्तवचः नन्नाहृयास्तु नएवमगवाम्पगतिर्मवविनियर्थीः ॥ नद्दवमस्या
येरापिश्रुतसरत्ना ग्रवस्य हृक्षारतिमप्यास्त ॥ ३८ ॥

श्री॰
भाग॰
टी॰
१॰

विजयोर्जुनस्तस्य रथएव कुटुंबं स्वकीयैः परिपालनीयो यस्य तस्मिन्नात्ते प्रतोदे येन तस्मिन् ॥ धृताश्च
ते हयानां रश्मयः प्रग्रहा येन तस्मिन् ॥ श्रीसादिभिश्चेतस्य कांतं तादृशशोभया शोभादिभिः ई
क्षणीया सारथ्यास्थितेपि तन्नीये शोभमाने मुमूर्षोर्मे रतिरस्तु ॥ नन्वत्यापर्कर्तनि किमिति रतिः प्रार्थ्यते
तत्राह ॥ भगवत्यपि विशेषयेनयाह ॥ इहयुद्धेहताः सर्वे यं निरीक्ष्य स्वरूपं तत्सारूप्यं प्राप्ता इति दि
व्यदृष्ट्यावयत्राह ॥ तच्च धर्मेण युद्धमाना स्वरूपं प्राप्ता इति न तु विशेषतो महाभाग्य विष्णुरित्या
शुद्धेमाह ॥ ३९ ॥ ललितागतिश्च विलासः स्वहासः सादि मञ्जुगत्यादिभिरानीये स्व दीर्घेर्वी कालितः उरु

विजयरथकुटुंबआत्ततोत्रे धृतहयरश्मिनितच्छ्रियेक्षणीये ॥ भगवतिरतिरस्तु
मेमुमूर्षोर्यमिहनिरीक्ष्यहतागताःस्वरूपं ॥ ३९ ॥ ललितगतिविलासवल्गुहासप्रण
यनिरीक्षणकल्पितोरुमानाः ॥ कृतमनुकृतवत्यउन्मदांधाःप्रकृतिमगन्किलय
स्यगोपवध्वः ॥ ४० ॥ मुनिगणनृपवर्यसंकुलेंतःसदसियुधिष्ठिरराजसूयएषां ॥ अ
र्हणमुपपेदईक्षणीयोममदृशिगोचरएषआविरात्मा ॥ ४१ ॥

मानः पूज्या यासां ताः ॥ उन्मदेन अंधाः ॥ अनन्यवत्तदेकचित्ततया तस्य कृतं कर्म गोवर्धनो
द्धरणादिकमनुकृतवत्यो गोपवध्वः यस्य प्रकृतिं स्वरूपमगन् अगमन् प्रकारलोपश्छांदसः ॥ कि
लप्रसिद्धं तस्मिन्ममरतिरस्त्विति पूर्वेणान्वयः जगत्सृजां तामनुसंस्मरन्नाह ॥ ४० ॥ मुनिगणैर्नृपव
र्यैश्च संकुले आस्मिन्नंतः सदसि सभामध्ये युधिष्ठिरस्य राजसूये ॥ एषां मुनिगणादीनां मध्ये ईक्षणीयः ॥
श्रेष्ठोऽर्हणं पूजामद्भिमेव कस्मात् सर्वेण विलोकनीयः सन् उपपेदे प्राप ॥ एष जगतामात्मा मम दृशिगो
चरः दृष्टिविषयः सन् ॥ आविः प्रकटो वर्तते ॥ अहो मे भाग्यमिति भावः ॥ सोहं कृतार्थोस्मीत्याह
तमिति ॥ ४१ ॥

३०

तमिममजं सम्यगनुगतः प्राप्तोस्मि समस्तकमाह ॥ विधूतभेदमोहः तदर्थं भेदस्योपाधिकमाह आत्मकल्पि
तानां स्वयं निर्मितानां शरीरभाजां प्राणिनां हृदि हृदि स्वदेहेषु धिष्ठितमधिष्ठितमेकमेव अपरत्वार्थः नैक
धा अनेकधा धिष्ठानभेदात् ॥ अनेकधा भासमानमित्यर्थः अत्र दृष्टांतः सर्वप्राणिनां दृशां प्रति एकमेवार्क
मनेकधा प्रतीतमिवेति ॥ ४२ ॥ मनोवाग्दृष्टीनां वृत्तिभिः परमात्मनि श्रीकृष्णे स्वात्मैव लीलः श्वासोप नः

तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानां ॥ प्रतिदृशमिव नैकधार्क
मेकं समधिगतोस्मि विधूतभेदमोहः ॥ ४२ ॥ सूत उवाच ॥ कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः
आत्मन्यात्मानमावेश्य सोंतःश्वास उपारमत् ॥ ४३ ॥ संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्क
ले ॥ सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ॥ ४४ ॥ तत्र दुंदुभयो नेदुर्देवमानववादिताः
शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः ॥ ४५ ॥ तस्य निर्हरणादीनि संपरेतस्य भार्गव
युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोभवत् ॥ ४६ ॥ तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनाम
भिः ॥ ततस्ते कृष्णहृदयाः स्वाश्रमान्प्रययुः पुनः ॥ ४७ ॥ ततो युधिष्ठिरो गत्वा सहकृष्णो
गजाह्वयं ॥ पितरं सांत्वयामास गांधारीं च तपस्विनीं ॥ ४८ ॥ पित्रा चानुमतो राजा वासु
देवानुमोदितः ॥ चकार राज्यं धर्मेण पितृपैतामहं प्रभुः ॥ ४९ ॥ इति श्रीभागवते प्रथमे नवमोध्या
यः ॥ ९ ॥

पमः ॥ ४३ ॥ निष्कले निरुपाधौ संपद्यमानं मिलितमाज्ञायालक्ष्य ॥ ४४ ॥ देवैर्मानवैश्च वादिताः
राज्ञां मध्ये ये साधवस्ते शशंसुः ॥ ४५ ॥ निर्हरणादीनि संस्कारादीनि संपरेतस्य मृतस्य भार्ग
वः ॥ ४६ ॥ कृष्णहृदयेषु यो कृष्णस्य गुह्यानि ॥ अपूर्वानि गुह्यानि कृष्ण एव हृदये येषां ते रहस्य नामभिर्गुह्यै
स्वैर्नामादिभिः ॥ ४७ ॥ पितरं पितृव्यं तत्राह गांधारीं तपस्विनीं शोकाकुलां पुत्रवतीं ॥ ४८ ॥ राजा युधिष्ठिरः ॥ ४९ ॥ इति श्री
भावार्थदीपिकायां प्रथमस्कंधे नवमोध्यायः ॥ ९ ॥

दशमे कृतकार्यस्य हस्तिनापुरतो हरेः ॥ स्त्रीभिः संस्तूयमानस्य कल्प्यते द्वारकागमः ॥ राज्ये वृका
रेत्यक्तेन वक्ष्यामिति द्वेवेतिस्वरूपारिक्थं ये स्पर्धन्ते स्पर्धते ॥ तथा स्वरिक्थस्पृधः संग्रामोद्यपाते
आततायिनः नादिहरणादाततायिनः तान्हत्वा प्रत्यवरुद्धभोजनः बंधुवधः खेन संरुद्धविनभोगः
राज्यलाभे नष्टाप्रमोगो वा कथं राज्ये प्रवृत्तः प्रवृत्तो वा ततः किमकार्षीत् ॥ राज्यप्रवृत्तौ ॥
प्रीतिकस्य प्रीतिर्विपर्ययो वा प्रवृत्तनइत्याशये नोत्तरमाह ॥ १ ॥ वंशं कुरोः संरोहयित्वा परीक्षिद्रूप
रोहिणं संरोहयित्वा कथं भूतं वंशदवाग्निनिर्हृतं वंशप्रभवदवाग्निना तस्माद्धृतं क्रोध
रूपोऽग्निस्तेन निर्हृतं ॥ दग्धं निजराज्ये निवेश्य राज्यप्रवृत्तो दर्शितः किमकार्षीदित्यस्योत्तरमा

श्रीशौनक उवाच ॥ हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः ॥ सहानुजैः प्र
त्यवरुद्धभोजनः कथं प्रवृत्तः किमकार्षीत्ततः स्म ॥ १ ॥ श्रीसूत उवाच ॥ वंशं कुरोर्वंशदवाग्निनि
र्हृतं संरोहयित्वा भवभावनो हरिः ॥ निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना
बभूव ह ॥ २ ॥ निशम्य भीष्मोक्तमथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः ॥ शशास
गामिन्द्र इवाजिताश्रयः परिध्युपान्तामनुजानुवर्तितः ॥ ३ ॥ कामं ववर्ष पर्जन्यः सर्व
कामदुघा मही ॥ सिषिचुः स्म व्रजान् गावः पयसोधस्वतीर्मुदा ॥ ४ ॥ नद्यः समुद्रा गिरयः
सवनस्पतिवीरुधः ॥ फलन्त्योषधयः सर्वाः काममन्वृतु तस्य वै ॥ ५ ॥ नाधयो व्याधयः
क्लेशा दैवभूतात्महेतवः ॥ अजातशत्रावभवन् जन्तूनां राज्ञि कर्हिचित् ॥ ६ ॥ ॥

इति निशम्येति ॥ २ ॥ प्रवृत्तेन यद्विज्ञानं परमेश्वराधीनं जगत् इत्येवं रूपमिति वेन तेन विधूतो विभ्रमः
शोकश्चेतात्मादि इत्यात्मा ॥ अनुजैरनुवर्तितः सेवितः अजितः श्रीकृष्ण एवाश्रयो यस्य सः
परिधिः समुद्रः तस्य पर्यन्तो उपान्तो यस्याः गां पृथ्वीं ॥ ३ ॥ महीति
सर्वकामदोग्ध्री बभूव व्रजान् गोष्ठानि ऊधस्वतीः ऊधस्वत्यः ॥ ४ ॥ तस्य सर्व ऋतुषु सिषि
चुः ॥ ५ ॥ व्याधयो रोगाः क्लेशाः शीतोष्णादयो दैवा
दैवभूतात्महेतवः ॥ ६ ॥ इदानीं द्वारकागमनं निरूपयि

॥ १० ॥ अ० ॥ १ स्कंध

त्वरः स्वमङ्गायः ॥ ७ ॥ नेत्रुधिष्ठिरं ॥ ८ ॥ पुष्पुत्वट्टेतनात्प्राहैवणयोज्ञानेगौतमः कृपः यमोनक
लमहदेवौ ॥ ५ ॥ स्वनाश्वत्थिधोमन्यस्त्वेनानतानसाः पुनर्ग्रहलोगर्भरवकश्रीहन्त्वविरहेमोहा
यिकान ॥ यहामन्यस्वतनामन्यवतीनेषोकृसाविरहामहनेकेप्रमन्सायेनाक्सनंगादितिहामां ॥ ९
मनासंगाहेनार्जुनः पुत्राद्विविधयोडर्भोगायनमः सद्भिः कीर्त्यमानेनविकरेयस्ययशः सहृदया
कार्पमनंगमनेकुनशकोति ॥ ११ ॥ दर्शमादिभिः नमिनश्रीकृसेनन्सलाम्पसाधीर्यिजोते ॥ १२ ॥

उधित्वाहालिनपुरेमासमालतिपयान्दीः ॥ स्वहृदेवविशोकाय स्वसत्त्वप्रियकाम्य
या ॥ ७ ॥ श्रामंग्रचाम्पतलातः वरिष्ठमाभिवाधेन ॥ स्वाहतोस्त्यंकेष्वितरिष्टकोभिवा
दितः ॥ ८ ॥ स्वमङ्गादोपदीकृतीविराटनमयानया ॥ गांधारीधृतराष्ट्रश्चपुत्रगौतमो
यमो ॥ ९ ॥ शूकोदरश्चधौम्यश्चत्थिधोमन्यस्त्वनादयः ॥ नमोहिरेविप्रयेना विरहेशार्ङ्ग
धन्वनः ॥ १० ॥ सनेमागा कृकडः संगोहातेनोनहनेपुधः ॥ कीर्त्यमानेयशायस्यसहृदा
कर्णगोहृनं ॥ ११ ॥ नमिमन्सधियःपार्थाः सहेशविरहेकथं ॥ दर्शनस्पर्शनालाप
प्रायनासनभोजनैः ॥ १२ ॥ सर्वेतेनिमिषैरवेलमक्तनचेतनः ॥ वीक्षतः स्वेहसंवद्धा
विचेरुस्तत्रतत्रह ॥ १३ ॥ महंधनुकूलहाम्पमोत्तकादेवकीसुते ॥ निर्यात्सगारात्राम
द्रमितिसाहाधवस्त्रियः ॥ १४ ॥ मद्देगायोवेमेंधरश्वीतापनत्ववगोप्रवो: ॥ यदहानक

ह्यायानेडड्डेमयः नदा ॥ १५ ॥
प्रनवविमिषिवेर्नेवैलमेववीक्ष्यमाणालवृननवाईणानयनाधर्षचलतिसस्यतः स्वेहेनसमम ।
कवद्धाः प्रनवलमनुगतानिवर्तनासियथा ॥ १२ ॥ प्रगावाङ्गहान्विगोक्ष्यतिमनिडालवा हुवेः
उक्लनस्त्रवन ॥ वाप्यमनस्कमहधन ॥ नेवेषवल्लेमिनवमः ॥ नवहेतः ॥ श्रमकेनोसमदमग
लेमामहिमनदर्थ ॥ १४ ॥ मद्देगादयादशावायमेदः ॥ १५ ॥

प्रेमव्रीडास्मितेन युक्तमीक्षणं यासां ताः ॥१६॥ गुडाका निद्रा तस्या ईशो जितनिद्रोऽर्जुनः ॥१७॥ व्यज
ने चामरे जगृहतुः मधुपतिः श्रीकृष्णः ॥१८॥ सत्याः श्रीकृष्णे तासामव्यभिचारात् ॥ किं तु नानुरूपा
श्चानुरूपाश्च निर्गुणस्य परमानन्दस्य तु वैभवत्वादयो नानुरूपाः गुणात्मनो नाम मनुष्यनाट्या
वतारे तु अनुरूपाश्चेत्यर्थः संधिरार्षः ॥१९॥ सर्वश्रुतीनां मनोहर उपनिषदामपि संमतः सत्यः तेषां
जल्पमभिनंदन्नित्यर्थः ॥ तत्रैतेजः सौंदर्याद्यतिशयेन विस्मिताभ्यः सखीभ्यो मंत्रयुपः कथयन्ति
नात्र विस्मयः कार्यः साक्षादीश्वरत्वादस्येति ॥ तदेवाह नवभिः ॥२०॥ वै स्मरणे किलेति प्रसिद्धा

प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया ॥ ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः ॥
सितातपत्रं जग्राह मुक्तादामविभूषितं ॥ रत्नदंडं गुडाकेशः प्रियः प्रियतमस्य ह ॥१७॥
उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते ॥ विकीर्यमाणः कुसुमै रेजे मधुपतिः पथि ॥१८
अश्रूयंताशिषः सत्याः तत्र तत्र द्विजेरिताः ॥ नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः ॥१९
अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसां ॥ कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ॥२०
स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि ॥ अग्रे गुणेभ्यो जगदात्मनी
श्वरे निमीलितात्मन्निशि सुप्तशक्तिषु ॥२१॥

प्रमाणद्योतकं ॥ य एक एवाद्वितीयः पुरुष आसीत्स एवायं श्रीकृष्णः ॥ क्वासीदविशेष आत्म
नि निष्प्रपंचे निजस्वरूपे कदा अग्रे गुणेभ्यो गुणक्षोभात्पूर्वं निशि प्रलये कुत्र जगता
मात्मनि जीवे निमीलितात्मनि निमीलितात्मन्निति लुप्तसप्तम्यन्तपदं जातावेकवचनं ईश्वरे ली
नरूपे जीवे सुप्तशक्तिषु सत्सु ॥ ननु जीवानां प्रलये कथं लयः ॥ तत्राह ॥ सुप्ताः शक्तयो येषु सत्सु
जीवोपाधिः महत्तत्त्वादिशक्तिलयेन जीवाः प्रलये सुप्तशक्तयः ॥ तदेवं सृष्टेः प्राक् प्रलये चाविशिष्टस्य
चावस्थानमुक्तं ॥ सृष्टिप्रलययोर्मध्ये ऽप्यवस्थानमाह ॥२१॥ ३२

स एवा प्र चक्रस्तस्यास्तिरेव प्रकृतिमनुससाराधिष्ठितवान् ॥ भूयः पुनः सृष्टिप्रवाहस्यानादित्वात
कीदृशीं निजवीर्यचोदितां स्वकालशक्तिप्रेरितां स्वांशभूतां मायां मोहिनीं ॥ अनुपवासिसृक्ष
तीं स्रष्टुमिच्छन्तीं ॥ किमर्थं मनुससार अनामरूपे आत्मनि जीवे रूपनामनी विधातुमिच्छन् ॥ उपा
धिसृष्ट्या जीवानां भोगायेत्यर्थः कर्मणि च ॥ विधाने वेदान्कृतवानित्याह शास्त्रकृदिति प्र
पञ्चदर्शनद्योतिदुर्लभमस्माभिर्लब्धमित्याह ॥ २२ ॥ स वा अयं यत्पदं देवरूपं सूरयो विद्वांसो जितेन्द्रिया निर्जितमातरि
श्वानो जितप्राणाः पश्यन्ति एष एव यत्पदं तिकेन भक्त्या उत्कलितः उत्कण्ठितो मलरहित आत्मा बुद्धिस्तेन
न दृश्यते न तु शास्त्राधारेणेति श्रुतेः ॥ बुद्धिर्विमलत्वसाधनमेव बहेतरित्याह ॥ ननु देहस्य विषयत्वमेव सत्वबु
द्धिं परिमार्ष्टुमर्हति शोधयितुमर्हति न तु योगादय इत्यर्थः ॥ यद्वा नु अग्रहेणेव एव मन्त्रानेपथि

स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीं ॥ अनामरूपात्मनि रूपना
मनी विधित्समानोऽनुससार शास्त्रकृत ॥ २२ ॥ स वा अयं यत्पदमत्र सूरयो जितेन्द्रिया निर्जि
तमातरिश्वना ॥ पश्यन्ति भक्त्युत्कलितामलात्मना नन्वेष सत्वं परिमार्ष्टुमर्हति ॥ २३ ॥ स वा
अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः ॥ य एक ईशो जगदात्मलीलया सृ
जत्यवत्यत्ति न तत्र सज्जते ॥ २४ ॥ यदा ह्यधर्मेण तमोधियो नृपा जीवन्ति तत्रैष हि सत्वतः
किल ॥ धत्ते भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद्युगे युगे ॥ २५ ॥

मार्ष्टुं नाशयितुं दृश्यमानेनाप्रमत्तं सीमर्हति नार्हतीति ॥ किन्तु नेनैव सखे हे गंगवामित्यर्थः पृष्ठ सेवा
कथा यस्मात् ॥ २३ ॥ हे सखि वेदेषु रहस्येषु च रहस्यवादिभिरनुगीता सत्कथा यस्य सखि अनुगीता सत्कथाः
कथा यस्य तस्य एव वा यो गानप्रकारमाह य एक ईश इत्यादि एवंभूतस्य नानावतारकारणमाह ॥
यदेति ॥ २४ ॥ तमोधियो राजानोऽधर्मेण जीवन्ति केवलं प्राणान् सुरक्षन्ति ॥ तत्र तदा एव
वंभवाय स्थितये सत्वतः विशुद्धसत्वेन रूपाणि दधत् भगमादीनि धत्ते प्रकटयति युगे युगे तत्त
दवसरमगामये सर्वसत्वसमस्तप्रतिजनस्तामाय याद्वीप देशकृत ॥ दयां भक्तकृपा यश्च यद्वानक
मेव विशाघवतः ॥ श्रीकृष्णावतारमाभाग्यवतारयति ॥ प्रकारैस्तिर्यग्भिः ॥ २५ ॥

श्री
भा०प्र०
१०
३३

यद्यस्मादेषपुरुषोत्तमः श्रियःपतिः स्वजन्मनायदोः कुलेश्रवतिश्लाघ्यतममलंकरोति॥ अतः श्लाघ्य
तमंतच्चंक्रमणेनमधोर्वनंपुण्यतममलंकरोति॥ अतः तत्पुण्यतममितितदेवमर्थस्यपिश्लेषेतातिपुन
येनालमिति॥ तत्राप्याश्चर्यमहोइत्युक्ते॥२६॥ अहोवतेत्याश्चर्ये किंतत्कुशस्थलीद्वारकास्वर्ग
उत्कृष्टइतियद्यशः॥ तत्तिरस्करीयतोभवकर्त्रीभूर्वसुपुण्ययशस्करीचभवतीतियत॥ यतोयत्र
त्याःप्रजाः॥ स्वानुग्रहेणेषितंप्रेषितंस्मितावलोकंयद्वानुग्रहार्थमिषितंप्रेषितंस्मिहस्वस्यात्मनःपतिंत

अहोअलंश्लाघ्यतमंयदोः कुलेअहोअलंपुण्यतमंमधोर्वनं॥ यदेषपुंसामृषभःश्रियः
श्रियःस्वजन्मनाचंक्रमणेनचांचति॥२६॥ अहोवतस्वर्यशसस्तिरस्करीकुशस्थलीपु
ण्ययशस्करीभुवः॥ पश्यंतिनित्यंयदनुग्रहेषितंस्मितावलोकंस्वपतिंस्मयत्प्रजाः॥२७
नूनंव्रतस्नानहुतादिनेश्वरःसमर्चितोह्यस्यगृहीतपाणिभिः॥ पिबंतियाःसख्यधराम
तंमुहुर्व्रजस्त्रियःसंमुमुहुर्यदाशयाः॥२८॥ यावीर्यशुल्केनहृताःस्वयंवरेप्रमथ्यचैद्य
प्रमुखान्हिशुष्मिणः॥ प्रद्युम्नसांबांबसुतादयोऽपरायाश्चाहृताभौमवधेसहस्रशः
२९

श्रीकृष्णेनतत्पित्रादिवद्दृष्टमात्रपतिंनित्यंपश्यंतीतिसर्वश्लाघ्यमितिसर्वार्थः॥ अतितममितिपा
ठे॥ स्वानुग्रहार्थमुषितंकृतनिवासंतेनतत्स्वर्गस्तिरस्कृतः॥ ईश्वरएवअस्यगृहीतपाणिभिः
पत्नीभिरीश्वरोयमेवनतुनेजन्मातरेषुसमर्चितः यासांत्वधरामृतंसख्यःस्त्रियःपिबंतियासांताःसमो
हंप्रापमुहुरितिमनोहरत्वमुक्तंव्रजस्त्रियश्चयदाशयाः॥ यच्चेतिहासाः॥२८॥ वीर्यमेवशुल्कंमूल्यंतेन
तत्प्रमुखानितोबलिष्ठान्॥ प्रद्युम्नसांबांबश्चैवसुतानायासां॥ रुक्मिणीजांबवतीनाग्नजि
तीनांश्चादियासां॥ सत्यभामादीनांताःयाश्चापराः भुमप्रौकस्योनरकस्याकेनात्ययः॥२९॥ ३३

पत्नाः स्त्रीनमेवपांके वलेसाधःशोभनं कुर्वते ॥ अपास्तेपेशलेभ इत्वा तेऽयं यस्मात निरस्तपोचे
सुविनेयस्मात नथाभ नमपिजातकदाचिदपिनाथेति न निर्गच्छति ॥ आहतिभिर्बकेकरैर्यद्दृष्ण
तजातादिविषवल्लाहरणो हृदिस्थानूत्रानेस्यन् ॥ २० ॥ एवंविधाश्रियाभिरः साम्मिन्नतनिरीक्ष
णेनाभिनेदस्माहतेर्यया ॥ २१ ॥ मधुहिंडोविगोपीयायरुहलायस्नेहस्मेशाः शत्रुभ्यःशांकितः स
ष्यापुंकरुहस्यस्पायपादातु इत्ती वेचतरंगिनी ह तनानेना ॥ २२ ॥ पांडोः करुकेशजनतात पाद्वा
नवपिकोरवाएवलात प्रियैःकुद्धवादिभिः सह ॥ २३ ॥ करुवेचेकरुदेशान्तर्गतेएववनतक्रमोग्रविवाहि

पत्नाः पांस्त्रीनमपापासपेशले निरस्तशोचेवनसाधःकुर्वते ॥ पामांरहस्यैशुश्रूरलोचनः पति
र्नेजातपैमाहृतिभिर्हृदिस्थशान ॥ २० ॥ एवंविधावदंती नामगिरः पुरघोषिता ॥ निरीक्ष
णेनाभिनंदस्मास्मितेनयथोक्तिः ॥ २१ ॥ अजातशत्रुः शतनागोपीथायमधुद्विषः ॥ शं
कोभ्यःशांकितःस्नेहात्सापुंककचतरंगिनी ॥ २२ ॥ अथपट्टरागनामश्रोणिः कोरवाल्लिस्ता
त्मान ॥ सन्निवर्त्य हठात्रिग्धाग्रायास्वनगरीप्रियैः ॥ २३ ॥ करुजांगलपांचालानथार
मेत्ना साधयागुतात ॥ बलावर्तेकरुदेवेत्नमत्स्यान्मात्रस्वमानयत् ॥ २४ ॥ मरुधन्वमतिक्रम्य
सौवीराभीरयोःपरान् ॥ आनर्तान्भार्गवोपागात्क्लांतवाहोमनाग्विभुः ॥ २५ ॥ तत्रतत्र ह
तत्रयैर्हैः प्रत्युदितार्हणाः ॥ सायंभेजेदिशंपश्चाद्गविष्ठोगांगतस्तदा ॥ २६ ॥

त ॥ मरुन्विहृद्दकदेशाधन्वाल्पोदकः ॥ आनर्तादेशाद्वारकादेशः सविभुःकृपागात्प्राप्तः ॥ हेमा
गे दृष्टमनाकईषत ग्लानावाहायस्य सः ॥ तत्रतास्मिन्देशतत्रयैर्जनैः प्रत्युदितानि निवेदितानि
अर्हणानि हस्तपादानि यस्य सः सायंसमयेद्रूपश्चात्पश्चिमा दिशंभेजे प्राप्तः तदा गविष्ठः सूर्यो
स्थः सूर्यो यस्मात्तादृशेकोत्तरः प्रविष्टः अस्तंगतइत्यर्थः ॥ अथ ग्रामावाएवग्रामरुद्रेति अथ सायं प्रविशती
निगृह्णते ॥ यद्वा तदा सायं काले जाते यादवमीयप्रविष्टाभूः मोक्षयिति: गांजलाशयगतः सन् ॥

[illegible] ॥ ४८ ॥

श्री॰
भा॰प्र॰
टी॰
११

श्रीभावार्थदीपिकायां प्रथमे दशमः ॥१०॥ आनर्त्तैः स्तूयमानस्य पुरीं निर्विशपर्वधभिः ॥ एकादशेरतिः ।
समागमाद्देवेंद्रस्य वर्ण्यते ॥ उत्सवैरुज्ज्वलन्मौरपुरं द्वारकां जनैरागतं ॥ उज्ज्वलद्वारदीपालिस्वपुरे प्रभुराविवे
शत् ॥ स उपव्रज्य समृद्धान्देशान् वरं पांचजन्यं शंखं दध्मौ वादितवान् ॥१॥ दरवरः शंख उच्चकाशे शु
शुभे धवलं उदरं यस्य सः ॥ कथंभूतः उच्चकाशे उरुक्रमस्य करकमलसंपुटे कलहंसो राजहंसो यथा च ।
कालीनं हतं ॥२॥ जगतो यद्भयं तस्य भयावहं प्रत्युद्ययुः ॥ प्रत्युद्गमं भर्तृदर्शने लालसः उत्कंठा या
सेताः ॥३॥ तत्र तस्मिन् प्रत्युद्गमे उपनीताः समर्पिता बलयः उपायनानि याभिः तथा रवेर्दीपमिवास्मि

इति श्रीभागवते प्रथमस्कंधे दशमोध्यायः ॥ सूतः ॥ आनर्त्तान्स उपव्रज्य स्वृद्धान् जनपदान्स्वका
न् ॥ दध्मौ दरवरं तेषां विषादं शमयन्निव ॥१॥ स उच्चकाशे धवलोदरो दरोप्युरुक्रमस्याध
रशोणशोणिमा ॥ दाध्मायमानः करकंजसंपुटे यथाब्जखंडे कलहंस उत्स्वनः ॥२॥ त
मुपश्रुत्य निनदं जगद्भयभयावहं ॥ प्रत्युद्ययुः प्रजाः सर्वाः भर्तृदर्शनलालसाः ॥३॥ त
त्रोपनीतबलयो रवेर्दीपमिवादृताः ॥ आत्मारामं पूर्णकामं निजलाभेन नित्यदा ॥४
प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा ॥ पितरं सर्वसुहृदमवितारमिवार्भकाः ॥५
नताः स्म ते नाथ सदांघ्रिपंकजं विरिंचिवैरिंच्यसुरेंद्रवंदितं ॥ परायणं क्षेममिहेच्छतां परं
न यत्र कालः प्रभवेत्परः प्रभुः ॥६॥

ऽदरेण समर्पयंतोपि हृष्टाः रवेर्दीपमिवेति ॥४॥ पितरमर्भका इव सर्वसुहृदमवितारमपि उरि
मु नरेणान्वयः ॥ सुहृदं सनेवावितारं नतु कामे न सुहृदेतः ॥ आत्मारामत्वात्पि हेतुः परमानंद
निजस्वरूपलाभेन वै पूर्णकामं किमस्मत्पुरिस्याह ॥५॥ नताः स्मेति विरिंचिर्ब्रह्मा वैरिंच्याः सन
कादयः ॥ इह संसारे परं क्षेममिच्छतां परायणं नः पोषणं ब्रह्मादीनामपि कालो यत्र प्रभुर्न भवे

११
न १

श्रुतः भवाय उद्भवाय न स्मात्कं नेम वदेहे विश्वभावन कृतिनः कृतार्था बभूविम जाताः तदयं कृतार्थत्वमेवा
ह अहो इति ॥ ७ ॥ अहो भवता वयं सनाथाः स्म यद्यस्मात् नवरूपं पश्येम त्रैविष्टपानामपि दूरदर्शनं दे
वानामपि दुर्लभमित्यर्थः प्रेमस्मितेन स्निग्धं निरीक्षणं यस्मिन् तदाननं यस्मिन् तत् सर्वसौभगं सर्वसौभा
ग्यस्मितलक्षणं सर्वसौभाग्यं ॥ ८ ॥ यर्हि हे अम्बुजाक्ष भवान् अपससार अम्बुजाक्षापससारेति पाठे न इतः सुहृद्दिदृक्षया
अस्मानतीत्य गतवान् तत्र तदा अब्दकोटिप्रतिमः क्षणो भवेदित्यर्थः ॥
दर्शनादृते तवादर्शनेऽस्माकं क्षणोऽपि अब्दकोटिप्रतिमः ॥ ९ ॥ इति च एवंविधाः प्रजाः स्वात्मानं विधाय वाचः
शृण्वन् अनुग्रहं दृष्ट्या वितन्वन्निति ॥ १० ॥ मधुभोजदशार्हाः पञ्चभिः मधि
भवाय नस्त्वं भव विश्वभावन त्वमेव माताथ सुहृत्पतिः पिता ॥ त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृ
त्त्या कृतिनो बभूविम ॥ ७ ॥ अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनं ॥ प्रेमस्मि
तस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगं ॥ ८ ॥ यर्ह्यम्बुजाक्षापससार भो भवान्कुरून्मधू
न्वाथ सुहृद्दिदृक्षया ॥ तत्राब्दकोटिप्रतिमः क्षणो भवेद्रविं विनाक्ष्णोरिव नस्तवाच्युत ॥ ९ ॥ इति
चोदीरिता वाचः प्रजानां भक्तवत्सलः ॥ शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन्प्राविशत्पुरीं ॥ १० ॥ मधु
भोजदशार्हार्हकुकुरान्धकवृष्णिभिः ॥ आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ॥ ११ ॥ सर्वर्तुसर्व
विभवपुण्यवृक्षलताश्रमैः ॥ उद्यानोपवनारामैर्वृतपद्माकरश्रियं ॥ १२ ॥ गोपुरद्वारमार्गेषु कृत
कौतुकतोरणां ॥ चित्रध्वजपताकाग्रैरन्तःप्रतिहतातपां ॥ १३ ॥ संमार्जितमहामार्गरथ्यापणकचत्वरां
सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः ॥ १४ ॥
नि स्वतुल्यबलैर्मधुभोजादिभिर्गुप्तां रक्षितां ॥ ११ ॥ सर्वर्तुषु सर्वविभवाः पुष्पादिसंपद्येषां ते
पुण्यवृक्षाः लताश्रमाः लतामण्डपाः तैर्युताः उद्यानादिभिर्वृताः पद्माकराः सरांसि तेषां श्रीः शोभा यस्यां ता
उद्यानं फलप्रधानं उपवनं पुष्पप्रधानं आरामः क्रीडार्थं वनं ॥ १२ ॥ गोपुरं पुरद्वारं द्वारं गृहद्वारं कृतानि कौ
तुकेन तोरणानि यस्यां चित्राणि ध्वजाः ध्वजयष्टयः ताभिः पताकाः चित्राणि ध्वजपताका
नामग्रैरन्तः प्रतिहतः आतपो यस्यां ॥ १३ ॥ संमार्जिता महामार्गा रथ्या आपणकाः चत्वराणि यस्यां
तामुप्तां आपणकाः पण्यवीथ्यः चत्वराणि अङ्गणानि फलादिभिरुप्तामवकीर्णां ॥ १४ ॥

श्री
भाग॰
टी॰
११

प्रेष्ठमायांतं निशम्य श्रुत्वा वसुदेवादयः प्रत्युज्जग्मुरिति चतुर्थेनान्वयः ॥१६॥ उच्छ्वसितानि प्रहर्षवेगेना
च्छ्वसितानि त्यक्तानि शयनादीनि यैः स्पृशन्तु तिगतौ ॥१७॥ मंगलार्थं गजेंद्रं पुरस्कृत्य सुमंगलैः सुमंगलपुष्पा
दियुक्तपाणिभिः द्विजैः ब्रह्मघोषो मंत्रपाठः ॥ प्रणयेन स्नेहेनागतः साध्वसः संभ्रमः येषां ॥१८॥ वारमु
ख्या नर्तक्यः प्रत्युज्जग्मुः लसत्कुंडलैर्निर्भातानि दीप्तानि कपोलानि तैः वदनेषु श्रीः शोभा यासां ताः
वारमुख्या नर्तक्यो वेश्याः ॥१९॥ सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः । वंदिनस्त्वमलप्र

द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः ॥ अलंकृतां पूर्णकुंभैर्बलिभिर्धूपदीपकैः ॥१५
निशम्य प्रेष्ठमायांतं वसुदेवो महामनाः ॥ अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥१६॥ प्रद्युम्न
श्चारुदेष्णश्च साम्बो जाम्बवतीसुतः ॥ प्रहर्षवेगोच्छ्वसितशयनासनभोजनाः ॥१७॥ वारणेंद्रं पु
रस्कृत्य ब्राह्मणैः ससुमंगलैः ॥ शंखतूर्यनिनादेन ब्रह्मघोषेण चादृताः ॥१८॥ प्रत्युज्जग्मू रथैर्हृ
ष्टाः प्रणयागतसाध्वसाः ॥१९॥ नटनर्तकगंधर्वाः सूत ॥ वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सु
काः ॥ लसत्कुंडलनिर्भातकपोलवदनश्रियः ॥१९॥ नटनर्तकगंधर्वाः सूतमागधवंदिनः
गायंति चोत्तमश्लोकचरितान्यद्भुतानि च ॥२०॥ भगवांस्तत्र बंधूनां पौराणामनुवर्तिनां ॥ य
थाविध्युपसंगम्य सर्वेषां मानमादधे ॥२१॥ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः ॥ आ
श्वास्य चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः ॥२२॥ स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि ॥ आ
शीर्भिर्युज्यमानोऽन्यैर्वंदिभिश्चाविशत्पुरीं ॥२३॥ राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रि
यः ॥ हर्म्याण्यारुरुहुर्विप्र तदीक्षणमहोत्सवाः ॥२४॥

ज्ञाः प्रस्तावसदृशोक्तयः ॥ नवरसाभिनयचतुरा नटास्तालाद्यनुसारेण ॥ नृत्यंतो नर्तकाः गंधर्वा
गायकाः ते सर्वे गायंति चेति चकारस्यान्वयः ॥ अद्भुतानि चेति द्वितीयचकारस्य वंदिनः स्तुवंतीत्य
र्थः ॥२०॥ यथाविधि यैः सह यथोचितं तैः तथा समागमं कृत्वा सर्वेषां मानं कृतवानित्यर्थः ॥ तदा
दृ प्रह्वेति ॥२१॥ प्रह्वत्वं शिरसा नतिः अभिवादनं वाचा नतिः आश्वास्य अभयं दत्वा श्वपाकानभिव्या
प्य वरैः अभीष्टदानैः अभिमतं कृतवान् शिरोनतिवाङ्नत्यादिभिः ॥२२॥ अन्यैश्च वंदिभिः ॥२३॥ तत्र कृष्णे

श्रीमद्भागवतं ॥ २५ ॥

यद्यस्मान्नित्यंसदाश्च्युतंनिरीक्षमाणानामपिदृशोनैववितृप्यंति॥ अत्रप्राहहेतुः॥२५॥ कथंभू
तंश्रियः शोभाया धामस्थानं अंगं यस्य तं॥ एतदेवाभिनयेनाह॥ श्रियः लक्ष्म्याः निवासो यस्योरः
यस्य मुखं सर्वप्राणिनां दृशां सौंदर्यामृतपानाय पानपात्रं यस्य बाहवो लोकपालानां निवासः॥ सारंगाणां यती
नां सारंगा भक्ताः॥ तेषां यस्य पदांबुजं निवासः॥ ननिरीक्षमाणानां दृशां तृप्तिरिति पूर्वेणान्वयः॥२६॥ सितु
तेनातपत्रैर्व्यजनैरुपस्कृतः अर्कः सूर्य उडुपश्चंद्रस्तत्सहितः इंद्रस्य चापमिंद्रधनुस्तद्वैद्युतं विद्युत्तेजः तै

नित्यंनिरीक्षमाणानांयदपिद्वारकौकसां॥नवितृप्यंतिहिदृशःश्रियोधामांगमच्युतं
२५॥श्रियोनिवासोयस्योरःपानपात्रंमुखंदृशां॥बाहवोलोकपालानांसारंगाणांपदां
बुजं॥२६॥सितातपत्रव्यजनैरुपस्कृतःप्रसूनवर्षैरभिवर्षितःपथि॥पिशंगवासाव
नमालयाबभौघनोयथार्कोडुपचापवैद्युतैः॥२७॥प्रविष्टस्तुगृहंपित्रोःपरिष्वक्तः
स्वमातृभिः॥ववंदेशिरसासप्तदेवकीप्रमुखामुदा॥२८॥ताःपुत्रमंकमारोप्यस्नेह
स्नुतपयोधराः॥हर्षविह्वलितात्मानःसिषिचुर्नेत्रजैर्जलैः॥२९॥अथाविशत्स्व
भवनंसर्वकाममनुत्तमं॥प्रासादायत्रपत्नीनांसहस्राणिचषोडश॥३०॥

परिभ्रमत्कृतमंडलाकारयोः चामरव्यजनयोः
र्कश्चंद्रसोपमानं नक्षत्राणि शुभ्रपुष्पैः चंद्रः ... परिसरे धिविवपुर्भय
चापं वनमालाया विद्युत्तेजः पिशंगवाससः॥ अथ तावन्मेघपदे चिन्हस्य ... वनहिरण्येनो
नः चंद्रो सर्वतो नक्षत्राणि मध्ये च मिलितचाप इंद्रधनुस्थिरं च विद्युत्तेजो यदि भवेत्तदा सोपमोदविश्व
यथा भाति॥ तथा हरिर्बभावित्यर्थः॥२७॥ देवकीप्रमुखाः सप्त वसुदेवपत्नीः मातृः सौंदर्याद्विश्व
सहस्राणि ... नार्यः ... ॥ अष्टाधिकशतोत्तरषोडशभार्यासमातृः तत्पत्न्यंतरमष्टकृता तावत्॥२८॥ सहस्रा
णि च षोडश नवकारादष्टोत्तरशताधिकानीति ज्ञेयं॥३०॥

श्री॰
भाग॰
टी॰
३६

प्रोष्य देशान्तरे उषित्वा आगतं गृहान्तादेव विलोक्य संजातो मनसि महोत्सवो यासां ताः आसनादुत्तस्थुः आ
शयादन्तःकरणाच्चोत्तस्थुः आशयात् अन्तःकरणात् श्रीकृष्णेनात्मनः संश्लेषेच्छातः करणस्य बन्धनमपि
नासहन्तेत्यर्थः ॥ व्रीडितानि विलोचनानि आननानि च यासां ताः अपाङ्गैरेव वीक्षणात् व्रीडितलोचना अथवा
मुखत्वात् व्रीडिताननाः साकं व्रतैरिति हासक्रीडावर्जनादिनियमादिभ्योप्युत्तस्थुरित्यर्थः ॥ धृत
व्रतानामेव व्रतानि स्मृतिरिति वा व्रतानि यानि व्रतवल्लभानि क्रीडोत्सवादिसमाजोत्सवदर्शनं ॥ हासप
रिहासपानेत्यजे सर्वाभिषिक्तमहेकेति ॥ ३१ ॥ आयान्तं पतिं दर्शनानन्तरं समालम्बनात् आयातिरेभिरे तत्राह दृष्टि
भिरिति दृष्टिभिः नतः समीपमागतमात्मजैः पुत्रैर्व्यवहितं कृत्वा आलिङ्गनं स्वरूपापाद्यापातं ॥ आलिङ्गितव
त्यः सर्वाः ॥ तत्र हेतुः ॥ दुरन्तभावाः गम्भीराभिप्रायाः तदा च तासां च नेत्रयोर्निरुद्धमप्यम्बु वाष्पं वैक्ल
पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातमनोमहोत्सवाः ॥ उत्तस्थुरारात्सहसासना
शयात्साकं व्रतैर्व्रीडितलोचनाननाः ॥ ३१ ॥ तमात्मजैर्दृष्टिभिरन्तरात्मना दुरन्तभावाः परिरे
भिरे पतिं ॥ निरुद्धमप्यास्रवदम्बु नेत्रयोर्विलज्जतीनां भृगुवर्य वैक्लवात् ॥ ३२ ॥ यद्यप्यसौ पा
र्श्वगतो रहोगतस्तथापि तस्याङ्घ्रियुगं नवं नवं ॥ पदे पदे का विरमेत तत्पदाच्चलापि यच्छ्रीर्न ज
हाति कर्हिचित् ॥ ३३ ॥ एवं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसां ॥ विधा
य वैरं श्वसनो यथानलं मिथो वधेनोपरतो निरायुधः ॥ ३४ ॥ स एष नरलोकेस्मिन्नवतीर्णः
स्वमायया ॥ रेमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा ॥ ३५ ॥
वात् हे वस्त्रादाय नवदीवल्लभाव ॥ अत एव धैर्यहान्या विलज्जतीनां हे भृगुवर्य वैक्लव्यं वृत्तिरिति ॥ ३२
पार्श्वगतः समीपस्थः तत्रापि रहोगतः एकान्तवर्ती तस्य पदे पदे प्रतिक्षणं नवं नवमेवात्र के शुभन्या
यः का विरमेत निवर्तेत स्वभावात् चलापि श्रीर्न जहाति एवं श्रीकृष्णस्य वर्तितं सविलासमेव विलसि
भो ॥ ३३ ॥ क्षितिभारजन्मनां भूभारभूतानां अक्षौहिणीभिः कृत्वा परिवृत्तं सर्वतः प्रसृतं तेजः प्रभावो येषां श्वस
नो वायुर्वेणुसंघर्षणोत्पन्नमनलं वह्निं विधाय मिथो वधेनोपरतो निवृत्तः निरायुधः ॥ ३४ ॥ स्त्री
रत्नकूटस्थः उत्तमस्त्रीकदंबस्थः ॥ ननु वेदोक्तसंगादिभिः संसारप्रतीतेः कथं भगवान् नवतीर्णः इ
त्युच्यते ॥ तत्राह ॥ उद्दामेति ॥ द्वाभ्यां ॥ ३५ ॥

३६

यासामुद्दामो गंभीरो यो भावो ऽभिप्रायः ॥ तस्य पिशुनः सूचको ऽमलो वल्गुः सुंदरो हासो व्रीडावलोक
श्च इति समासः ॥ ताभ्यां निहतः स्वप्रमदनः श्रीमहादेवो पि सम्मुह्य लज्जया चापं पिनाकमजहात् त्यक्त
वान् इह तु ॥ ताडितो मदनो पि जगद्विजयी संमुह्य निकटे बलात् मूढः सन् चापं पुष्पधनुर्लज्जया जहौ ता
सुप्रमदोत्तमाः कामविजयिनो ऽपि प्रभावा वा स्त्रियो विमथितुं क्षोभयितुं न शेकुः यद्वा भग
वतो मोहिनी रूपेण महेशो ऽपि विमोहित एव ॥ एतास्तु तादृशविलासा एवेति ॥ तथा ऽपि ॥ ताः कुहकैः
कपटैर्विभ्रमैर्यस्येंद्रियं मनः क्षोभयितुं न शेकुः ॥ ३६ ॥ तमीदृशममुं प्राकृतो लोक आत्मौपम्येन
स्वसादृश्येन संगिनं मनुजं मनुते कुतः व्यापृण्वानं व्याप्रियमाणं यतस्त्वयमबुधस्तत्त्वतः कु

उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतो मदनो ऽपि यासां ॥ संमुह्य चापम
जहात्प्रमदोत्तमास्ता यस्येंद्रियं विमथितुं कुहकैर्न शेकुः ॥ ३६ ॥ तमयं मन्यते लोको ह्यस
संगमपि संगिनं ॥ आत्मौपम्येन मनुजं व्यापृण्वानं यतो ऽबुधः ॥ ३७ ॥ एतदीशनमीशस्य
प्रकृतिस्थोपि तद्गुणैः ॥ न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया ॥ ३८ ॥ तं मेनिरे ऽबला
मूढाः स्त्रैणं चानुव्रतं रहः ॥ अप्रमाणविदो भर्तुरीश्वरं मतयो यथा ॥ ३९ ॥ इति श्री
भागवते प्रथमस्कंधे एकादशो ऽध्यायः ॥
॥ ११ ॥

न त्वयमेवं व्यापृण्वानो ऽस्तीति तत्राह ॥ एतदिति ॥ ३७ ॥ ईशस्य ईशनमैश्वर्यं नाम एतदेव किं तत् प्रकृ
तिस्थोपि तत्स्थान् गुणैः सुखदुःखादिभिः संस्थानयुज्यते इति यतः यथा आत्मस्थैः ज्ञानादिभिरि
त्याश्रया पि बुद्धिर्न युज्यते न तु धर्मादिसुधनात्वात्मस्थैरानंदादिभिः सत्त्वप्रकाशादिभिर्यथा
शुद्धिर्युज्यते इति एवं तत्र स्थितेनापि तदाश्रया बुद्धिं तद्धर्मैर्न युज्यते इति एवं
प्रकृतिस्थोपि तद्गुणैर्न युज्यते इति यतः एतदीशनमीशस्येति तत्स्वरूपं यतस्तत्तत्ता न तामाह ॥
३८ ॥ तं मेनिरे अबला मूढा अप्रमाणविदः प्रमाणं नियन्तारमहि
मानमजानंत्यः ईश्वरं तं मतयः यथा सधर्मं यथा गिनमपि न तु ॥ यद्वा
यथा मामानमतयः कल्पनाः तथा तं मेनिरे ॥ ३९ ॥ इति प्रथमे एकादशो ऽध्यायः ॥
॥

परोक्षं पश्यन्संगाय द्रौणिदंष्ट्रादिविस्मयात् ॥ द्वादशे तत्र देवाद्यः परीक्षिज्जन्मवर्णनं ॥ परीक्षितो यथा जन्म
जन्म कर्मविलापने ॥ संस्थां च पाण्डुपुत्राणामवदत्कृष्णकथोदयं ॥ इति प्रतिज्ञाय पांडवानां ज्यस्थितिरिह
यो ह्रादात् समसंगं सप्तमाध्याय समारम्भनिरूपिता ॥ इदानीं मोक्षोपो ह्रातिक्रम्य काकुवादपूर्वकं पृच्छति ॥ अश्व
त्थाम्नेति ॥ उपसृष्टेन विसृष्टेन तस्य जन्मादि ब्रूहीत्युत्तरेणान्वयः ॥१॥ सपरीक्षित्ते स्वदेहत्य
क्त्वा प्राप्त्येन तत्रा यथा यामीत्याह ॥ गदितुं यदि मन्यसे ॥ श्रद्धेहेन तर्हि ब्रूहीति यस्य ज्ञानमदात्
शुक इति ॥ अथ लोकाद्यात्कारणं निःस्पृहत्वमाविराजः ॥ श्रीकृष्णानुग्रहात्ताटक पौत्रः सम जनीति

शौनक उवाच ॥ अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा ॥ उत्तराया हतो गर्भ ईशेनाजीवि
तः पुनः ॥१॥ तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः ॥ निधनं च यथैवासीत्स प्रेत्य गत
वान्यथा ॥२॥ तदिदं श्रोतुमिच्छामि गदितुं यदि मन्यसे ॥ ब्रूहि नः श्रद्दधानानां यस्य ज्ञा
नमदाच्छुकः ॥३॥ सूतः ॥ अपीपलद्धर्मराजः पितृवद्रंजयन्प्रजाः ॥ निःस्पृहः सर्वकामेभ्यः
कृष्णपादानुसेवया ॥४॥ संपदः क्रतवो लोका महिषी भ्रातरो मही ॥ जंबुद्वीपाधिपत्यं च यश
श्च त्रिदिवं गते ॥५॥ किं ते कामाः सुरस्पार्हा मुकुन्दमनसो द्विज ॥ अधिजह्रुर्मुदं राज्ञः क्षुधि
तस्य यथेतरे ॥६॥ मातुर्गर्भगतो वीरः स तदा भृगुनंदन ॥ ददर्श पुरुषं कंचिद्दह्यमानोऽस्त्र
तेजसा ॥७॥

वक्तुं तस्य युधिष्ठिरस्य श्रीकृष्णसेवनानुष्ठेकमाह अपीपलदिति त्रिभिः ॥३॥ पितृवदपीपलत्पा
लयामास ॥ निःस्पृहत्वे हेतुः ॥ कृष्णपादेति ॥४॥ क्रतवः स्वकृतोपार्जिता लोकाः सूनृतेसंपदादयः ॥
कामादयः विषयाः सुरस्पार्हाः सुराणामपि स्पृहणीयाः हे द्विजा आत्मोत्सवं प्रीतिं किमधिजह्रुः न कृतव
न्त इत्यर्थः ॥ अत्र हेतुर्मुकुन्दमनस इति मुकुन्दे एव मनो यस्येति ॥ यथा बुभुक्षितस्य स्रगादिकमन्यः इतरैर्व
क्तृदनाद्याः ॥ न कुर्वंति तद्वत् ॥ प्रसंगमाह ॥ मातुरिति ॥६॥ गर्भ एव ददर्श कथंभूतमित्यर्थः ॥७॥

प्ररं स्तव लसत्स्फुरत्पुरटं मौलिर्यस्यास्तीति ॥ तं मौलिनमिति त्रीहाद्दिव्यकुन्तलविभूषणः ॥ अपीव्यमतिसुं
दरं पश्यामिति वपादाभ्यां दृश्यत इति दर्शनं रूपं यस्य तं डिम्भं समीपस्थं पितावसुदेवो मनसा चिन्ताग्र
स्तमविकम्पं ॥ ८ ॥ तं मं दाहं नीलोत्पलकावं नन्नमेयं कुण्डलं यस्य तं तत्काले समं भाद्रपद्यां शुक्लेऽष्टमेऽवे ॥ अष्टोम
दृष्ट्वा विगर्भस्त्रादिवीडेतिभावः ॥ ९ ॥ नावतिः सर्पः नीहारांहिम ॥ १० ॥ अस्त्र तेजः विधमेते विनाशयते
सन्निकर्षसमीपे ददर्श दृष्ट्वा च एवंविधो गर्भगतो बालः कृष्णो क इति पर्यैक्षत तत्वितर्कितवान् ॥ अस्य बालक
स्यै तद्विभूतवानिति स्वविततर्करूपः धर्मं गोपायतीति धर्मगुप् धर्मरक्षको व्यापकश्च ॥ ११ ॥ दशमासस्य
परिच्छेद्यस्य तस्य पश्यतः ॥ तत्रैवान्तर्दधान तममग्रतः यतो विभुः सर्वगतः ॥ १२ ॥ उदर्के उत्तरफले सर्वेषु

अङ्गुष्ठमात्रममलं स्फुरत्पुरटमौलिनं ॥ अपीव्यदर्शनं श्यामं तडिद्वाससमच्युतं ॥ ८ ॥ श्रीम
द्दीर्घचतुर्बाहुं तप्तकाञ्चनकुण्डलं ॥ क्षतजाक्षं गदापाणिमात्मनः सर्वतो दिशं ॥ ९ ॥ परिभ्र
मन्तमुल्काभां भ्रामयन्तं गदां मुहुः ॥ अस्त्रतेजः स्वगदया नीहारमिव गोपतिः ॥ १० ॥ विधमन्तं
सन्निकर्षे पर्यैक्षत क इत्यसौ ॥ विधूय तदमेयात्मा भगवान्धर्मगुब्विभुः ॥ ११ ॥ मिषतो दश
मास्यस्य तत्रैवान्तर्दधे हरिः ॥ १२ ॥ ततः सर्वगुणोदर्के सानुकूलग्रहोदये ॥ १२ ॥ जज्ञे वंशधरः
पाण्डोर्भूयः पाण्डुरिवौजसा ॥ १२ ॥ तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः ॥ जातकं का
रयामास वाचयित्वा च मङ्गलं ॥ १४ ॥ हिरण्यं गां महीं ग्रामान्हस्त्यश्वान्नृपतिर्वरान् ॥ प्रादात्स्व
न्नं च विप्रेभ्यः प्रजातीर्थे स तीर्थवित् ॥ १४ ॥

णानामुत्तरोत्तराधिक्यं स च केवलग्रहनक्षत्रकृतः ॥ ग्रहनक्षत्रैः सहितानां अनुकूलग्रहाणामुद
ये यस्मिन् जज्ञे जातः ॥ १२ ॥ जातकं जातकर्म मङ्गलं ॥ १४ ॥ वरान् श्रेष्ठान् यावत्त्रच्छिद्यते नालं ता
वन्नाशौचमिति स्मृतेः ॥ छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते इति वचनात् ततः पूर्वं प्रादात् ॥ स्व
न्नं भोजनार्थं ग्रामान्वा प्रजातीर्थं पुत्रोत्पत्तिपुण्यकाले पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयमिति स्मृ
ते ॥ देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनां ॥ आयान्ति हि तस्मिन् पात्रे पुण्यं तस्मादहस्तद्दानं सुवर्णं ॥ यस्मात्तद
हः पुण्यं पुण्यं च सर्वदेति ॥ १४ ॥

श्री०
भाग०
टी०
७८

हे पौरवर्षभ कुरूणां श्रेष्ठ पाण्डुवंश्यानां सुष्ठु दिष्ट्या अस्मिन् प्रजातन्तौ ॥१६॥ दैवेन कृष्णेन प्रतिघाते
न दुर्निवारेण संस्थानाशं प्राप्य वेदसुमिमं प्रति ब्रह्माणः यस्मात् प्रभविष्णुना श्रीविष्णुना रा
तो दत्तः तस्माल्लोके विष्णुरात इति नाम्ना भविष्यति ॥ नात्र सन्देहः इति तेराजानं ब्राह्मणा ऊचुरिति ॥
अन्वयः ॥१७॥ गुणैर्महाभागवतश्च भविष्यतीत्युक्ते हृष्टो राजा द्विजान्पृच्छति ॥१८॥
अपि स्विद्यशसा साधुवादेन यथा स्वकीर्त्या अनुवर्तिता भविष्यतीति ॥ पूर्वोक्तान्वेष वंश्यान् देवव्र
तप्रभृतीन्ब्राह्मणाः तत्र राजानं प्रत्युचुरिति ॥ एव ह्यस्मिन्प्रजातन्तौ कुरूणां पौरवर्षभ
१६ ॥ दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि ॥ रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णु
ना ॥१७॥ तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्रवाः ॥ भविष्यति न सन्देहो महाभागव
तो महान् ॥१७॥ युधिष्ठिर उवाच ॥ अप्येष वंश्यान् राजर्षीन् पुण्यश्लोकान्महात्मनः ॥ अनुव
र्तिता स्विद्यशसा साधुवादेन सत्तमाः ॥१८॥ ब्राह्मणा ऊचुः ॥ पार्थ प्रजाविता साक्षादि
क्ष्वाकुरिव मानवः ॥ ब्रह्मण्यः सत्यसन्धश्च रामो दाशरथिर्यथा ॥१९॥ एष दाता शरण्य
श्च यथा ह्यौशीनरः शिबिः ॥ यशो वितनिता स्वानां दौष्यन्तिरिव यज्वनां ॥२०॥ धन्विनाम
ग्रणीरेष तुल्यश्चार्जुनयोर्द्वयोः ॥ हुताश इव दुर्धर्षः समुद्र इव दुस्तरः ॥२१॥ मृगेन्द्र इ
व विक्रान्तो निषेव्यो हिमवानिव ॥ तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव ॥२२॥ ॥

माः साधुवर्याः वंश्यान् भवान् ॥१८॥ प्रजानामविता रक्षकः मानवो मनोः पुत्रः ब्रह्मण्यो ब्रह्महितः सत्य
प्रतिज्ञः श्रीरामो यथा ॥२०॥ उशीनरदेशाधिपतिः शिबिः येन स्वमांसं श्येनाय दत्त्वा शरणागतः कपो
तो रक्षितः स्वानां ज्ञातीनां यज्वनां च यशो दौष्यन्तिर्भरत इव ॥२१॥ अर्जुनयोः पार्थकार्तवीर्ययोः
२२॥ हिमवानिव सतां निषेव्यः ॥ अन्यगतिक त्वेन वसुधेव तितिक्षुः क्षान्तः पित्रोर्मातापितराविव

॥ स्कं० १ ॥ भागवतटीका
७८

यं

पितामहो ब्रह्मलोकेनसमः सोमोसमनेमागृणीयोहरिः सर्वैः सद्गुणैयन्नामहात्म्यंतस्मिन ॥ श्रीकृष्णतत्त्वः
२४ ॥ धृतराष्ट्रोविष्णुसमः भद्रायदेवोमिवेशोयसप्राहमोकतो ॥२५॥२६॥ जनमेजयादीनामविष्णुरुक्तो
२७ ॥ द्विजपुत्रेणप्रेरितानन्दकादम्ननामनुयुपश्च सहरेः पदप्रमनस्यानमविष्णाति ॥२८॥ ततस्तुजिता
मितमान्मनोवाचायाम्ययेनसः ॥ ३ ॥ हृदशरीरंगंगांदिवाः जलामयंपदवासति ॥२९॥ लब्ध्वाउपाचितिःपू
जायेःपरीक्षितितिनामनिर्वकिसप्तवइति ॥३०॥ यदस्मात्प्रभुः समर्थः सनामेदृहगृहणमनुध्यायन्निह
हृदयमानवनरेषुमध्येसर्वमपिनरंपरीक्षेत ब्रयमसोम वेदितिनोवाइतिविचारयेदतः ॥ परीक्षितिदितिख्यो

पितामहसमः सोमोब्रह्मादेशितशिष्योपमः ॥ आश्रयः सर्वदेवानांयथादेवोरमापतिः ॥२४॥ स
र्वतद्गुणमाहात्म्यादेषकृष्णसमव्रतः ॥ रंतिदेवइवोदग्रोयथातिरिवधार्मिकः ॥२५॥ धृत्यावु
लिसमः कृष्णेप्रज्ञादइवसद्गृहः ॥ आहर्तैषोश्वमेधानांवृद्धानांपर्युपासकाः ॥२६॥ राजर्षी
णांजनयिताशास्ताचोत्पथगामिनां ॥ निग्रहीताकलेरेषभुवोधर्मस्यकारणात ॥२७॥ स तत्का
लमनोमनुंसिद्धिजपुत्रोपसर्जितात ॥ प्रपत्स्यतेउपश्रुत्यमुक्तसंगःपदेहरेः ॥२८॥ जिज्ञासित
मयायात्मयाज्ञेनबोधमहत्मात्सो ॥ हित्वेदंनृपगांगायांयास्यत्यद्धाकुतोमयं ॥२९॥ इतिराज्ञउ
पादिश्यविप्राजातककोविदाः ॥ लब्धापचितयः सर्वेप्रतिजग्मुःस्वकान्गृहान ॥३०॥ सएष
लोकविख्यातःपरीक्षिदितियःप्रभुः ॥ पूर्वंदृष्टमनुध्यायन्परीक्षेतनरेष्विह ॥३१॥ सराजपुत्रोव
वृधेआशुशुक्लइवोडुपः ॥ आपूर्यमाणःपितृभिःकाष्ठाभिरिवसोन्वहं ॥३२॥ यक्ष्यमाणोश्वमे
धेनज्ञातिद्रोहजिहासया ॥ राजालब्धधनोदध्योनान्यत्रकरदंडयोः ॥ ३३ ॥
नः सर्वदृष्टमितिवापाठः ॥३१॥ शुक्लेपक्षेउडुपचन्द्रइवप्रसिद्धउडुपोन्वहं ॥ यथाकाष्ठाभिः पंचदशक
लाभिरापूर्यमाणोवर्धते ॥ एवंपितृभिर्युधिष्ठिरादिभिः काष्ठाभिः वत्सःवर्द्धिभिःकलाभिरापूर्यमा
णोववृधे सर्वमपकृष्णोक्तात्समश्वमेधात्त्वावसरेसमकारकयथाति ॥३२॥ ज्ञातिद्रोहस्यहानेच्छयायक्ष्य
माणः करदंडयोरन्यत्रनान्यमार्गेविनालब्धधनः दध्यौचिन्तयामासकरदंडस्वरूपेजनमरणमात्रोपक्षी
णोनात्महीनमहन्तमयज्ञेनाकृत्सवंगणोधादिकमानीतवंतः तेनसमं नसंभारः संपादितयज्ञापकर

श्रीमद्भागवतटीका ॥ ३३

श्री॰
भाग्र॰
टी॰
३४

२४ ॥ इति श्रीभावार्थदीपिकायां प्रथमे द्वादशः ॥ निर्गमे धृतराष्ट्रस्य विदुरो मात्रयोदशे ॥ उक्तः पौत्राभिषेकेन
वत्कुराज्ञो महोदये ॥ इदानीं परीक्षितः कलिनिग्रहादीनि कर्माणि कथयिष्यन् ॥ विदुरागमनेन
धृतराष्ट्रप्रस्थानं ततोऽनुनारागमं ततः पांडवप्रस्थानं च निरूपयति त्रिभिरध्यायैः । गतिं हरिं तयात्मगतया
वाप्तं विवित्सितं ज्ञातुमिष्टं सर्वं येन तत्र देवाह ॥ १ ॥ यावतः कर्मयोगव्रतादिविषयान्प्रश्नान्स्वयमेकृत
वान् कौषारवस्य मैत्रेयस्य पुरतः पश्चाच्च विरतः ॥ एकस्मिन्नात्मात्रेण गोविंदे जातैकभक्तिः कृतार्थः ॥

तमभिषिच्य नमालत्पयातान्यकान्तरवादितः ॥ धनं प्रहीणमाजह्रुरुदीच्यां दिशि भूरिशः ॥ २४ ॥ तेन
संभृतसंभारो धर्मपुत्रो युधिष्ठिरः ॥ वाजिमेधैस्त्रिभिर्भीतो यज्ञैः समयजद्धरिं ॥ २५ ॥ आहू-
तो भगवान्राज्ञा याजयित्वा द्विजैर्नृपान् ॥ उवास कतिचिन्मासान्सुहृदां प्रीतिकाम्यया ॥ २६ ॥ त-
तो राज्ञाभ्यनुज्ञातः कृष्णया सह बंधुभिः ॥ ययौ द्वारवतीं ब्रह्मन्सार्जुनो यदुभिर्वृतः ॥ २७ ॥ इति
श्रीभागवते प्रथमे द्वादशः ॥ सूतः ॥ विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिं ॥ ज्ञात्वागाद्धास्तिनपुरं
तयावाप्तविवित्सितः ॥ १ ॥ यावतः कृतवान्प्रश्नान्क्षत्ता कौषारवाग्रतः ॥ जातैकभ-
क्तिर्गोविंदे तेभ्यश्चोपरराम ह ॥ २ ॥ तं बंधुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः ॥ धृतराष्ट्रो युयु-
त्सुश्च सूतः शारद्वतः पृथा ॥ ३ ॥ गांधारी द्रौपदी ब्रह्मन्सुभद्रा चोत्तरा कृपी ॥ अन्याश्च जाम-
यः पांडोर्ज्ञातयः ससुताः स्त्रियः ॥ ४ ॥ प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतं ॥ अभिसंगम्य
विधिवत्परिष्वंगाभिवादनैः ॥ ५ ॥ मुमुचुः प्रेमबाष्पौघं विरहौत्कंठ्यकातराः ॥ राजा तमर्ह-
यांचक्रे कृतासनपरिग्रहं ॥ ६ ॥ तं भुक्तवंतमासीनं विश्रांतं सुखमासने ॥ प्रश्रयावनतो राजा प्रा-

सन् ॥ तेभ्यः प्रश्नेभ्य उपरराम ततः परं न विजिज्ञासितवान् ॥ २ ॥ सूतः संजयः शारद्वतः कृपः ॥ ३ ॥ कृपी
द्रोणभार्या जामयो भगिन्यः ससुताः स्त्रियः ॥ प्राणं तन्व इति ... तस्मिन्नागते इंद्रियाणि प्राणमनु चेष्टन्ति
तन्वः करचरणादयो नितिष्ठंतीति ... प्रत्युत्थानं ... ॥ ५ ॥ विरहेण य
दौत्कंठ्यं तेन कातरा विवशाः ॥ ६ ॥

३४

पतितो ऽपि हि यत्नानि यथा तान्निदेनैव पदच्छाया यथा वर्धयंति ॥ तथा ग्रहाणान्तपात च्छायासमेधितास्मा
त्किं स्मरथ्यापमेधितत्वमेवाह विपक्षणो ग्रसनामो विनाशनः ॥८॥ कथा हृत्या वर्तिते देह शुद्धिः कृता
कानि च तीर्थानि सेवितानीति भवद्भिः तीर्थानि इदं च न स्वार्थं कृतं किंतु तीर्थानुग्रहार्थमेवेत्याह ॥ भ
वद्विधेति ॥९॥ मलिनजनसंपर्कतः तीर्थानि मलिनानि जायंते ततः पुनः स्वयं तीर्थीकुर्वंति स्वांतस्थेन
नः तत्रस्थेन स्वस्वांतस्थेनेति ॥१०॥ अपि किं सुखमासते भवद्भिः क्वापि दृष्टाः श्रुता वा ॥११॥ यदुकुल
त्वयावर्णितं तदेत्तमाह ॥ नत्विति अप्रियं कृत न त्वमुपदिशेत् न तु मृदो ऽसो कथमुपदिशेत् न त्वमोक्ष्यइः।
कितयमः तदृ पाण्डवानां भीतस्तत्र किं कारणं यम वा त्रागतेन तत्र को दंडधारः त्वमेव ताघामाह अबिभ्रदिति ॥१४॥ यु

युधिष्ठिर उवाच ॥ अपि वः स्मरथ नो युष्मत्पक्षच्छायासमेधितान् ॥ विपद्गणाद्विषाग्न्यादेर्मोचिता
यत्समातृकाः ॥८॥ कया वृत्त्या वर्तितं वश्चरद्भिः क्षितिमंडले ॥ तीर्थानि क्षेत्रमुख्यानि सेवि
तानीह भूतले ॥९॥ भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो ॥ तीर्थीकुर्वंति तीर्थानि
स्वांतस्थेन गदाभृता ॥१०॥ अपि नः सुहृदस्तात बांधवाः कृष्णदेवताः ॥ दृष्टाः श्रुता वा यदवः
स्वपुर्यां सुखमासते ॥११॥ इत्युक्तो धर्मराजेन तत्सर्वं समवर्णयत् ॥ यथानुभूतं क्रमशो विना नु
यदुकुलक्षयं ॥१२॥ नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितं ॥ नावेदयत्सकरुणो दुःखितान्द्र
ष्टुमक्षमः ॥१३॥ कंचित्कालमथावात्सीत्सत्कृतो देववत्सुखं ॥ भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्व
षां प्रीतिमावहन् ॥१४॥ अबिभ्रदर्यमा दंडं यथावदघकारिषु ॥ यावद्दधार शूद्रत्वं शापाद्वर्ष
शतं यमः ॥१५॥

पा विदुरः तु तदा तिसर्गः ॥ सो ऽन्यास्य ॥ कश्चिच्चौरान्नानुधावंतो राजभटा माण्डव्यर्षेस्तपस्यतः समीपे
तान्न्यस्य प्राप्ता तेन सह निबद्धा नीयमानास्ते विवेकनदा नृपा शूलमारोपयामासुः ॥ ततो राजा तमृषिं ज्ञात्वा
शूलादवतार्य प्रसादयामास ॥ ततो मुनिर्यमनगरं गत्वा पितरं वाच कस्माद्दृशं शूलारोपणमिति ततो
बाल्ये शलभं कुशाग्रेण विद्ध्वा क्रीडितवानिति ॥ ततः कृतमांडव्यः तेनाबुद्धिपूर्वबाल्ये जातं तामसं दंडेन दे
हितः कालितवान् अतः शूद्रो भवेति स तत एव मानात्काले अर्यमा सर्वदंडधार ॥ इदानीं राज्यापक

श्री भाग० टी० ४०

कुलंधरं वंशधरं ॥१६॥ तदीहया गृहव्यापारेण प्रमत्तानां सतां अत्यक्रामत् ॥ अप्रमत्तान्कालो नातिक्रामतः यद्वा
तानेव प्रमत्तानदितः सन्नित्यर्थः ॥१७॥ अभिप्रेत्य ज्ञात्वा तत्प्रतीकारः क्रियतां किं निर्गम्यतेनेत्यत आह ॥ प्रतिक्रिये
ति सर्वेषामिति येः प्रतिकर्तव्यं तेषामपीत्यर्थः ॥ कथं धनादिवियोगः सोऽतुःशोकान्नस्मा आह येनेति
॥१९॥ येन कालेनाभिपन्नः अभिग्रस्तो ज्ञातः अवस्थानमनिर्देश्यमिति दर्शयन्वैराग्यमुत्पादयति ॥ पितृभ्रा
त्रेति समासः ॥२०॥ आत्मा देहस्य ॥२१॥ येन पुत्रा हताः तेन भीमेन दत्तं पिंडं गृहपाल इव गृहपालः ।

युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कुलंधरं ॥ भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया ॥१६॥ एवं
गृहेषु सक्तानां प्रमत्तानां तदीहया ॥ अत्यक्रामदविज्ञातः कालः परमदुस्तरः ॥१७॥ विदुरस्त
दभिप्रेत्य धृतराष्ट्रमभाषत ॥ राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतं ॥१८॥ प्रतिक्रिया न यस्ये
ह कुतश्चित्कर्हिचित्प्रभो ॥ स एष भगवान्कालः सर्वेषां नः समागतः ॥१९॥ येन चैवाभिप
न्नोयं प्राणैः प्रियतमैरपि ॥ जनः सद्यो वियुज्येत किमुतान्यैर्धनादिभिः ॥२०॥ पितृभ्रातृ
सुहृत्पुत्रा हतास्ते विगतं वयः ॥ आत्मा च जरया ग्रस्तः परगेहमुपाससे ॥२१॥ अंधः पुरैव
बधिरो मंदप्रज्ञाश्च सांप्रतं ॥ विशीर्णदंतो मंदाग्निः सरागः कफमुद्वहन् ॥२२॥ अहो मही
यसी जंतोर्जीविताशा यथा भवान् ॥ भीमापवर्जितं पिंडमादत्ते गृहपालवत् ॥२३॥ अग्नि
र्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः ॥ हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् ॥२४॥ तस्यापि
तव देहोयं कृपणस्य जिजीविषोः ॥ परैत्यनिच्छतो जीर्णो जरया वाससी इव ॥२५॥ गतस्वा
र्थमिमं देहं विरक्तो मुक्तबंधनः ॥ अविज्ञातगतिर्जह्यात्स वै धीर उदाहृतः ॥२६॥

सा ॥२२॥ विसृष्टः दत्तः गरं विषं च दूषिता अवमताः तद्दत्तैरन्नादिभिर्वृत्तैरसुभिः कियत्प्रयोजनं
न किंचिदित्यर्थः ॥२४॥ तस्यापि एवं देहममत्वमनुभवतोऽपि परैति हीयते ॥२५॥ गतस्वार्थं यशोधर्मादि
रहितं मुक्तबंधनः त्यक्ताभिमानः स्वगात इति ॥ अविज्ञातगतिर्यस्य सः धीरः प्राप्तगुः प्रेसरवपसहने
न मुक्तिप्राप्तेः ॥ नरोत्तमस्तु ततः प्राग्वत् उत प्रतीकारः स्वकार्यस्वयमेव परतः परोपदेशतो वा विरक्तो नरो ४०

मृतइदानींधीरोमवेत्याह ॥ अथेति ॥ २६ ॥ अर्वागर्वाचीनएकाग्नृइत्यर्थैश्वर्येणनधैर्यंदयादीनृविक
र्षतिस्माकिंनिनीतितथा ॥ २७ ॥ आजमीढ ॥ अजमीढवंशजः प्रजाचक्षुरंधएवबोधितः सन्अदि
ष्टामेवाहार्ष्टाद्भुतामंदर्शितोऽधावन्मोहयोमार्गमपश्यत् ॥ २८ ॥ सुबलस्यपुत्रीगांधारीसाधीत्ति
पूर्वीलाहिमालयंप्रयातंपतिमनुजगामकथंसातत्कुमारीहिमाद्रिदुःखेवकुलेहिमालयंगतानान।
आह मासदेशान्तप्रदर्शोघ्रस्मिल्लेद्रः खेदमपिकेषांचिस्पर्शकेतन्मंवतीमन्वइत्यर्थः ॥ सनास्ति
नोष्णशालौपुद्धेसन्तीवः प्रहारोपथापार्णतेरेसन्तोप्रहारांपथेतिवा ॥ २९ ॥ कुन्तेमैत्रेमित्रेदेव
यः स्वकायस्तोवेदजाननिर्वेदमात्मवान् ॥ हृदिकुताहरिंगेहात्सुप्रजेस्स्वनरोत्तमः ॥ २६
अथोदीचींदिशंयातस्वैरतानगतिमंवान् ॥ इतोर्वाक्यापशः कालः पुत्राणांविकर्षणं
२७ ॥ एवंराजाविदुरेणानुजेनप्रज्ञाचक्षुर्बोधितोह्याजमीढः ॥ सितांत्वस्वभुस्नेदृपाशान्सुदि
ष्टानित्यक्रामदधावनृसंदर्शितोऽधा ॥ २८ ॥ पतिव्रपाचनंसुबलस्यपुत्रीपतिव्रताचानुजगाम
साध्वी ॥ हिमालयंप्रसन्नंदेशप्रदर्शमनस्ति नाभिवमस्तोप्रहारा ॥ २९ ॥ अजातशत्रुः कृत
मैत्रोकृतानुविंधिंप्राज्ञाताविलगोमपुमिरुक्तः ॥ गृहंप्रविष्टोगतवंदनायनचापश्यत्पित
रौसोवलीच ॥ ३० ॥ ततसंजयमासीनंपप्रच्छोद्विग्नमानसः ॥ गावल्गणेक्वनुतातोहृद्धो
रीनसुनेत्रयोः ॥ ३१ ॥ अंबाचाद्यतपुत्रार्ताःपितरभुः क्वगतः स्वहृत ॥ ३२ ॥ अविमप्यकृतप्र
ज्ञेहतवधः स्वभार्यया ॥ ३३ ॥ आशंसमानः शमलंगणावोढुः खेनापुत्रान् ॥ पितर्युपरतेपां
डौसवीन्नः सुहृदः सोऽप्युत ॥ आदताब्धनतः पितृमोक्षगतावितः ॥ ३३ ॥ सूतः ॥ कृ
वपयास्निहवैक्लव्यात्सनोविरहकातरः ॥ आत्मेश्वरमवल्लोषान्नप्रत्याहातिपीडितः ॥ अथ
नेसंध्यावेदने यन्ननवासंपृच्छपितरौविदुरधृतराष्ट्रो ॥ ३० ॥ हेगावल्गणेगावल्गणेस्मपुत्रसंजय ॥ ३५ ॥ अ
कृतप्रज्ञेमदमनोशमलमवधार्धमाशंसमानआशंकमानोभार्यया माहयावरहतोतोइतः स्यानात
वृक्गताविस्मारहकृपयास्निहवैक्लव्यानचातिपीडितः आत्मेश्वरधृतराष्ट्रमपश्यन्निरहात ॥ कर्षि

म० भा० टी० आश्रमवासिक ॥ ४४ ॥

आत्मनात्मानमात्मानं मनो विष्णुप्रपौर्वं पुत्रं कृत्वा ॥ २५ ॥ प्रभो धृतराष्ट्रस्य गांधार्या श्च वसितं तन्नि
श्चितं यतो मुषितो वंचितो ऽस्मि एवं केचित्कालं शोचति तस्मिन् ॥ २६ ॥ अथ नारद आजगाम अत्रास्ति
कश्चित् संलग्नकेपाठांतरे तुङ्गले ग्रंथ यथा संप्रदाय व्याख्याय तेशोकवेगाद सर्चयन्निवाह ॥ नतूराजा
भ्यर्चयन् ॥ ऊनः शोकाक्रांतः क्षुधाविष्टः श्रद्धया रहितः पुमान् ॥ गुरवे च द्विजातीनां पूजनं न स
माचरेदिति स्मृतेः ॥ २७ ॥ राजा तदनेनोपनीतानां प्रत्युत्थायाभिवंदिते ॥ परमासनमासीनेषोषि वेदेशम
विष्ट्वा ज्ञानीतान्निभ्योभिविष्ट्वा तस्मानमास्मना ॥ अजातशत्रुः प्रत्युत्थेषु प्रभोः पादाववंदयन्
न ॥ २४ ॥ संजय उवाच ॥ नाहं वेद व्यवसितं पित्रोर्वः कुरुनंदन ॥ गांधार्या वा महाबाहो मुषितो
ऽस्मि महात्मभिः ॥ २६ ॥ अथाजगाम भगवान्नारदः सहतुंबुरुः ॥ प्रत्युत्थायाभिवाद्याह सानु
जो ऽभ्यर्चयन्मुनिं ॥ २७ ॥ युधिष्ठिरः ॥ नाहं वेद गतिं पित्रोर्भगवन्क्व गतावितः ॥ अंब वा हत
पुत्रार्ता क्व गता च तपस्विनी ॥ २८ ॥ कर्णधार इवापारे भगवान्पारदर्शकः ॥ अथाबभाषे भग
वान्नारदो मुनिसत्तमः ॥ २९ ॥ नारद उवाच ॥ मा कंचन शुचो राजन्यदीश्वरवशं जगत् ॥ लो
काः सपाला यस्येमे वहंति बलिमीशितुः ॥ ४१ ॥ स संयुनक्ति भूतानि स एव वियुनक्ति च ॥
यथा गावो नसि प्रोताः तंत्र्यां बद्धाः स्वदामभिः ॥ ४२ ॥ वाक्तंत्र्यां नामभिर्बद्धा वहंति बलि
मीशितुः ॥ ४२ ॥ यथा क्रीडोपस्कराणां संयोगविगमाविह ॥ इच्छया क्रीडितुः स्यातां त
थैवेशेच्छया नृणां ॥ ४३ ॥
भावृत ॥ ४८ ॥ नाहं जानामि तपस्विनी क्व वृत्तिः पृथुला ॥ ४९ ॥ अपारे शोकसागरे भगवंस्त्वमेव पार
दर्शकः ॥ अतो ब्रूहीति शेषः ॥ ४० ॥ आदावेव यथार्थ तत्कथनेन शोके न मग्नः क्षिप्तः पतेदिति
प्रथमं तावत् शोकमुपशमयति कं च न मा शुच ः॥ न केवलं तावेव यस्मात् ईश्वराधीनं जगत्
न देवाहं लोकाइति ॥ ४१ ॥ प्रकृतो पारतंत्र्यमुक्त्वा संयोगवियोगयोरप्याह ॥ यथेति ॥ ४२ ॥ क्रीडोप
स्कराणां क्रीडासाधनानां ईश्वराधीनत्वात्र शोकः कार्यः इत्युक्ते लोकतत्त्वं च विचारयमाणे निर्दे

यतः यदि लोकं जनं जीवरूपेणाध्रुवं देहरूपेणाध्रुवं न वेत्ति न ध्रुवं नाप्यध्रुवं शुद्धब्रह्मरूपेणानिर्वच
नीयत्वेन वा भयं वा विजहाति शतं सर्वथा योच तत्रापि पिदेहे तेविज्ञादयो न शोच्याः ॥ स्नेहादन्य
त्र स्नेहरूपं केवलं शोककेतः सवासनामूलविसर्गः ॥४४॥ तस्मान्मां विना कथं ते वर्तेरन्निति मन
सो वैक्लव्यं व्याकुलतां त्यज ॥ स्वस्त्वदेहतः तेषां वृत्तिर्नियतैव नास्तीत्याह ॥४५॥ कालो गुणा
नामकः कर्म जन्मनिमित्तं गुणास्तूपाधानं तदधीनः पांचभौतिको जडः तद्विभागनाशकश्च यथा
सर्पग्रस्तो जगरगिलितो यतस्तदतिन हृदीक्ष्णेन विविनावृत्तिः सर्वतः सिद्धैवेत्याह ॥४६॥ अह
स्तानि पक्ष्यादीनि अपदानि तृणादीनि ॥ तत्र तेषु महत्स्वादिष्वपि फलानि अल्पानि एवं जीवः सर्वोपि

यन्मन्यसे ध्रुवं लोकमध्रुवं च न चोभयं ॥ सर्वथा हि न शोच्यास्ते स्नेहादन्यत्र मोहजात ॥४४॥
तस्माज्जह्यंग वैक्लव्यमज्ञानकृतमात्मनः ॥ कथं त्वनाथाः कृपणा वर्तेरंस्त्वन्मामाश्रिताः ॥४५॥
कालकर्मगुणाधीनो देहोयं पांचभौतिकः ॥ कथमन्यांस्तु गोपायेत्सर्पग्रस्तो यथापरं
॥४६॥ अहस्तानि सहस्तानामपदानि चतुष्पदां ॥ फल्गूनि तत्र महतां जीवो जीवस्य जी
वनं ॥४७॥ तदिदं भगवान्राजन्नेक आत्मात्मनां स्वदृक् ॥ अंतरोनंतरो भाति पश्य तं माययो
रुधा ॥४८॥ सोयमद्य महाराज भगवान्भूतभावनः ॥ कालरूपोवतीर्णोस्यामभावाय सुर
द्विषां ॥४९॥ निष्पादितं देवकृत्यमवशेषं प्रतीक्षते ॥ तावद्यूयमवेक्षध्वं यावदयमिहेश्व
रः ॥५०॥ भवेद्यावदिहेश्वर इति पाठः ॥

सर्वस्य जीवनं जीविका ॥ एतेनैव च सर्वनाम्ना तस्मात्रासमनपुर्कं मोहनिवृत्त्यर्थं च द्वैतस्यावस्तुत्वमाह
४७ ॥ तदिदमहस्तेत्यादि दृश्यं जगत्स्वदृक् भगवानेव न ततः पृथक् स चैक एव न तु नाना न तु स
जातीयविजातीयभेदः स्वगतभेदशून्य एव तत्राह अंतरात्मा स्वरूपमनो न हि सजातीयभेदः
भूतभेदेनतरः चान्तर्बहिश्च भोक्तृभोग्यरूपस्थाभाति ग्रस्तो न विजातीयभेदोपि न त्वेकः कथं तथा तत्र
तीयनेन ग्रहणाह ॥ सोयमद्येति वक्रधा पश्यति कामादीन्दृशो महामायावी हारकाया मिस्याहसोयमि
ति ॥५१॥ भूभारभूतानामभावाय नाशाय तत्रहि श्रीकृष्णे अवतीर्णे तत्र वा स्यामाह इत्याह ॥५२॥ तत्रदे
वानां कार्यं तेन निष्पादितं केवलमवशेषं प्रतीक्षते तत्र यदुकुलक्षयमिति तद्दिव्यन्ते तानि निजधामसया
स्यतीति ॥ अतस्तावद्यूयमपि गच्छतीः सर्वतः ॥ तदेवं नरपतिविदुरवदेवाज्ञानदेवशोकमोह्यांच निवार्य जिज्ञा

श्री
भाग॰
टी॰
४२

यावैश्वमित्रात्स्वधुनीसमीपस्थात्मानांसमधाव्यधात॥ किमर्थं नाम्नाशय्यकुसमभिः स्वोतोभिः सप्तथा
वाहैः सप्तधीलाप्रीतये॰ तदेव नतीर्थं सप्तस्रोता वदंति॥ तत्रतेन कृतमहत्वमायोगमाह स्नातेति वत
भिः॥५२॥ तत्रस्नानेनोम्रः अप्भक्षणेन च नियमा उक्ताः भक्त्यस्थानेऽग्न्याजीकारादयम नः॥ उप
पातानस्वात्मा यस्य विगताः ९ त्रानैष्ठण्यात्मा दितिनियमाः प्रोक्ताः॥५३॥ जितासन इत्यादिनासन
प्राणायामप्रत्याहारा उक्ताः॥ हरिभावनयेतिधारणोक्ताध्यानमजः सत्वतमोरूपामलाये स्यैतित्तिफ
लतोध्यानमुक्तं समाधिमाह॥ ह्यां॥ विज्ञानेति॥५५॥ ज्ञानाननमहं कारास्पदस्थूलदेहाद्विया

धृतवाङ्गः स्वकृतधारणांधार्यावत्समार्थया॥ दहिणेन हिमवत ऋषीणामाश्रमंग
तः॥५१॥ स्वोतोभिः सप्तभिर्याविस्वधुनीसमधाव्यधात॥ सप्तानां प्रीतयेनानासप्तस्रो
तःप्रवर्तते॥५२॥ स्नात्वानुसवनंतस्मिन्हुत्वाचाग्नीन्यथाविधि॥ अब्भक्षउपशां
तात्मासआस्ते विगतैषणः॥५३॥ जितासनोजितश्वासः प्रत्याहृतषडिंद्रियः॥ ह
रिभावनयाध्वस्तरजः सत्वतमोमलः॥५४॥ विज्ञानात्मनिसंयोज्यक्षेत्रज्ञेप्रविलाप्य
ते॥ ब्रह्मण्यात्मानमाधारेघटांबरमिवांबरे॥५५॥ ध्वस्तमायागुणोदर्कोनिरुद्धकरणा
शयः॥ निवर्तिताखिलाहारआस्तेस्थाणुरिवाधुना॥५६॥ तस्यांतरायोमैवाभूः सं
न्यस्ताखिलकर्मणः॥ सवाअद्यतनादूर्ध्वंमपरतःपंचमेहनि॥५७॥

ज्यविज्ञानात्मनि शुद्धे संयोज्यैकीकृत्यतं विज्ञानात्मानंक्षेत्रज्ञे द्विधोजे देवत्रज्ञे इति प्रविला
प्यतेचक्षेत्रज्ञं तंशुद्धे ब्रह्मणि विधोज्याधारेससत्वब्रह्मणि प्रविलाप्य घटांबरं घटाकाशं विधोज्य यथा
महाकाशेप्रविलाप्य तेतद्वन्तमुन्यानोभावमाह॥५८॥ ध्वस्तगुणोदर्कोमायागुणकृतइंद्रियविकारात्मा
सुख्यादिनंमवेत॥ तदुक्तं तस्य नाशित्रियतेऽधर्मत्मासायाप्तुणानासुदर्कोउत्तरफलंवासनायस्य॥ करणा
निचदुरादीनि॥ आशयोमनश्च यस्य॰ तदेवनिवर्तितप्रविलाहारः॥ भोग्यभिंद्रियविषयाहर
णं वायेनसः॥ अयंस्थाणुरिवनिश्चलश्चास्ते॥ तथाभूतमप्यानेनमुघतमाह॥ तस्येति॥५९॥
जौ॥

४२

तस्यविघ्नोमैवाभूदित्याह तत्रागमः छंदसः दर्शनमपि तावत्कुर्यामित्यत आह ॥ सवा अद्यतनादह्नः स्वेच्छा
धीनतर्हि न ह्याकार्यं गमिष्यामीति नेत्याह तच्चेति ॥ न हि गाधायां न च नाथ गमिष्यामि नेत्याह ॥५७॥ पत्युर्देहे
सहोटजे नेपर्णशालायां सह हि तेन योगाग्निना सह गार्हपत्यादिभिर्दह्यमाने तस्य पत्नी बहिः स्थिता सती पति
मनु अग्निं वेक्ष्यति प्रविशति तर्हि विदुरो न च नाथ गन्तव्यं नेत्याह ॥५८॥ विदुरस्तु तन्निशाम्य दृष्ट्वा भ्रातुः स्व
गत्या हर्षं तत् न्यस्तु नाशेन शोकः ताभ्यां युक्तः तस्मात्स्थानात्तीर्थानि सेवितुं गन्ता गमिष्यति ॥५९॥ प्रत्यचः
शोकान् ॥६०॥ इति प्रथमे त्रयोदशोऽध्यायः ॥ चतुर्दशे तु रिष्टानि दृष्ट्वा राजा विशङ्कितः ॥ श्वश्रूणोदह्येनात्क

कलेवरं जहाति स्वं तच्च भस्मीभविष्यति ॥ दह्यमानेऽग्निभिर्देहे पत्युः पत्नी सहोटजे ॥ बहिः स्थि-
ता पतिं साध्वी तमग्निमनुवेक्ष्यति ॥५८॥ विदुरस्तु तदाश्चर्यं निशाम्य कुरुनंदन ॥ हर्षशोकयु-
तस्तस्माद्गंता तीर्थनिषेवकः ॥५९॥ इत्युक्त्वाथारुहत्स्वर्गं नारदः सहतुंबुरुः ॥ युधिष्ठिरो व-
चस्तस्य हृदि कृत्वाजहाच्छुचः ॥६०॥ इति श्रीभागवते प्रथमस्कंधे त्रयोदशः ॥ श्रीसूतः ॥ संप्रस्थि-
ते द्वारकायां जिष्णौ बंधुदिदृक्षया ॥ ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं ॥१॥ व्यतीताः
कतिचिन्मासास्तदा नायात्ततोऽर्जुनः ॥ ददर्श घोररूपाणि निमित्तानि कुरूद्वहः ॥२॥ कालस्य
च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः ॥ पापीयसीं नृणां वार्तां क्रोधलोभानृतात्मनां ॥३॥ जिह्म-
प्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदं ॥ पितृमातृसुहृद्भ्रातृदंपतीनां च कल्कनं ॥४॥ निमित्ता-
न्यत्यरिष्टानि काले त्वनुगते नृणां ॥ लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः ॥५॥

दम
पूर्णातिरोधानसूचितीर्थते ॥ श्रीकृष्णस्य चेति चकारेणाभिप्रायं च ज्ञातुं ॥१॥ कतिचित्सप्तकाला
तिक्रमेणेति ॥ ततो द्वारकातो नागतः तत्र शान्तिमित्तानि ॥ उत्पातान्कुरूद्वहः युधिष्ठिरः ॥२॥ रौद्रां
घोरां तदेवाह विपर्यस्ता ऋतुधर्मा यस्मिंस्तस्य वार्तां जीविकां क्रोधलोभानृतैर्युक्त आत्मा येषां ॥३॥ ज
जिह्मप्रायं कपटबहुलं व्यवहृतं व्यवहारं शाठ्यं वचनं मिश्रं यस्मिन्सौहृदं कल्कनं दंभः ॥४॥ अत्य
रिष्टानि अत्यन्तानिष्टसूचकानि दृष्ट्वा नृणां लोभाद्यधर्मप्रकृतिं च दृष्ट्वा ॥ अनुजं भीमं ॥५॥ ॥
डी ॥ ऊ

श्री भाग टी० ४२

चेतिवितर्कैः ॥६॥ कस्माद्धेतोर्नायातीति ॥ न वेद्मि ॥७॥ अपि किं यदात्मनः आक्रीडं क्रीडासाधनमंगं
मनुष्यनाट्यरूपं उत्स्रष्टुमिच्छति ॥ स कालः प्राप्तः अस्माकं सर्वपुरुषार्थहेतुः कृष्णः स तत्सन्निधियोगं विना
स्माकं मरिष्यन्त्यादित्याशयेनाह ॥८॥ यस्मात्श्रीकृष्णाद्धेतोरेतत्सर्वोपरिस्थितादर्शनः सर्वीकारिष्यतिलो
काश्च यल्लोकाः शत्रून्जित्वा यस्यानुग्रहात् ॥९॥ अदूरात्सन्निहितेन भयेन अस्माकं भाग्यं सन्तं उत्पातान्दैहिकाना
म् ॥१०॥ वामाऊर्वादयः स्फुरन्ति वेपथुः कंपश्च हृदये वर्तते एतेन मह्यमारात्सन्निहितं भयं दास्यन्ति

युधिष्ठिरः ॥ सम्प्रेषितो द्वारकायां जिष्णुर्बन्धुदिदृक्षया ॥ ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च
विचेष्टितं ॥६॥ गताः सप्ताधुना मासा भीमसेन तवानुजः ॥ नायाति कस्य वा हेतोर्नाहं
वेदेदमञ्जसा ॥७॥ अपि देवर्षिणादिष्टः स कालोऽयमुपस्थितः ॥ यदात्मनोऽङ्गमाक्रीडं
भगवानुत्सिसृक्षति ॥८॥ यस्मान्नः सम्पदो राज्यं प्राणा दाराः कुलं प्रजाः ॥ आसन्सपत्न
विजयो लोकाश्च यदनुग्रहात् ॥९॥ पश्योत्पातान्नरव्याघ्र दिव्यान्भौमान्सदैहिकान्
दारुणान्शंसतोऽदूराद्भयं नो बुद्धिमोहनं ॥१०॥ ऊर्वक्षिबाहवो मह्यं स्फुरन्त्यंग पुनः पुनः ॥ वे
पथुश्चापि हृदये आराद्दास्यन्ति विप्रियं ॥११॥ शिवैषोद्यन्तमादित्यमभिरौत्यनलानना
मामंग सारमेयोऽयमभिरेभत्यभीरुवत् ॥१२॥ शस्ताः कुर्वन्ति मां सव्यं दक्षिणं पशवोऽपरे ॥ वा
हांश्च पुरुषव्याघ्र लक्षये रुदतो मम ॥१३॥ मृत्युदूतः कपोतोऽयमुलूकः कम्पयन्मनः ॥ प्र
त्युलूकश्च कुह्वानैर्विश्वं वै शून्यमिच्छतः ॥१४॥ धूम्रा दिशः परिधयः कम्पते भूः सहाद्रि
भिः ॥ निर्घातश्च महांस्तात साकं च स्तनयित्नुभिः ॥१५॥ वायुर्वाति खरस्पर्शो रजसा विसृ
मानाह ॥११॥ शिवा क्रोष्ट्री आदित्यमभिरौति उद्यन्तं सूर्यमभिमुखं क्रोशति अनलानना अग्निं मुखे
वमन्ती ॥ मामंग अभि सारमेयो श्वा अभिरेभति रोदिति अभीरुवत् ॥१२॥ शस्ताः गवा
दयो मां सव्यं वामं कुर्वन्ति ॥ अपरे गर्दभादयो दक्षिणं कुर्वन्ति वाहानश्वान् ॥१३॥ कपोतो यमस्य
दूतः मृत्युसूचकः उलूकः घूकः प्रत्युलूकः तत्प्रतिपक्षो घूकः काकः कुह्वानैः कुत्सित
शब्दैः विश्वं शून्यमिच्छतः ॥१४॥ धूम्रा दिशः परिधयः परिवेषाः लोकस्य भूयेति द्विधानाह ॥१५॥

जंस्तमः असृग्वर्षन्ति जलदा बीभत्समिव सर्वतः ॥१६॥

४२

यद्यसर्वं यदद्य पुढ्यं ॥१७॥ भूतानुरूपान्तुष्टान्तेषां गतो मामिष्टे ज्वलिते यावाकृषयो दीसेद्द वपशेपति ॥पु
नर्भामा नाह नयदि इतिसार्धं स्त्रिभिः आलितो नाम नोसिच ॥१८॥ कुर्यं नेदं इति वक्त्र यद्दुर्य तीति कर्मकर्तरि प्र
यः नस्तु वं तीमर्थः ॥१९॥ देवनानिष्ठ तिमाः ॥२०॥ प्रहेतुः स्वं ॥२१॥ पनैः कृत्वा नविघ्नते प्रमेघुष्टहृषेषु।
श्रीर्वज्राकृष्णा दिशोभायेषा तेर्भगवतः पादैः ही नाभूरित्य हेमन्ये ॥२२॥ तस्य राजहंसवं हृष्टा नरितु ष्टाति
प्रसन्न गर्वर्षति जलदा वीमत्वा मिव सर्वतः ॥ सूर्य हन प्रभं पद्मग्र हस्मर्द मित्यादिवि ॥१७॥ तस्य उ
लैर्भूतनतो ज्वलितेदं वरोदसी ॥ न त्यौ नदास्य द्युभिनाः सरोसिच मनोसिच ॥१८॥ नज्वलत्य
ग्निराजेन कालायं किंविधास्यति ॥ नपिवेति सलनं वस्मा न कुर्यं तिच मानरः ॥१९॥ रुदेत्यस्य
त्वागावां नदृष्यं त्सुषभा वजे ॥ दैवनानिरुद्दे तीव स्विय तिप्सुच्च लं तिच ॥२०॥ इमे जन पदा ग्रा
माः श्रोद्या नाकरा प्रभाः ॥ प्रहृष्य्रि यानि प्राने दाः किमद्य दर्शयति नः ॥२१॥ समेपतेर्भ होत्सा
ते र्मूर्तं भगवतः पदैः ॥ प्रनम पुरुषष्टी मिही नाभूर्इतसीभगा ॥२२॥ इति चिंतयतस्तस्य हृ
ष्टा रिष्टेन चेतसा ॥ राजः प्रत्यागमद्दूतस्तद्वपुर्णः कविधजः ॥२३॥ तेपादयो र्विपतितेस्रयथा
पूर्वमातरं ॥ प्रधो पुर्वे वाक्य विधनं जेतेन यनाद्भुयोः ॥२४॥ विलोक्याहिग्गृहृद्यो विक्रा
यमनुजं न्वपः ॥ पुत्त्र तिस्मरक्ष्मा पेसस्मर त्वारदेरितं ॥२५॥ कञ्चिदानन्दपूर्णा नः स्वज
नाः सुखमासते ॥ मध्यमोज दशा र्हा र्हाः सांतनांधकवृष्णयः ॥२६॥ शूरो मातामहः कश्चि
त्स्वस्यास्ते वाश्वमारिषः ॥ मातुलः सानुजः कश्चित्कुशल्यानकदुंदुभिः ॥२७॥ सप्तस्व
सारः तत्पत्न्यो मातुलान्यः सहात्मजाः ॥ प्रासते सस्नुषाः क्षेमं देवकी प्रमुखाः स्वयं ॥२८॥
येन तेन मनमस्याविलयतः सेतः ॥२२॥ प्रघयापूर्वं निपतितं तदेवाहं ॥ प्रात्तरश्मिन्यादि प्रपूर्णविंह
न ॥ प्रहल्यो ने त्राभ्यो विमजेत मित्यर्थः ॥२४॥ उद्दिग्नं कंपितं हृदयं यस्य विक्राय विगत कांति ॥
२५॥ स्वजनाबांधवाः किंवद्दन्तीति शंकया प्रवाहितं कर्मणा शक्नोति ॥२६॥ मातृ विमातामहो मातामह
प्रानकदुंदुभिः वसुदेवः ॥२६॥ स्वसारः परस्परं वसुदेव देवकी मेतताना मानिपि क्षेमं पृष्टं पृथगपि शक्नोति स्वय मिति ॥२७

आहुकस्य उग्रसेनः तस्य सत्यरोधस्य तत एव जीवनं मात्रं इ हे उग्रसेनो देवकस्य हृदीकः सुतः कृतवर्मा ज
येन्तादयः कंसभ्रातरः ॥ २८ ॥ सर्वक्षुद्रजीवीनां मध्ये महारथानां गंभीरघोषं युद्धे महावेगो वर्धनमादेनेइ
सर्वार्थः ॥ २९ ॥ कंसस्य पापस्य आत्मनि कामिषः ॥ ३१ ॥ स्कंदनं देवशीर्ष प्रणायां ग्रहयोगे युते ॥ ३२ ॥ भगवतिस्व
वेमातेन्द्रि इति सप्तश्च स्यानैश्चिन्तया आश्रित्याह ॥ ध्रुव इति ॥ ३३ ॥ भगवतावस्थाने द्विलोकानां मंगलेनान्य
येन्तानाशये नाकृत्यस्वर्मिः ॥ ३२ ॥ मंगलाय स्वभावायलब्धपालनाय ॥ भवायोद्भवाय च असन्तसम्वेः वल

क्वचिद्राजा आहुको जीवन् यस्तस्य सत्सु वा अनुजः ॥ हृदीकस्तत्सुतो कृतगोजम्पतं तगादसारणाः ॥ २८ ॥
आग्रतेऽशलेकास्त्रियेचशत्रुजिदादयः ॥ कश्चिदास्ते सुखं रामो भगवान् सात्वतां पतिः ॥ २९ ॥
प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः ॥ गंभीररयोऽनिरुद्धो वर्धते भगवानुत ॥ ३० ॥ सुषे
णश्चारुदेष्णश्च सांबो जांबवतीसुतः ॥ अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः ॥ ३१ ॥ त
थैवानुचराः शौरेः श्रुतसेनोद्धवादयः ॥ सुनंदनंदशीर्षण्या ये चान्ये सात्वतर्षभाः ॥ ३२ ॥ अ
पि स्वस्त्यासते सर्वे रामकृष्णभुजाश्रयाः ॥ अपि स्मरंति कुशलमस्माकं बद्धसौहृदाः ॥ ३३ ॥ मंग
लाय च लोकानां क्षेमाय च भवाय च ॥ आस्ते यदुकुलांभोधावाद्योऽनंतसखः पुमान् ॥ ३४
यद्बाहुदंडगुप्तायां स्वपुर्यां यदवोऽर्चिताः ॥ क्रीडंति परमानंदं महापौरुषिका इव ॥ ३५ ॥
यत्पादशुश्रूषणमुख्यकर्मणा सत्यादयो द्व्यष्टसहस्रयोषितः ॥ निर्जित्य संख्ये त्रिदशांस्त
दाशिषो हरंति वज्रायुधवल्लभोचिताः ॥ ३६ ॥ यद्बाहुदंडाभ्युदयानुजीविनो यदुप्रवीरा
ह्यकुतोभया मुहुः ॥ अधिक्रमंत्यंघ्रिभिराहृतां बलात्सभां सुधर्मां सुरसत्तमोचिताम् ॥ ३७

भद्रसहायः ॥ ३४ ॥ सर्वपूजिताः परमानंदो यथा भवति ॥ महापौरुषिकाः वैकुंठनाथानुचराः ॥ ३५ ॥
यस्य पादशुश्रूषणमेव मुख्यं येन तच्चाद्दिश्य कर्मणा तेन सत्यभामादयः संख्ये युद्धे त्रिदशान् सवलेन निर्जि
त्य तदाशिषो देवतायभोगसामग्रीः पारिजातादीन् वज्रायुधवल्लभा शचीनस्या उचिता शच्या उचितान् ॥ ३६ ॥
यदुजनदेहप्रभावाय जीविनः सुधर्मां सभां अंघ्रिभिरधिक्रामंति सुरगोविंदः सम्येत्यास्ते इति गतपंचम श्लोके

सुनाम यमाभ्याशोपेतलब्धमानोयेनबंधोः सकाशात् किंवा तैः अननुज्ञातः तिरस्कृतः यतो बहुका
लं तत्र स्थितोसि ३८ अभावैरिति छेदः प्रेमशून्यैः अमंगलैः परुषैः शब्दादिभिर्न ताडितोसि किं य
द्वार्थिभ्यः किमपि न दास्यामीत्युक्तं किंवा आशया यत् यथा आशा भवति तथा दास्यामीति प्रतिश्रुतं तस्म
न्न दत्तं किं तु नाविगतकांतिरसि ३९ शरणागतं सत्वं प्राणिमात्रं त्वं त्यक्तवानसि किं यतः त्वमाश्रय
प्रदः ४० अगम्यामिति छेदः अनिंदितामस्त्रियम् अगमः किं गतवानसि असत्कृतां मलिनवस्त्रादिना
गमः किं नोत्तमैः समैर्वेत्यर्थः ॥ अधमैरसमैर्वा किं त्वं पराजितोसीत्यर्थः ॥ ४१ ॥ संभोज्यान्भोजनार्हान् वृ

कच्चित्तेनामयं तात भ्रष्टतेजा विभासि मे ॥ अलब्धमानोवज्ञातः किंवा तात चिरोषितः ॥३८॥ क
च्चिन्नाभिहतोभावैः शब्दादिभिरमंगलैः ॥ न दत्तमुक्तमर्थिभ्य आशया यत्प्रतिश्रुतं ॥३९॥ क
च्चित्त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियं ॥ शरणोपसृतं सत्वं नात्याक्षीः शरणप्रदः ॥४०॥ क
च्चित्त्वं नागमोगम्यां गम्यां वासत्कृतां स्त्रियं ॥ पराजितो वाथ भवान्नोत्तमैर्नासमैः पथि ॥४१॥ अ
पिस्वित्पर्यभुंक्थास्त्वं संभोज्यान्वृद्धबालकान् ॥ जुगुप्सितं कर्म किंचित्कृतवान्न यदक्षमं ॥४२॥ क
च्चित्प्रेष्ठतमेनाथ हृदयेनात्मबंधुना ॥ शून्योस्मि रहितो नित्यं मन्यसे तेन्यथा न रुक् ॥४३॥ इति श्री
श्रीभागवते प्रथमस्कंधे चतुर्दशोध्यायः ॥ सूतः ॥ एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः ॥ ना
नाशंकास्पदं रूपं कृष्णविश्लेषकर्शितः ॥१॥ शोकेन शुष्यद्वदनहृत्सरोजो हतप्रभः ॥ विभुं त
मेवानुध्यायन्नाशक्नोत्प्रतिभाषितुं ॥२॥

द्धान्बालकांश्च किं त्वं पर्वभुक्तान् भुक्तवानसि ॥ अक्षमं कर्तुमयोग्यं यत्तत् किं न कृतवानसि ॥४२॥ नि
त्यमहं प्रेष्ठतमेन हृदयेनात्मबंधुना श्रीकृष्णेन रहितः शून्योस्मीति मन्यसे इत्यर्थः ॥ अन्यथा
पाते रुक् मनःपीडा न घटते इत्यर्थः ॥४३॥ इति प्रथमे चतुर्दशः ॥ कलिप्रवेशमालक्ष्य धुरंधरमहीक्षिति
स्वाराज्यं त्यक्त्वा पार्थः स्वर्गमिति पंचदशे ब्रवीत् ॥ कृष्णार्जुनेत्यादि कलिमित्यंतिकेछेदः ॥ नानाशंकास्पदं रूपमा
मालक्ष्य विकल्पितः इत्यर्थः ॥ प्रतिभाषितं नाशंकादिभिः त्वरोन्मानेत्यर्थः ॥ कृष्णविश्लेषकर्शितः ॥
१ ॥ शोकेन शुष्यता वदनेन हृत्सरोजेन प्रभा यस्य तेजोवान् ॥२॥

श्री
भाग०
टी०
५५

शुचः शोकाश्रूणि या मृज्य उन्नीतानि नेत्रयोर्वसंस्तंभ्य गलितानि च पाणिना मृज्य परोक्षेण दर्शनागोच
रेण श्रीकृष्णेन हेतुना समुन्नद्धं यत्प्रेमोत्कंठ्यं तेन व्याकुलो नृपमाह स्म तारेणान्वयः ॥ २ ॥ सख्यं हितैषि
त्वं मैत्रीमुपकारितां सौहृदं स्नेहवंधितां वाष्पेन कंठावरोधात् गद्गदया ॥ ३ ॥ येन मे वंचयित्वा देवानपि वि
स्मापयति स्म ॥ ४ ॥ यस्य क्षणवियोगेनेत्यादि यस्य ह्यू ह्यानां तेन हस्य युष्मितस्य इति सम्मतेः श्लोकस्थेन तच्छब्दे
नान्वयः ॥ प्रियस्याप्यप्रियदर्शनः ॥ उक्थेन प्राणेन पक्षे पित्रादिः श्रीकृष्णाख्यकारणानन्तस्मरणेन्द्रियाभिः ॥
५ ॥ यत्संश्रयात् यत्कालात्मना तिमत्तानां तेजः प्रभावाद्वेध यद्वेहलौ वपुष्मात्तहेतुः सज्जीकृतेन म

कृच्छ्रेण संस्तभ्य शुचः पाणिनामृज्य नेत्रयोः ॥ परोक्षेण समुन्नद्धप्रणयौत्कंठ्यकातरः ॥ २ ॥ स
ख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन् ॥ नृपमग्रजमित्याह बाष्पगद्गदया गिरा ॥ ३ ॥ अर्जुनः
वंचितोहं महाराज हरिणा बंधुरूपिणा ॥ येन मेपहृतं तेजो देवविस्मापनं महत् ॥ ४ ॥ यस्य क्ष
णवियोगेन लोको ह्यप्रियदर्शनः ॥ उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा ॥ ५ ॥ यत्संश्र
याद्द्रुपदगेहमुपागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानां ॥ तेजो हृतं खलु मयाभिहतश्च म
त्स्यः सज्जीकृतेन धनुषाधिगता च कृष्णा ॥ ६ ॥ यत्संनिधावहमु खांडवमग्नयेदामिंद्रं च सामर
गणं तरसा विजित्य ॥ लब्धा सभा मयकृताद्भुतशिल्पमाया दिग्भ्योहरन्नृपतयो बलिमध्व
रेते ॥ ७ ॥ यत्तेजसा नृपशिरोंघ्रिमहन्मखार्थे आर्योनुजस्तव गजायुतसत्ववीर्यः ॥ तेनाहृ
ताः प्रमथनाथमखाय भूपा यन्मोचितास्तदनयन्बलिमध्वरेते ॥ ८ ॥

तेषां यंत्रोपरि भ्रमच्चिह्नं मत्स्यस्तेन स्मा लक्षितं जित्वा द्रौपदी प्राप्ता च ॥ ६ ॥ उ विस्मये खांडवमिंद्रस्य वनमदां द
त्तवानस्मि खांडवदाहे रक्षितेन मयेन कृता सभा लब्धा अद्भुतशिल्परूपा माया यस्यां सा तेऽध्वरे यागे
राजसूये ये त्वन्नेतारं ज्ञाको विगीतस्तथापि बलिमाजहुर्यत्ते ॥ ७ ॥ नृपशिरः स्वं अङ्घ्रिर्यस्य तं जरासंधं तव अनुजो
भीमो मखार्थे अहन् हतवान् ॥ तद्विजयं विना राजसूयमखानुपपत्तेः ॥ गजायुतस्येव सत्त्वं यस्य स्वाहृत्य श
क्तिर्वीर्यं च बलं च यस्य सः ॥ तेन हृताः प्रमथनाथमखाय भैरवमखाय ये राजानस्ते नाहृताः तैः यस्मा
न्मोचितास्तत्तस्माद्ध्वरे बलिमुपनीतवंतः ॥ ८ ॥

यैः कितवैर्दुःशासनादिभिः तव पत्न्याः कबरं विकीर्य उन्मुच्यापकृष्टं तेषां स्त्रियो हतेषु तस्मिन्नेव वै
धव्यान्मुक्तकेशाः स्युः कृत न च कारकत्वं मे तेकबरं युधिष्ठिर वो जयस्य मधिकृत्य रचितो नामहाभिषे
कः तेन स्नानोत्थानं चाहरं मेघयत्स्नरणा नदीनीमे वस्त्रामस्य श्रीकृष्णस्य नमने पादयोः पतितानामस्नुलि
शुभ्रोयस्याः पत्न्याः पदस्य कृष्णापदस्यापि पतितशकृष्णास्कृ पदेन समासः ॥ नित्यस्याप्वेर नत्वात् ॥ ब
पिनाशेमत्यपि चैतमेदुःखेनहि पराधस्तवममैवादृष्टमिति भावः ॥९॥ शिष्याणां मध्ये तस्याग्रेतनस्य
कोपं जेयः ॥ तस्माद्दुर्वाससो हेतोः श्रीनिमित्तदुर्योधनेन रचितं पदं दुर्वंतं कृष्णे शापलक्षणं तस्मात्तस्य काशा
दस्मान्हृते पत्न्यनुगोपकिं कृत्वा शाकमेवान्नेन स्निग्धाद्वेव शिष्यमुपयुज्य जगत् धातयतः अभयभोगास्य
लिलेविनिमग्नाः मुनीनां संघः त्रिलोकीजनामयंस्त ॥ एवं हि महाभारते कथा कदाचिद्दुर्योधनेन दुर्वा
वासमस्मात्तिथ्यकृतेतेन च परितुष्टेन वरं वृणीष्वेत्युक्ते ॥ दुर्वाससः शापात्माऽवान पश्येयुरिति मनसि

पत्न्यस्तवाधिमवेत्य मम कामिषेक स्नाचिष्टवान्कबरं कितवैः सभायां ॥ स्पृष्टं वि
कीर्य पदयोः पतितास्कसम्बोधयः तन्निवृत्तो कृतवन्दते शविमुक्तकेशाः ॥९॥ योनोऽनु
गोपवनमेत्य दुरंत कृष्णाद्दुर्वाससोऽरिविहितादपनाय भृग्धः ॥ शाकान्नशिष्टमुप
भुज्य यतस्त्रिलोकीं तृप्तामम्नस्त सलिले विनिमग्नसंघाः ॥१०॥

विधाय दुर्योधनेनोक्तं ॥ युधिष्ठिरोऽस्मत्कुलस्य ज्येष्ठोऽनन्तस्यापि भवतैव मे वशिष्यायुतस्य सहितेनातिथि
थिनाभवितव्यं किन्तु द्रौपदी यथा न त्वं बुभुक्षितस्तथा ॥ तथा तस्यां भुक्तवत्यां तत्र गत्वा तत्र दुर्वास
सि प्राप्ते वरमादेशेन युधिष्ठिरेण मध्याह्निकं कर्तुं नानागतायां तामिति विज्ञाय तेनाऽनुनिमेषाय
जलेनिमग्न ॥ तत्र विलोक्यानुपस्थाप्य द्रौपदी श्रीकृष्णस्मरणात्रः कृष्णः तदृत्तमेव तत्र ततवनेतत्र तथा चागतः ॥ उ
तया वेदितेऽत्र तां तेन भगवताऽक्ते ॥ द्रौपदी स्थालीचतुष्टयं विलोक्य तत्र शाकसेन भोजनय तथा चानीयत्पा ॥ उ
तत्स्थाली लग्नं शाकं जलं च भक्तिपूर्वकं दत्तं स्थाल्यां मया वसर्वात्मा जगद्भुक्तं तस्मिंस्तातः स्तन्यमिति
तस्मात्पण्णिर्विघ्नस्य स्थाली मानीयत लकंठलग्नं किं विज्ञाका तं पश्यासेत्युक्ते ॥ पुनेन विश्वासं भगवान् ॥
प्रीयतां ॥ अथ यमानुचरनिमेव ग्रासं धृतिपति ॥ स च नावनातिरसो ह्यापाकमभयेन पलायितमिति ॥१०

श्री॰
भाग्र॰
टी॰
९६

गिरिजासहितो विस्मापितः सन् निजं पाशुपतास्त्रं मे ददौ लोकपाला निजास्त्राणि प्रददुः अमुनदे
या स्वर्गं प्राप्त ॥ अमुनैवेति महेन्द्रस्यासनार्धं ॥११॥ तत्रैव स्वर्गे क्रीडतो गाण्डीवं लक्षणं चिह्नं यस्य तत्
भुजदण्डयुगं निवातकवचादिदैत्यानां वधार्थमाश्रितवन्तो येन प्रभावयुक्तं कृतं हे आजमीढ युधिष्ठिर ते
न मुषितो वञ्चितोऽस्मि कथंभूतेन महता इत्थं निजमहिमावस्थानेन यद्बान्धवइत्यादिश्लोकत्रयस्यापि
तेन मुषितोऽस्मीति पूर्वेणैव संबन्धः ॥१२॥ अतिक्रमितुमशक्यं कुरुबलं बाहुकौरवसैन्यमब्धिं नाव्यतो गाम्भी
र्येणापारं च देशतो यस्मात्ततरे तीर्णवान् ॥ उत्तरगोग्रहे अतीर्याणि दुस्तराणि सत्वानि यस्मिन् भीष्मादी
नि भीष्मादिरूपाणि यस्मिन्नतोरे हृतं गोधनं प्रत्यानीतं तेषां शिरोभ्यः सकाशात्तेजास्पदं प्रभावा
यत्तेजसाथ भगवान्युधि शूलपाणिर्विस्मापितः सगिरिजोऽस्त्रमदान्निजं मे ॥ अन्येऽपि चाहममु
नैव कलेवरेण प्राप्तो महेन्द्रभवने महदासनार्धं ॥१२॥ तत्रैव मे विहरतो भुजदण्डयुग्मं गाण्डीवल
क्षणमरातिवधाय देवाः ॥ सेन्द्राः श्रिता यदनुभावितमाजमीढ तेनाहमद्य मुषितः पुरुषेण
भूम्ना ॥१३॥ यद्बान्धवः कुरुबलाब्धिमनन्तपारमेको रथेन ततरेऽहमतीर्यसत्त्वं ॥ प्रत्याहृतं बहु
धनं च मया परेषां तेजास्पदं मणिमयं च हृतं शिरोभ्यः ॥१४॥ यो भीष्मकर्णगुरुशल्यचमूष्व
दभ्रराजन्यवर्यरथमण्डलमण्डितासु ॥ अग्रेचरो मम विभो रथयूथपानामायुर्मनांसि च दृ
शा सह ओज आर्च्छत् ॥१५॥ यद्दोःषु मा प्रणिहितं गुरुभीष्मकर्णनप्तृत्रिगर्तशल्यसैन्धव
बाह्लिकाद्यैः ॥ अस्त्राण्यमोघमहिमानि निरूपितानि नोपस्पृशुर्नृहरिदासमिवासुराणि ॥१६
सदंडसीवरूपमणिमयं मुकुटरत्नरूपं च वस्त्रं धनं तान्याह नास्त्राणि मोहयितुं बाहुनेयद्बांधवेन मया
॥ ॥ अदभ्रा अनल्पा ये राजन्यवर्या तेषां रथमण्डलेर्मण्डितासु भीष्मादीनां चमूषु सारथ्ये रथेन ममाग्र
चरस्सन् ॥ हे विभो रथयूथपानामायुरादीनि योद्धृशाहसैव आर्च्छत आहृतवान् तानासि उत्साहशक्तिस
हबलेन्द्रियजः शस्त्रादिकौशलं ॥१५॥ यस्य दोःषु भुजेषु मा मां प्रणिहितं प्राप्य तेनानवगृह्यादिभिर्निरू
पितानि प्रयुक्तानि अस्त्राणि न स्पृशन्ति स्म गुरुद्रोणः त्रिगर्तदेशाधिपतिः सुशर्मा शल्यः शल्यः सैंध
वः सिन्धुदेशाधिपतिर्जयद्रथः ॥ बाह्लीकः शन्तनुभ्राता अमोघो महिमा येषां तथाभूतान्यपि पाण्डव
रूपिणं प्रह्लादं प्रतीकाराकरणेऽप्यस्पृश्य ॥ नृहरिदासं प्रह्लादमिवासुराणां शस्त्राणि न स्पृशन्ति

प्र०स्कं० ॥१५॥

९६

सोऽयं स्मरस्य कुमतिनामघामेस्य कृतः॥ कुमतिर्नमेवाह॥ आनन्द इत्यादिना अनुभवा धर्मा ह्मायमव्याः श्रे
णः आनावाह्ययस्य जयइत्यवधेहि जलघातेविनाश्वाः आनास्ति नीरघादवतीर्यवात्तैर्भुवेमित्वाज
लं पादि नेमधातदायमानुभावेन निरस्तचित्ता आयोमानस्य हत्वंतः॥ ससोस्य कृतइति कुमतिर्व॥ ६
हे नरदेवदृद्रागे श्रीरस्फचिरं यस्मिन्तेन नशा भिन्नानि नर्मालिपरिहासवाक्यानि नानि तथा कार्यपरला
वेषु देयार्थ नाशेनि मधुपानानि संजल्पितानि दिहदिस्य शानि मनोज्ञानि माधवस्य यामे नानि इदानी
स्मर्तुं मम हृदयं लुठंति इह आमर्यन्ति जभाव स्त्रार्थः॥ १७॥ विकत्थनं स्वगुणश्लाघनादिशाद्यादिष्वेका
दश्यतिरिक्ता हेतोः कदाचिदपि अभिचारं इदृशं हे वयस्य॥ अनेनवाक्येन स्वमिति वक्रोक्त्या विप्रलब्धः
सोऽयं कृतः कुमतिनाम हृदई यन्येयनादयघ्नमम वायमजेति भव्याः॥ मां आनतवाहस्य घोरथि
नामुविष्टन प्राहृस्मद नुभावनिरस्तचित्ताः॥ १६॥ नर्मान्तु दत्तरुचिरस्मितशोभनानि ह्यपार्थके
नैनमस्तवेक्रूरुहृदं दनेति॥ संजल्पितानि निरदेवस्य दिस्यशानि स्मतिलुठंति हृदयं मम माधवस्य॥ १७
श्लाघ्यमना नवविकत्थनभोजनादिष्वेका हवयस्य अनेनवाक्येन विप्रलब्धः॥ सख्युस्तवेवपितृ
व नृनयस्य सर्वमिह मद्यान्हितया कुमतेरहम॥ १८॥ सोहं नयेद्य इहि हितः पृहदि तमनसख्या सि
येनहृतदाहृदये नगमा॥ अधसुरुक्रमयगिदमगारनेगापेरसन्निवले विनिर्जितोना
स्मि॥ १९॥ तद्दिधनुर्मनइवबः सार्थी इह यास्ते सो रथी नवतयो यत आमनेति॥ सर्वत्क्षणेन
तदहन् दसदीशा रिक्तं भस्मन्कृतं कपटरोह्यमिवो मममाँ॥ २०॥
तिरस्कृतोपि न अभवतितिपाठे॥ अभवा देवाः सेवकाः संति यस्य सोमदाव्यापि मयावधम्य इति॥
मत्वा तिरस्कृतः इत्यर्थः॥ अप्रभुवानितिपाठे चतनभावस्त्रार्थः सेवमवाधमस्य हनमहितया मह त्वेन
वकणासस्त्रितिमहत्वेनार्थः सख्युरेतेभ्यो वनन यस्याहं पितेनयापुधिष्ठिरेण शाकिनवरामवे॥ प्रा
गहमित्याह॥ १८॥ तनसम्बोरहितोना हृदयेन गतमः श्रृंगहेया जनं उरुक्रमस्य पराग्रहेवाः शसहस्त्री
लतस्तं॥ अस्य सन्निनीचे योधिव जिनाम्मिश्रीकृष्णवियोगएव हेतुर्नान्यइत्याह॥ तदिति॥ १९॥ यत्तोयस्य
ईशेन रिक्तम सम्प्रमत्कार्यहमस्यमित्रं विधानैः पिमस्या निकृतमिव अस्तिपीत्यादयि॥ ऊ हकामाया वि
नः स्वकायानरादलवकपटादितिपाठः॥ अधमवायं॥ यया समका ऋष्ण्णादिनाकृत्याकारभूसोऽभवीज

शिव॥२०॥

श्री भाग्र टी ४७

सह तत्रैव यथा शुश्रूषमाणां नः सुहृदां मध्ये ॥२१॥ अवताराः पंचदशास्य वशीभूताः प्रत्युदेतुः ॥ विप्रशापेति वारुणी
मत्तमयामिनी मदिरा पीत्वा ज्ञानं तासामिवा मां मां परकाम पुष्टिभिर्मिथो निघ्नतामवशीभूतास्तेनैनां मां हेतवः कंतारसमा
हृष्टिमिः प्रायेणेति भावयंति पालयंति ॥२२॥ जलौकसामस्यादीनां मध्ये महांतः स्थूलाः प्राणी यस्य सज्ञा
मध्याम त्यजंति ॥ २४॥ प्रवृत्तोऽभारभूतानामहत्वा नतः पुरु एव कृते नशक्रो मामीति समचयन्नाह ॥२५॥ देशाका
लानि वार्थ्ययुक्तानि मनः पीडोपशमनकानि लिवगोविंदस्य वचनानि स्मरतो मम चित्तेन हरंति प्राकर्ष
यंति ॥२६॥ एवमिति सूतोक्तिः भूतिं इत्छेन स्नेहेन चिंतयतो मतिः शांता विशोका विमला विरक्ता वा
सीनानि वै मलफलमाह ॥२७॥ वासुदेवांघ्र्यनुध्यानेन परिबृंहितं रंहो वेगो यस्यास्तया निर्मथिताः ग्र

राजंस्त्वयानुपृष्टानां सुहृदां नः सुहृत्पुरे ॥ विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः ॥२१॥ वा
रुणीं मदिरां पीत्वा मदोन्मथितचेतसां ॥ अजानतामिवान्योन्यं चतुःपंचावशेषिताः ॥२२॥ प्रा
येणैतद्भगवत ईश्वरस्य विचेष्टितं ॥ मिथो निघ्नंति भूतानि भावयंति च यन्मिथः ॥२३॥ जलौ
कसां जले यद्वन्महांतोऽदंत्यणीयसः ॥ दुर्बलान्बलिनो राजन्महांतो बलिनो मिथः ॥२४॥ एवं
बलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः ॥ यदून्यदुभिरन्योन्यं भूभारान्संजहार ह ॥२५॥ देशका
लार्थयुक्तानि हृत्तापोपशमानि च ॥ हरंति स्मरतश्चित्तं गोविंदाभिहितानि मे ॥२६॥ श्रीसूतः
एवं चिंतयतो जिष्णोः कृष्णपादसरोरुहं ॥ सौहार्देनातिगाढेन शांतासीद्विमला मतिः ॥२७
वासुदेवांघ्र्यनुध्यानपरिबृंहितरंहसा ॥ भक्त्या निर्मथिताशेषकषायधिषणोऽर्जुनः ॥२८
गीतं भगवता ज्ञानं यत्तत्संग्राममूर्धनि ॥ कालकर्मतमोरुद्धं पुनरध्यगमद्विभुः ॥२९॥ विशो
को ब्रह्मसंपत्त्या संछिन्नद्वैतसंशयः ॥ लीनप्रकृतिनैर्गुण्यादलिंगत्वादसंभवः ॥३०॥ ॥

शेषाः कषायाः कामादयो मलाः यस्याः सा धिषणा बुद्धिर्यस्य सः ॥ ज्ञानं पुनरध्यगमदित्युत्तरेण
न्वयः ॥२८॥ कालेन कर्मणा तमसा भोगाभिनिवेशेन च रुद्धं आवृतं असत्तानफलमाह ॥ ततो लिंगनाशः
स्थूलदेहनाशः विशोक इति ॥२९॥ एतदेव विशोकत्वे हेतुभावेनोपपादयति शोकस्य हि हेतुः द्वैतभ्र
मः तस्य देहस्य लिंगं न स्यात् गुणाः ॥ तेषां च विद्यानल ब्रह्मसंपत्त्या ज्ञानेन लीनात्प्रकृति
विद्या यस्मिन्नैर्गुण्यं भवति ॥ ततस्तस्य लिंगं वा विद्याशबलत्वमस्य नैर्गुण्येण गुणकार्यलिंगना
शः प्रलिंगत्वादसंभवः ॥ सम्यग्भोगाय च भवति ॥ पुनः पुनरुत्पत्तिसंभवः स्थूलशरीरं तद्रहितः ततश्च न

४७

भगवतो मार्गं मालक्ष्य यदुकुलस्य संस्थां नाशं श्रुत्वा नारदोक्तं चानुस्मृत्य स्वर्गमार्गाय निश्चलचित्तो मतिं
चक्रे ॥ ३१ ॥ तदुर्विशेषाद्बहुधातिहि सौदामिन्यापयाकाशयोर्मायाहि लावुग्रमंडले ॥ गतिर्न लक्ष्यते स्म स्व
स्थाः कृष्णस्य देवतेरिति संसृतेः उपरराम जीवन्मुक्ताभवद्देहे जहावितिवा तदेव श्रुत्वा पिपृथादत्र भोभा
गवतो वेलक्षण्यं श्रुत्वा दुर्ज्ञानत्साम्यं विक्षोभमदमतीत्य तिवेलक्षण्योपपत्तये ईतिद्वाभ्यां ॥ ३२ ॥ ययायादवरूपया
तन्वा भुवो भारं कंटकेनेव कंटकमिवाहरत ॥ यादवतनुर्भूभारतनुश्च द्वयमपीश्वरस्य समं हार्यत्वेनासममव
श्रीकृष्णमूर्तेर्विशिष्टमाह ॥ ३३ ॥ यद्यपि तानापि यथाधत्ते जहाति च तदाह ॥ यथा नटो निजरूपेणाव
स्थितः स्व ॥ रूपाणि नाप्तिध तेऽप्रेनर्धत्ते चन यथा नटः पि कलेवरं जहौ ग्रे तरद्धादिस्तर्थः ॥ युधिष्ठिरस्तत्स्वर्गा

निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च ॥ स्वःपथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः ॥ ३१ ॥ पृथा
प्यनुश्रुत्य धनञ्जयोदितं नाशं यदूनां भगवद्गतिं च तां ॥ एकान्तभक्त्या भगवत्यधोक्षजे निवेशि
तात्मोपरराम संसृतेः ॥ ३२ ॥ ययाहरद्भुवो भारं तां तनुं विजहावजः ॥ कंटकं कंटकेनेव द्वयं चा
पीशितुः समं ॥ ३३ ॥ यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः ॥ भूभारः क्षपितो येन जहौ
तच्च कलेवरं ॥ ३४ ॥ यदा मुकुन्दो भगवानिमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः ॥ तदाहरे
वाप्रतिबुद्धचेतसामभद्रहेतुः कलिरन्ववर्तत ॥ ३५ ॥ युधिष्ठिरस्तत्परिसर्पणं बुधः पुरे च रा
ष्ट्रे च गृहे तथात्मनि ॥ विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्यधात् ॥ ३६
स्वराट् पौत्रं विनयिनमात्मनः सुसमं गुणैः ॥ तोयनीव्याः पतिं भूमेरभ्यषिंचद्गजाह्वये ॥ ३७

मेनोदृष्टसंगाय कलिप्रवेशमाह ॥ ३४ ॥ स्वतन्वा जहौ स्वतनोरेव वैकुंठारोहणात् ॥ श्रवणीयाः क
था यस्य सः ॥ तदा यदह स्मिन्नेवाहरेति निलुप्तसप्तम्यंतपदं अप्रतिबुद्धचेतसामिति ॥ विवेकि
नामप्रभुत्वेन जके ॥ अन्ववर्तत तन्निरूपयिष्यन्नवाशीनप्रविष्टस्य तेन रूपेण तुष्टतिरुक्ता ॥ ३५ ॥ बुधो युधिष्ठिरः
तस्य कलेः परिसर्पणं प्रसरणं विलोक्य कथंभूतं लोभाद्यधर्मचक्रं यस्मिन् जिह्मं कौटिल्यं पर्यधात ।
तद्दृष्टिवेपरिधानमकरोत् ॥ ३६ ॥ आत्मनः स्वस्य गुणैः स्वसममिति समदृशो तोयसमर्थनः स्थितेस्समुद्रा
दकमेव नीवी परिधानविशेषो यस्याः भूमेः पतिमभ्यषिंचत्कृतवान् ॥ ३७ ॥

श्री भाग्र॰ टी॰ ५८

वत्नमनिरुद्धमपुत्रं निरूप्य हृत्वेत्यर्थः ॥ अविवदात्मन्यारोपयामास ॥ यतईश्वरः समर्थः ॥४८॥ संछि
न्नाः सर्वे आशा आलोबंधनानि उपाधयो येन न ददर्श ददर्शयति द्वाभ्यां ॥४९॥ वाचमिंद्रियवलत्तणेमर्वेद्रियाणि
मनसि प्रलापितवानित्यर्थः ॥ तच्चमनः प्राणे प्राणं धीनहृत्तिलात्न तप्राणं इत्यंपानेतेनाकर्षणेन ॥ अ
पानेमृत्यावरुत्सर्गः तत्संहितमपानमृत्यौतदधिष्ठातृदेवताया ॥ अतएवत्वचावागादिषु पितात्कर्मसादि
तेतेपंतेवमृत्युं पंचत्वे पंचभूतानामेकादेहेदेहमेवमृत्युं नीत्वान इतिभावितवानित्यर्थः ॥ अपुत्रहवी

मध्युराघांतयावद्भ्रेग्मरसेनपतितंततः ॥ प्रजापत्यां निरूप्येष्टिं मग्नीनपिवदीश्वरः ॥४८॥ वि
मृज्यतत्रतत्सर्वं डुगूलवलयादिकं ॥ निर्ममो निरहंकारः संछिन्नाशेषबंधनः ॥४९॥ वा
चंजुहाव मनसि तत्प्राणइतरे च तं ॥ मृत्यावपानंसोत्सर्गं तं पंचत्वेह्यजुहवीत् ॥५०॥ त्रिवे
जत्वाच पंचत्वे तच्चैकत्वेजुहान्मुनिः ॥ सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये ॥५१॥
चीरवासा जिताहारो बद्धवाङ्मुक्तमूर्धजः ॥ दर्शयन्नात्मनोरूपं जडोन्मत्तपिशाचवत् ॥५२॥
एव अनवेक्षमाणो निरगाद्धृण्वन्बधिरो यथा ॥ उदीचीं प्रविवेशाशां गतपूर्वां महात्मभिः ॥५३॥
हृदि ब्रह्मपरंध्यायन्नावर्तेत यतोगतः ॥ सर्वेतमनुनिर्जग्मुर्भ्रातरः कृतनिश्चयाः ॥५४॥ क
लिनाधर्ममित्रेणदृष्ट्वास्पृष्टाः प्रजाभुवि ॥ तेसाधुकृतसर्वार्था ज्ञात्वात्यंतिकमात्मनः ॥५५॥
सर्वेतमनुकं निर्जग्मुर्भ्रातरः कृतनिश्चयाः ॥५२॥ मनसाधारयामासुर्वैकुंठचरणांबुजं ॥ तद्ध्यानो
द्रिक्तयाभक्त्या विशुद्धधिषणाः परे ॥५६॥ तस्मिन्नारायणपदे एकांतमतयोगतिं ॥ अवापुर्दुर
वापांतेअसद्भिर्विषयात्मभिः ॥५७॥
दितियुक्तं लगंतात्लुङि रूपअजुहवीदितिवक्तव्ये अजुहवीदित्यार्षं ॥५०॥ त्रित्वेगुणत्रये तच्चत्रित्वमेक
त्वे ॥ अविद्यायां सर्वमजुहवीत् तच्चैकत्वमविद्यामात्मनि जीवेएवं संशोधितमात्मानं ब्रह्मण्यव्यये कूटस्थेनंत
रंसामन्यत्रलयइत्यर्थः ॥ तदेवमात्मप्रतिपत्तिमुक्त्वा बाह्यस्थितिमाह चीरवासाइति द्वाभ्यां ॥५१॥ बद्धवाक्मौ
नी ॥५२॥ अनवेक्षमाणः अनुजादिप्रतीक्षामकुर्वन् ॥ आशां दिशं गतपूर्वां पूर्वप्रविष्टां महात्मभिर्विवेकि
भिः ॥५३॥ अधर्ममित्रेणतेनसाधुकृताः सर्वेधर्मा दयोयेनएवंवैकुंठचरणांबुजमेवात्यंतिकंशरणं ज्ञात्वा ५८

५५।

कथं भूतेषु देषु तत्कल्मषाणां श्रास्थाने निवासस्थाने ॥ यद्यस्मिन्विरजे नाम्ना नाएवसमापुः ॥ न तथोडश
कलेन लिंगेन गतेनवा विशुद्धवर्णा विरजे नाम्नैवाबस्थानस्यांगतिं ते विधूतकल्मषाः प्रापुरिति तीर्था
मर्थं दत्त्वा भासेश्री कृष्णावेशेन श्रीकृष्णे चित्तमावेश्य देहं पारित्यज्य तन्वित्तएवसमन् ॥ तदानीं नेतत्प्रागतैः
पितृभिः सहस्वस्वरथं स्वाधिकारस्थाने ययौ ॥ ५८ ॥ इत्येवं पुनस्ते प्रापाणमलमृतिशायनस्वस्थय नेम गला
सदेद्यु लेपविवेच ॥ २० ॥ इतिश्रीआचार्यप्रथमे पंचदशः ॥ ततः च षोडशोऽध्यायः धर्मयोः कलिविजयोः ॥ संवादे
वर्ण्यते प्राप्तिः पालकस्य परीक्षितः ॥ द्विजवर्याणां शितव्यासात्मजस्य निश्रमिजानंतको विदः नात
विधूतकल्मषास्थाने विरजे नाम्नैवयत ॥ विदुरोऽपि परित्यज्य प्रभासे देहमात्मवान् ॥ ५७ ॥ कृ
ष्णावेशेन तच्चित्तः पितृभिः स्वक्षयं ययौ ॥ द्रौपदी च तदाज्ञाय पतीनामनपेक्षताम् ॥ ५८ ॥ वासुदे
वे भगवति ह्येकान्तमतिराप तत् ॥ यः श्रद्धयैतद्भगवत्प्रियाणां पाण्डोः सुतानामिति सम्प्रयाणम् ॥ शृ
णोत्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति सिद्धिम् ॥ २० ॥ इतिश्रीप्रथमे पंचदशः ॥ सूतः ॥ ततः
परीक्षिद्द्विजवर्यशिक्षया महीं महाभागवतः शशास ह ॥ यथा हि सूत्यामभिजातकोविदाः
समादिशन्विप्रमहद्गुणस्तथा ॥ १ ॥ स उत्तरस्य तनयामुपयेम इरावतीम् ॥ जनमेजयादींश्चतुरस्त
स्यामुत्पादयत्सुतान् ॥ २ ॥ आजहाराश्वमेधांस्त्रीन्गंगायां भूरिदक्षिणान् ॥ शारद्वतं गुरुं कृत्वा
देवा यत्राक्षिगोचराः ॥ ३ ॥ निजग्राहौजसा वीरः कलिं दिग्विजये क्वचित् ॥ नृपलिंगधरं शूद्रं घ्नंतं
गोमिथुनं पदा ॥ ४ ॥ शौनकः ॥ कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः ॥ नृदेवचिह्नधृक्शू
द्रः कोऽसौ गां यः पदाहनत् ॥ ५ ॥ तत्कथ्यतां महाभाग यदि कृष्णकथाश्रयम् ॥ यदि वा तत्पदां
